नं० ४९३४

नाम - प्रपञ्चसार संग्रह॰

कर्ता - गीर्वाणेन्द्र सरस्वती विश्वेश्वर सरस्वती शिष्यः

पत्र संख्या - ~~३२४ पत्राणि~~ १९८ पत्राणि सं. x

विषयः - तंत्रम्

प्रपंचसार[सं]ग्रहः

४५३४

5934

#197 Missing

F. = 197

सं० ४५३४

प्र·सा·
सं·
१

ॐ श्रीगणेशायनमः ॥ ॐ श्रीमतेरामानुजायनमः ॥ नत्वाश्रीशंकराचार्यममरेंद्रपतीश्वरं ऊर्वेप्रपंचसा
रस्यसारसंग्रहमुत्तमं १ तत्रप्रपंचसारेयच्छंकराचार्यैरुक्तंमंत्रयंत्रप्रयोगादितत्सर्वमपिसारभूतमेव तथापीदा
नींमंदप्रज्ञानांविस्तरतोज्ञातुमशक्यत्वात्तेचाशक्यत्वादत्यंतोपकारभूतत्वेनप्रसारतरं तदल्पग्रंथेनैवयथा स
र्वमंत्रयंत्रतंत्रसारग्रहणंस्यात्तथासर्वतंत्रसारंगृहीत्वामयासत्संप्रदायसर्वस्वाभिधव्याख्यानोक्तमार्गेणैव
क्ष्यते तत्रपुनःप्रसंगात्तत्रतत्रमंत्रकल्पांतरेमंत्रसारक्रमदीपिकासनत्कुमारीयशारदातिलकमंत्रदेवता
प्रकाशिकादौयद्यन्मंत्रयंत्रतंत्राद्युक्तंतदपिकिंचित्किंचिद्वक्ष्यते तत्रप्रपंचसारेप्रथमंतावत्क्षीराब्धौशेषप
र्यंकशायिनंमहाविष्णुंप्रतिब्रह्मादिभिस्त्रिमूर्तिभिःस्वेषामुत्पत्त्यादिविषयःप्रश्नप्रकारः प्रथमेपटलेनिरूपि
तः पुनर्विष्णुनातदुत्तररूपेणत्रिगुणात्मिकायाभुवनेश्वर्याःस्वांशात्तयाःसकाशात्तत्रयाणांब्रह्मादीनां
देवानांदेवानांच सर्ववैदिकतांत्रिकमंत्रयंत्रतंत्राणांचोत्पत्तयोनिरूपिताः प्रथमपटलानंतरंग्रंथे पुनर्द्वि
तीयादिभिस्त्रिभिःपटलैस्तदुपरिपंचमषष्ठयोःपटलयोस्तुसर्वमंत्रसाधारणदीक्षार्थमेउपमंडलादिनि
र्माणवस्त्रबलिकलशस्नानहोमकलशाभिषेकगुरूपसर्पणमंत्रोपदेशगुरुदक्षिणादानंस्यादिप्रकारास्त्र
क्ताः ॥ तत्सर्वमिदानींतनैरतिप्रयाससाध्यत्वादननुष्ठीयमानत्वात् ग्रंथविस्तरभयाच्चात्रनलिख्यते
तस्मात्तत्सर्वंमूलग्रंथएवावलोकनीयं तदनुष्ठानेच्छुभिःदीक्षाशब्दार्थस्तु अत्रैवोक्तः दद्याच्चदिव्यभाव
क्षिणुयात्दुरितान्यतोभवेद्दीक्षामननात्त्वपदस्यत्रापतइति मंत्रउच्यतेभयतः इतिदीक्षामहिमामंत्रम
हिमाचोक्तः तत्रभयतइतिभेदवासनाग्रंथिरुपतइति पुनरपिदीक्षायाअवश्यकर्तव्यतात्रैवोक्ता दैवा
दिकस्याप्यथमानुषादेःपैत्रादिकस्याप्यथवत्सरस्य आदिक्षमाणस्यसमग्रसंपद्यद्येननदीक्षाविधिमारभे
त इतिदीक्षाकालस्त्वतदवश्यकर्तव्यताचोभयमित्युक्तम् क्रमदीपिकायांचोक्तम् ऋतेयथासंतततत्रा

पिनोपि सिद्धिं नयंदास्यंति हि मंत्रशूरा इति यथेति दीक्षयेत्सर्थ । दीक्षाकालश्च क्रमदीपिकायामुक्तः चैत्रेकृ
त्वैतन्मासिकर्माण्युक्तेपक्षे पूर्णादर्शे भृगोर्देशिकात्प्राप्यदीक्षां तेनानुज्ञातः पूर्वस्मिंस्तु वा द्वितीये मासि सिद्धाद
श्यामारभेतामलायामिति एवं क्रमदीपिकायां दीक्षाकाल उक्तः मेषादद्विणामूर्तिकल्पेत्वदीक्षादिना।
ला विना मंत्रं भक्तानां शीघ्रसिद्धिमिति भक्तस्य दीक्षेपेक्षा उक्ता च अथ पुनः सप्तमे पटले मातृकासरस्वती वि
धानमुक्तं तदारभ्य सर्वमंत्राणां साधारणिकान्संगान् समाध्यान् सहजाविधानानु समंत्रान् सकलसविधा।
नान् सपुरश्चर्याविधानान् सप्रयोगविधानांश्च वक्ष्ये तत्र करन्यासादीन्यंगानि च मंत्राणां अप्रसिद्ध समित्त्वच्छ
फलानां नामानि चावरणं मंत्राणां स्वरूपेणैव वक्ष्ये मंत्राणि च प्रयोगांश्च सध्याध्यानरूपेणैव वक्ष्ये तत्र प्र।
थमं तावन्मातृकादि सर्वमंत्रजपारंभविधानमाक्षिप्ते वृषासे प्राक्पटलादौ अथ पुनराचम्य गुरुः प्राग्व ध१
दनो विष्टरोपविष्टः सन् प्राणायामं सलिपिन्यासं कृत्वा तादिपूर्वोक्तेन प्रकारेणार्थतो वक्ष्ये मुवं
शुद्धोदकेन स्नात्वा निर्मलवसनो धौतपाणिपादाननश्चाचांतः पवित्रकः ऊर्ध्वपुंड्रमस्तको वा प्राङ्मुखो वो कः
वो॰ दङ्मुखो वा पद्मासने योनिमुद्रासने स्वस्तिकासने वोपविशेत् पद्मासनप्रकारस्तु सम्मेलनगोपालन्यास
विधाने उक्तः सव्यपादमूरूपादाय दक्षिणोपरि विन्यसेत् तथैव दक्षिणं पादं सव्यस्योपरि विन्यसेत् विष्टु
भ्य कराभ्यां धीरो गृहीत्वा नासाग्रन्यस्तलोचनः पद्मासनं भवेदेतत्सर्वेषामपि पूजितमिति स्वस्तिकासनं तु याम
शास्त्रे उक्तम् जान्वोर्रंतरे कृत्वा सम्यक् पादतले उभे ऋजुकायः समासीनः स्वस्तिकं तत्प्रचक्षते योनिमु
हु द्रासनं तु त्वा प्रजपेद्यः समाहितः यं कंचिदपि वा मंत्रं तस्य स्युः सर्वसिद्धयः हीनारुद्धाः स्तंभिताश्च कीलि
ता मूर्छितास्तथा सुप्ता मत्ता हीनवीर्या दग्धाः सुप्ताः रिपुपक्षगाः बालयौवनमत्ताश्च वृद्धा मंत्राश्च ये मताः यो
निमुद्रासने स्थित्वा मंत्रानेवंविधान्जपेत् तस्य सिद्ध्यंति ते मंत्रा नान्यस्य तु कथंचनेति अथ उक्तमंत्रोद्देशा।
श्चतल्लक्षणानि च शारदातिलकोक्तप्रकारेणालिख्यंते मंत्रविद्याविभागेन हि विधा मंत्रजातयः म।
घ्रा

त्राः पुंदेवता मंत्रा विद्याः स्त्रीदेवताः स्मृताः पुंस्त्रीनपुंसकात्मानो मंत्राः सर्वे समीरिताः पुंमंत्राः हुंफडंताः स्युः द्वि
ठांताः स्युः स्त्रियो मताः द्विठांताः स्वाहांताः नपुंसकोनमोंतास्तु इत्युक्ता मनवस्त्रिधा छिन्नादिदुष्टमंत्रास्ते पा
लयंति न साधकं छिन्नो रुद्धः शक्तिहीनः पराङ्मुखउदाहृतः वधिरो नेत्रहीनश्च कीलितस्तंभितस्तथा द
लिनश्च ग्धस्त्रस्तश्च भीतश्च मंतिरस्कृतः भेदितश्च सुषुप्तश्च मदोन्मत्तश्च मूर्छितः हृतवीर्यश्च भीमश्च प्रध्वस्तो बाल
कस्तथा कुमारश्च युवा प्रौढो वृद्धो निस्त्रिंशकस्तथा निर्वीजः सिद्धहीनश्च मंदः कूटस्तथा पुनः निरंशः स
प्र. सा. ग. त्वहीनश्च केकरो वीजहीनकः धूमितालिंगितौ स्यातां मोहितस्तु क्षुधार्त्तकः अतिदृप्तोंगहीनः स्यादति
सं क्रुद्धः समीरितः अतिक्रूरश्च सव्रीडः शांतमानस एव च स्थानभ्रष्टस्तु विकलः स्यातिवृद्धः प्रकीर्त्तितः निः
२ स्नेहः पीडितश्चापि वक्ष्याम्येषां च लक्षणं मनोर्यस्यादिमध्यांतेष्वानलं वीजमुच्यते संयुक्तं वा वियुक्तं
वा स्वराक्रांतं त्रिधा पुनः चतुर्द्धा पंचधा वाथ स मंत्रः छिन्नसंज्ञकः स्वराक्रांतं इति अघोरेभ्योथ घोरेभ्यो क्रं
घोर घोर तरेभ्यश्च ह्रूं सर्वतः शर्वसर्वेभ्यो ह्रैं नमस्ते अस्तु रुद्ररूपेभ्यो क्रौं इत्युदाहरणम् आदिमध्यावसाने
2 भूवीजद्वयलांछितः रुद्धो मंत्रः स विज्ञेयो भुक्तिमुक्तिविवर्जितः भूवीजं लकारः मायात्रि का
तत्वश्रीवीजराववहीनस्तु यो मनुः त्रितत्वं प्रणवः ह्रंकारो वा रावः फ्रेंकारः शक्तिहीनः स कथि
तो यस्य मध्येन विद्यते कामवीजं मुखे माया शिरस्यंकुशमेव वा अंकुशः क्रोंकारः असौ पराङ्
मुखः प्रोक्तो यो मंत्रो विंदुसंयुतः आद्यंतमध्येष्विंदुर्वा नभस्योद्बधिरो मनुः इंदुः सकारः पंचवर्णो म
न्युर्यः स्याद्रेफार्केंदुविवर्जितः नेत्रहीनः स विज्ञेयो दुःखशोकामयप्रदः आदिमध्यावसानेषु हंसः
प्रासादवाग्भवौ प्रासादो हौंकारः वाग्भवो ऐंकारः हकारो विंदुमान् जीवो एवं वापि चतुष्कलं जीवः सका
रः चतुष्कलं ह्रूंकारः मायानमामि च पदं नास्ति यस्मिन्स कीलितः एकं मध्ये द्वयं मूर्ध्नि यस्मिन्स प्रंदरो नवि रम
२

फट्काराणां पंचकं आदौ यस्मिन्निति वह्नीहिः यस्य मंत्रस्य फट्कारपंचकं भवति स मंत्रो मूर्छितः ८ = यस्य मंत्र विरामस्थानगं अंते फट्कारपंचकं स हृतवीर्यवान् = ८

यते स मंत्रः स्यात्स्तंभितः सिद्धिरोधकः अस्त्रं फट्कारः पुरंदरो लकारः वह्निर्वायुसमायुक्तो यस्य मंत्रस्य मूर्द्धनि
सप्तधा दृश्यते तं तु दग्धं मन्वीत मंत्रवित् अस्त्रं ह्राभ्यां त्रिभिः षड्भिरष्टभिर्दृश्यते दलैः त्रस्तः सोऽभिहितो यस्य मु
खे न प्रणवः स्थितः शिवो वा शक्तिरथवा भीताख्यः स प्रकीर्तितः आदिमध्यावसानेषु भवेन्मार्णचतुष्टयं
यस्य मंत्रस्य मलिनो मंत्रवित्तं विवर्जयेत् यस्य मध्ये दकारो वा क्रोधो वा मूर्धनि द्विजा क्रोधो हुंबीजं अस्त्र
तिष्ठति मंत्रस्तु तिरस्कृत उदीरितः हृदयं प्रमुखे शीर्षे वषड्हुं च मध्यमं यस्य स्याद्भेदितो मंत्रस्त्याज्यः सिद्धिमु
मुभिः प्रमुखे वा आदौ शीर्षं अंते वषट् अस्त्र मंत्र हुं मध्यतः मध्ये तथा ओं हुं वषट् त्रिवर्णो हंसहीनो यः सुषु हंसो हकार =
प्तः स उदाहृतः मंत्रो वाप्यथवा पिंडो वा विद्या सप्ताधिकदशाक्षरः फट्कारपंचकादिर्यो मदोन्मत्त इतीरितः
तद्वदस्त्रं स्थितं मध्ये यस्य मंत्रः स मूर्छितः विरामस्थानगं यस्य हृतवीर्यः स कथ्यते॥ पंचके त्वथापि मंत्रस्य
ते आदौ मध्ये तथा मूर्ध्नि चतुरस्त्रयुतो मनुः ज्ञातव्यो भीतरक्षेषयः स्यादष्टादशाक्षरः एकोनविंशाक्षरोऽपि
१ यो मंत्रस्ता सं युतः हलेखांकुशबीजाढ्यस्तेषु ध्वस्तः प्रचक्षते सप्तवर्णो मनुर्बालः कुमारोष्टाक्षरस्स्मृतः षोडशा
र्णो युवा प्रौढः चत्वारिंशल्लिपिर्मनुः त्रिंशदर्णश्चतुःषष्टिवर्णो मंत्रः शताक्षरः चतुःशताक्षरश्चापि वृद्ध इत्य
६= नमः भिधीयते नवाक्षरो ध्रुवयुतो मनुर्निस्त्रिंश ईरितः यस्यावसाने हृदयं शिरो मंत्रो च मध्यमः शिखा वा वर्म चन
स्यातां वौषट् फट्कार एव वा शिवशक्त्यर्णहीनो वा स निर्बीज इति स्मृतः एषु स्थानेषु फट्कारः षोढा यस्मि
न्दृश्यते स मनुः सिद्धिहीनः स्यान्मंदः पंक्त्यक्षरो मनुः पंक्तिशब्दो दशवाचकः कूट एकाक्षरो मंत्रः स एवोक्तो
निरंशकः द्विवर्णः सत्वहीनः स्याच्चतुर्वर्णस्तु केकरः षडक्षरो बीजहीनः सार्धसप्ताक्षरो मनुः सार्द्धद्वादशव
र्णो वा निंदितः सत्तथुमितः सार्द्धसप्तत्वादिरंते व्यंजनयोगनत्वं सार्द्धबीजत्रयस्तद्वदेकविंशतिवर्णकः।
विंशत्यर्णस्त्रिंशदर्णो यः स्यादालिंगितस्तु सः द्वात्रिंशदक्षरो मंत्रो मोहितः परिकीर्तितः चतुर्विंशतिवर्णो यः

चतुरधिकशताक्षराणि यस्मिन् सः केचित्तु चत्वारिंशत्त्रिः अक्षराणीति व्याचक्षते तन्न ग्रंथांतरविरोधात् त्रिंशदर्णशतार्णो वा चतुःषष्ट्यक्षरं तथा चतुरःश
तं वापि वृद्ध इत्यभिधीयते इति वचनात्

सप्तविंशतिवर्णकः तथार्त्तः सत्वविन्तेयो मंत्रो दारिद्र्यदायकः एकादशान्तरो वापि पंचविंशतिवर्णकः त्र
योविंशतिवर्णो वा मंत्रो दृप्त उदाहृतः षट्त्रिंशद्वर्णको मंत्रः षड्विंशद्वर्णकोपि वा त्रिंशदेकोनवर्णो वाप्यं
गहीनो विधीयते अष्टाविंशत्यक्षरो यः एकत्रिंशदथापि वा अतिक्रूरः समुदितो निंदितः सर्वकर्मसु चत्वा
रिंशत आरभ्य त्रिषष्टिर्यावदापतेत् तावत्संख्यो निगदिता मंत्राः सव्रीडसंज्ञकाः पंचषष्ट्यक्षरा ये स्युर्मंत्रास्ते
प्र॰सा॰ २४ शान्तमानसाः एकोनशतपर्यंतं पंचषष्ट्यक्षरादितः ये मंत्रास्ते निगदिताः स्थानभ्रष्टाह्वया बुधैः त्रयोदशाक्ष
मं रा ये स्युर्मंत्राः पंचदशाक्षराः विकलास्ते विधीयंते शतं सार्धशतं तथा शतद्वयं द्विनवति रिक्तहीनोथ वापि शत
२ शतत्रयं वापि न्मासंयानिः स्नेहस्नेहसमीरिताः चतुःशतान्यथारभ्य यावद्वर्णसहस्रकम् अतिवृद्धः प्रयोगेषु परित्या
ज्यः सदा बुधैः सहस्राण्यधिका मंत्रा दंडकाः पीडिताह्वयाः द्विसहस्राक्षरा मंत्राः खंडशः शतधाकृताः ज्ञातव्यास्ते
त्रिरूपास्ते मंत्रा एते यथास्थिताः तथा विज्ञाय बोद्धव्या मंत्रिभिः काम्यकर्मसु दोषानेतानविज्ञाय [illegible] मंत्रा
नुपूर्जेज्जडः सिद्धिर्न जायते तस्य कल्पकोटिशतैरपि द्वेपकाग्रंथ्योपि योगपतावशालिखते दग्ध [illegible] गो
ये॰ मंत्रस्तस्मात्स्यादग्निकैर्जपात् गर्वितस्त्वविधिपाठतः शत्रवो वैरिको दृष्टाः बालाश्च्युतरप्रायाद्वृद्धा गर्वान्वि
त्विताः निर्जिताः कर्मबाहुल्याद्धंसाः सत्ववर्जिताः खंडीभूतास्त्वशजापात् अंगहीनाः सर्वसंवृताः स्वान्तना
शिकाः अकालविनियोगेन मूर्छितास्त्वापगाजपात् मंत्राः पन्नेषु पठनात्स्युर्वर्णैस्तु कीलिताः रुद्धावि
संज्ञकाः प्राप्तः दुःखा वैरिसमन्विताः अपूर्णा नोपदिष्टा ये क्षीणवीर्यास्तु ते मताः सदाप्रयोगात् कुंठत्वं स्निग्ध॰
तानि विलंबिताः स्युर्गाः प्रलपनैर्जापात्स्युर्मंत्रैः सहाविलाः उपेक्षाः स्वस्यपाजापा द्वेषम्पाटवमानिताः पंच
विंशति रुद्दिष्टा दोषास्तानुपशमयेद्बुधः बंधनं योनियोनिमुद्रायां मंत्राणां वीर्ययोजनं अभयं बोधयन्नुद्रिष्टं राम
संरक्षेज्जुकरात्मवान् गरोर्लक्षणमेतावदादिमांत्यं तु वेदयेत् आदिमांत्यविहीनास्तु वर्णाः स्युः शब्दभ्रवत् २

तस्मादादित एवासौ ब्रूयात्तत्तदहंकृतिः यदहंकारवित्तानात्मतत्त्वमोजायते नरः अनादिक्रमसंसिद्धमा।
कौ॰ तद्ग्रहीत योजनात् तादात्म्यसिद्धिं तां विद्धि सर्वमंत्रार्थविग्रहम् इत्यादि द्विजातीनां नमस्कारं वेदोक्तं समुदा।
हृतं अन्येषामपि वर्णानां विद्यया समुपाचरेत् निधने विद्यया दाहो अन्यत्सर्वं समाचरेत् यथाशक्ति व
स्त्रालंकारादिभिः विद्यया विस्तरेत्मंत्री स्वविद्यया सिद्धिहेतवे साधकं संपूज्य भोजयेत् मंत्राणां दशका।
थ्यंते संस्काराः सिद्धिदायिनः जननं जीवनं पश्चात्ताडनं बोधनं तथा अथाभिषेको विमलीकरणाप्याय
ने ततः तर्पणं दीपनं गुप्तिर्दशैता मंत्रसंस्क्रियाः मंत्राणां मातृकामध्यादुद्धारो जननं स्मृतं मातृकाव
र्णान् तंडुलैर्विलिख्य तद्विधानेन संपूज्य तन्मध्यादभीष्टमंत्रवर्णपठनं मातृकामध्यादुद्धारः प्र[illegible]णवांतरि
तान् कृत्वा मंत्रवर्णान् जपेत्सुधीः एतज्जीवनमित्याहुः मंत्रशास्त्रविशारदाः मंत्रवर्णान्समालिख्य ताडये
च्चंदनांभसा प्रत्येकं वायुना मंत्री ताडनं तदुदाहृतम् विलिख्य मंत्रं तन्मंत्री प्रसूनैः करवीरजैः तन्मंत्रा
क्षरसंख्याकैर्हन्यात्तद्बोधनं स्मृतं भूर्जे कुंकुमादिना मंत्रं विलिख्य वह्निबीजेन करवीरपुष्पैः [illegible]
डयेत् एतद्बोधनमित्यर्थः स्वतंत्रोक्तविधानेन मंत्री मंत्राणसंख्यया अश्वत्थपल्लवैर्मंत्रमभिषिंचेत्तति
द्धये स्वतंत्रोक्तेति मंत्रांते अमुकं मंत्रमभिषिंचामि नम इत्यर्थः संचिन्त्य मनसा मंत्रं ज्योतिर्मंत्रेण निर्दहेत्
मंत्रे मलत्रयं मंत्री विमलीकरणं त्विदं आणवकार्मकमायिकं मलत्रयं तारव्योमाग्निमनुयुग्दंडज्योतिर्म
अग्निरितिरकारः॥ न्त्रमतः अत्र व्योमेति हकारः मनुरिति चतुर्दशस्वरः दंड अनुस्वारः मूलाधारे वह्निमंडले ज्योतिर्मंत्रेण तदुपरि
साध्यमंत्रं संचिंत्य ज्योतिर्मंत्रेण तेजसा दहेदिति कुशोदकेन जप्तेन प्रत्यर्णं प्रोक्षणं मनोः तेन मंत्रेण आ
प्यायेत् तदाप्यायनं मतं मंत्रेण वारिणा मंत्रतर्पणं तर्पणं स्मृतम् ताम्रपत्रे मंत्रं विलिख्य तन्मंत्रांते अमुकं मं
त्रं तर्पयामि नम इति तर्पयेत् तारमायारमायोगो मनोर्दीपनमुच्यते जप्यमानस्य मंत्रस्य गोपनं त्वप्रकाशनं

स्वर्णादिपात्रे संलिख्य मातृकायंत्रमुत्तमम् काश्मीरैश्चंदनेनापि भस्मना वा विलिखते का श्मीरं शक्तिसंस्कारे चन्दनं वैष्णवे मनो शैवे भस्मसमाख्यातं मातृकायंत्रलेखनं

व.ई.र:
मधुना प्राक्ति मंत्रं तु वैस्त्रवे चेन्दुमजलैः
शैवे तु तेन दुग्धेन तर्पणं सम्यगीरितम्

संस्कारादशसंप्रोक्ताः सर्वमंत्रेषु गोपिताः पुनरपि शिवगीतायामुक्तम् सर्वान्कामानवाप्नोति सर्वदः कंबला
सने कृष्णाजिने भवेन्मुक्तिः मोक्षः श्रीव्याघ्रचर्मणि कुशासने भवेज्ज्ञानमारोग्यं पत्रनिर्मिते प्राङ्मुखोदङ्मु
खो वापि जपध्यानं समाचरेत् पाषाणे दुःखमाप्नोति काष्ठे नानाविधान् गदान् वस्त्रासने यशमवाप्नोति भू
मौ मंत्रो न सिद्ध्यति अथ गारुडकल्पोक्तप्रकारेण आसननियमो लिख्यते धरण्यां सुखसंपत्तिर्दौर्भाग्यं काष्ठ
कासने तृणासने यशोहानिः पल्लवे चित्तविभ्रमः अभिचारादिके नीलं रक्तं वश्यादिकर्मणि, वंशासने दरिद्रः
स्यात्पाषाणे व्याधिपीडनम् तेर्भासने तपोवृद्धिः प्रजावृद्धिस्तु रत्नके गिरिगोष्ठपरिस्पंदनद्यारण्यप्रमु
दाः देशाः पुण्याः जपस्यैते पत्रवारोचतेमनः गृहे त्वेकगुणं जप्यं नद्यां तु द्विगुणं भवेत् गवां गोष्ठे शतगुणं
अग्न्यागारे शताधिकं सिद्धक्षेत्रेषु तीर्थेषु देवतायाश्च सन्निधौ सहस्रं शतकोटिः स्यादनंतं विष्णुसन्निधौ
मणिं मादित्यं ब्राह्मणं देवमंदिरं नदीं जलाशयं चैव वटवृक्षं जपेत्तत् इति विशिष्यमंत्रदेवताप्रकाशि
कायामुक्तम् सूर्यस्याग्नेर्गुरोरिंदोर्दीपस्य च जलस्य च विप्राणां च गवां चैव सन्निधौ शस्यते जपः एतेष्वके
ष्वासनेषु एकस्मिन्नेवासीनः स्वगुरुगणाधिपादीन्वंदेत् तत्प्रकार उच्यते ॐ स्वस्ति श्रीपरमशिवनाथपा।
दाद्यशेषगुरुपारंपर्यक्रमेण स्वगुरुनाथपादांबुजं यावत्तावत्प्रणौमि अथवा ब्रह्माद्यशेषगुरुपारंपर्यक्र।
मेण स्वगुरुनाथपादांबुजं यावत्तावत्प्रणौमि ॐ गुं गुरुभ्यो नमः इति मूर्ध्नि संवंद्य गं गुरुभ्यो नमः इति दक्षिणां
से गं गणपतये नमः इति वामांसे डुं दुर्गायै नमः इति वामोरुदेशे क्षं क्षेत्रपालाय नमः इति दक्षिणोरुदेशे स
रस्वत्यै नमः इति वक्त्रे पं परमात्मने नमः इति हृदये संवंद्य पुनर्वामहस्तेन तलेन दक्षिणहस्ते कूर्परदेशादारभ्य।
तलांतं सुदर्शनास्त्रमंत्रेण वैष्णवदेवताविषये शैवविषये तु पाशुपतास्त्रेण इतरविषये तु ब्रह्मास्त्रेण वि
न्यसेत् सुदर्शनास्त्रमंत्रस्तु सहस्रार हुं फट् इति पाशुपतास्त्रमंत्रस्तु वामदेव ऋषिः पंक्तिश्छंदः

प्र. सा. सं ५

रा. ५

दः पशुपतिर्देवता ॐ श्लीं पशुपतये हुं फट् इति ब्रह्मास्त्रमंत्रस्तु ॐ तपः समात्मने अस्त्राय फडिति कूर्परं
नाम मणिबंधादूर्ध्वदेशः मणिबंधो नाम हस्ततलस्य मूलदेशः पुनर्वामेपीतरेण हस्ततलेन तथैव कृत्वा पु
नर्वामहस्ततलेन दक्षिणहस्तस्यापरदेशे कूर्परस्यारभ्याग्रं तथैव तरस्यापीतरेण न्यस्त्वा पुनरपि ततएव वारंभ्य इत
रेतरेण हस्ततलेन इतरेतरस्य हस्तस्य सकलदेशाग्रितैने वास्त्रमंत्रेण न्यस्त्वा पुनर्हस्ततलयोः त्रोन्यसंहर्तिजध्वनि
त्रयेण तालत्रयाविनतैन वास्त्रमंत्रेण उपर्युपरिक्रमेण त्रिवारं कृत्वा पुनस्तेनैवास्त्रमंत्रेण पूर्वां दिशमारभ्या
पश्चादंतं क्रमेण दशदिग्बंधनमंगुष्ठतर्जन्यग्रोत्थितध्वनिः पूर्वकं कुर्यात् तेनैव मंत्रेण तथैव संयुक्तयांगुल्या
परितश्चाग्निप्राकारं ध्यानेन कुर्यात् तदुक्तं च सत्संप्रदायसर्वस्वाभिधानाख्ये प्रपंचसारविवरणे एभिर्दश
भिर्मंत्रैः दशसु दिक्षु तर्जन्यंगुष्ठछोटिकाभिरात्मनो रक्षां कुर्यादिति तत्र दिक्पालपूजाविषये प्रागाद्यूर्ध्वांत
दिक्क्रमः दिग्बंधने तु प्रागाद्यधस्तादंतमिति विशेषः तदुक्तं चास्मिन्नेव शास्त्रे सुदर्शनपटले ऐं ह्रीं
समारभ्य परिशिष्टं त्वधस्तादंतं प्रोक्ता चक्रेण बध्नामि नमस्त्योत्काचक्राय पशीर्षं च दिशां बंध इति प सदर्शन
क्रमदीपिकायामुक्तं च स्नातो निर्मलसूक्ष्मशुक्लवसनो धौतांघ्रिपाणाननः स्वाचांतः सपवित्रमुद्रितकरो धौ
८: तोर्ध्वपुंड्रोज्ज्वलः प्राचीदिग्वसनो निबध्य सुदृढं पद्मासनं स्वस्तिकं चासीनः स्वगुरुं गणाधिपमथो वंदेत ब
द्धांजलिः ततोस्त्रमंत्रेण विशोध्य पाणीं त्रितालदिग्बंधहुताशसालान् विधाय भूतात्मकमेतदंगं विशोध
येद्बुद्धिमतिः क्रमेणेति अथ तत्र सुदर्शनेन दिग्बंधने पदविशेष उच्यते ॐ नमः सुदर्शनायास्त्राय फडित्यनेन
मंत्रेण वा दशदिग्बंधनं कुर्यात् एवमपि संप्रदायोस्ति तदुक्तं च क्रमदीपिकायां प्रणवहृदंतेवसाने सचतुर्थि
सुदर्शनं चास्त्रकं च उल्काफडंतमनुनाकलयेत् मनुनास्त्रमुद्रया दशहरितः इति सुदर्शनेन चेदेवं वा दिग्बंध
नं कृत्वा पुनर्भूतशुद्धिं कुर्यात् तत्प्रकारस्तु क्रमदीपिकोक्तप्रकारेण कथ्यते इडावक्त्रापूरं संततगतिबीजंस

प्र·सा·
स
५

लवकं स्मरेत् एवं मंत्री सकलभुवनोद्भोषणकरं स्वकं देहं तेन प्रततवपुषा शुष्यं सकलं विशोष्य व्यामुंचेत्स
वनमथ मार्गेण व्यमणः तेनैव मार्गेण विलीनमारुतं बीजं विचिंत्यारुणमाग्नेयं लक्षणः आशुष्यं देहं परिदह्य
वामतो मुंचेत् समीरं सहभस्मना बहिः टपरमतीतशुभ्रममृतांशुपथेन विधुनयं तल्ललाटचंद्रमसस्ततः सक
लार्णमयी टपरं जपान्निपात्य रेचयेच्च तया सकलं वपुरस्तौ ग्रकृष्टिमथ वक्त्रकरायमिष्टम् अस्यार्थः
प्रथमं इडावक्त्रं वामनासिकाग्रमिडानाडीवक्त्रं तत्र वायुबीजं सतसु वर्कलवक मिति विंदुः तेन युक्तं पुनस्त
द्बीजं धूम्रवर्णं च धूम्रमिति नीललोहितमिश्रवर्णं तादृशं वायुबीजाख्यं यकारं सकलभुवनोद्भोषणकरं
स्मरेत् एवं स्मृत्वा प्रततवपुषा तेन वायुना स्वकं देहं वामनासिकामार्गेणा शुष्य सकलं दैहिकं द्रव्यं विशो
ष्य तं स्मृत्वा पुनः व्यमणोदादित्यस्य मार्गेण पिंगला नाडिकामार्गेण दक्षिणनासिकाश्वासमार्गेणेत्यर्थः
तेन मार्गेण तं शुष्कं शरीरं तं वायुं व्यामुंचेत् रेचयेदित्यर्थः पुनरपि तेनैव मार्गेण व्यमणो मार्गेण दक्षिणनासि
काश्वासमार्गेणेत्यर्थः तेन मार्गेण पूर्वं विसृष्टं मारुतमेव पश्चाद्विलीनमारुतं निवर्त्य यित्वा तत्रैव प्रविष्ट
मारुतं कृत्वा पुनरारुणशुशुक्षणोरग्नेर्बीजं सविंदुकरेफमित्यर्थः तद्बीजमरुणमव्यक्तरागस्वरूपमेतादृशमा
शुशुक्षणेर्बीजं च विलीनमारुतमिति क्रियाविशेषणं एवं दक्षिणनासिकाश्वासमार्गेण मारुतं विली
नं कृत्वा अरुणवर्णमग्निबीजं ध्यात्वा तं वायुमग्निबीजसहितमाशुष्यं शुष्यं परिशोषितं तं देहं सर्वं परिदग्धं सभा
व वामनासिकाश्वासमार्गेण वायुं तेन दग्धभस्मना सह व्यामुंचेत् पुनः टपरमिति टपरं विधुमिति समानाधि
करणे द्वितीये टपरश्चकारः तं विधुं सोमात्मकं शुभ्रवर्णं च ध्यात्वा अमृतांशुपथेन इडानाडीमार्गेण वामनासिकाश्वा
समार्गेणेत्यर्थः तेन मार्गेण मूलाधारं नीत्वा सुषुम्नाद्वारेण ललाटोपरि स्थितं दिन द्वादशांतस्थितमिंदुमंडलं संप्राप्य
तयोरुभयोः संबंधाच्चंद्रमंडलचालनात्ततो निःसृतामृतधारया तज्जसमुदात्प्लुतयैव मायाघं पुनरकारादि

राम
५

वर्णरूपयातया मलबद्धरूपं च शरीरादिकमुत्पादयामीत्यनुस्मरन् वमित्यमृतबीजं सप्रणवं चविंशद्वारं कुंभके
न संपाद्य देहकाठिन्यार्थं लंबीजं मूर्ध्नि विन्यसेत् तन्मातृकावर्णान् कानने कृते न त्वादिनाथस्मिन्नेव मातृकापट
लेउपरि वक्ष्यमाणक्रमेण न्यसेत् एवमिडावक्त्रेत्यादिना क्रोमभूतशुद्धिप्रकारः केवलमातृकान्यासेनैव वा
भूतशुद्धिं कुर्यात् अथवा प्रकारांतरेणापि स्वच्छंदागमोक्तप्रकारेण भूतशुद्धिं वक्ष्ये स्वदेहस्थ पृथिव्यादिभूत
बीजं ब्रह्मविष्णुभ्यामधिष्ठितं ओं रागद्वेषधर्माधर्ममोहमलं विद्याधिपतिपरिपालितं कलादितत्त्वसारं त।
न्मात्रेंद्रियशाखोपशाखं विषयालोचनपल्लवं भावप्रपंचकुसुमं बुद्ध्यध्यवसायसंकल्पफलं शुभाशुभो।
गोपभोगोपभोग्योपभोक्तृत्वरसं मूर्ध्वमूलमधःशाखं वृक्षरूपं संचिंत्य प्रथमं रकारेण निवृत्तिकलाबीजोच्चा
रं च केन पत्रपुष्पफलरहितं स्तब्धं विभाव्य शुष्ककापरकारेण प्रतिष्ठाकलाबीजस्य च तत्क्षोभोच्चारणेनापि
दग्धपत्रफलपुष्पोपेतं विचिंत्य कुंभकेन प्रथमापरार्द्ध्यां विद्याकलाबीजोच्चारणेन दग्धं संस्मृ
भाव्य रेचकः श्वबीजेन शांतिकलाबीजोच्चारहवेन भस्मीभूतं दग्धादिदग्धपत्रीनं विभाव्य रेचकापरार्द्धेन शां
त्यतीतकलाबीजैकोच्चारणेन शुद्धस्फटिकरूपं संचिंतयेत् ततो दग्धस्वरूपं सर्वं शून्यमिति विभाव्य वौषडंत
मूलेन शिखांतस्थाधोमुखपद्मस्रवदमृतधाराभिः सकलनाडीमुखप्रविष्टाभिः स्वबाह्याभ्यंतरं सर्वं कु
रीरमाप्लाव्य हृदयेनालपत्रकर्णिकारूपं पद्ममकारादिमात्रात्रयपुटेन प्रणवेन शुद्धं विद्यात्मकमास
नं विन्यस्य तत्कर्णिकायां पृथ्व्येकं च तत्कलेन प्रणवेनावतीर्णं भावयित्वा तस्मिन् द्वादशांतस्थबीजरू
पं शिवमयमात्मानं पंचकलेन प्रणवेन पूरकेणास्थापाससमानीय ज्योतीरूपं संस्थाप्य वौषडंतशाक्तिमंत्रो
च्चारेण द्रव्यपरिस्रुतनवकुंडलामृतप्रवाहेणाभिषिंचेत् ततो ह्रां मिति निवृत्तिकलाबीजं ह्रीं इति प्रतिष्ठा
कलाबीजं हूं हैं ह्रौं मिति विद्याशांतिशांत्यतीतकलाबीजानि क्रमेणाएवं रहस्यागमोक्तप्रकारम्

तत्त्वशुद्धिः अनेनप्रकारेणवाशर्वोक्तक्रमदीपिकोक्तप्रकारेणवाभूतशुद्धिंकृत्वापुनर्हकारत्रयमुच्चार्य्य
सुषुम्नानाडीमार्गेणनिरोधपूर्वकंपर्वत्रयमेतेनकृत्वाहंसस्समुच्चार्य्यमूलाधारस्थजीवंसुषुम्नयाद्वादशांतं
नयन्पुनःसोहमित्युच्चार्य्यद्वादशांतेसहस्रदलकमलमध्यस्थंसहस्रादित्यसंकाशंपरमात्मानंस्वा
त्मनाचैकीकृत्यपुनःप्राणायामंकुर्यात् तत्प्रकारउच्यते अकारंसबिंदुकंद्वादशवारमावर्त्तयन् दक्षि
णनासिकयाविरचय्यउकारंसबिंदुकंषोडशवारमावर्त्तयन् वामनासिकयाआपूर्य्यमकारपूर्वकंतत
प्र·सा· न्मूलमंत्रंद्वादशवारमावर्त्तयन्कुंभकंकुर्यात् एवंप्राणायामत्रयंकुर्यात् तदुक्तंचसम्मेलनगोपाल
सं· प्राणविधाने अमितिद्वादशवारंदक्षिणनासिकयाविरचय्य उमितिषोडशवारंवामनासिकयापूरयि
६ त्वामकारपूर्वकविन्यासहितमंत्रंद्वादशवारमावर्त्तयन् कुंभकंकुर्यात् अथवायंयंमंत्रंजपितुमिच्छ
तितेनतेनमंत्रेणप्राणायामेपंचचत्वारिंशाद्दितत्वसंख्ययाकेवलकुंभकरूपेणवा अथषोडशचतुर्वि
शद्वादिसंख्ययावाषोडशद्वात्रिंशत्ततःषष्ट्यादिसंख्ययावारेचकपूरककुंभकरूपेणकुर्यात् अथवाद्वा
रिविषयमंत्रजपेषुसर्वत्रमूलमंत्रेणैवप्राणायामः एतद्विषयेषुतत्तद्विधानोक्तेनप्रकारेणवाप्रणवेन
वाकुर्यात् एवंसर्वत्रसर्वमंत्रजपस्यपुरस्तस्यपरतस्त्रिवारंकुर्यात् एवंदिनशोधःषोडशसंख्यक
रोतिसत्समस्तपापात्परिशुध्यते अथवाकुलमंत्रेषुसर्वेषुकामबीजेनप्राणायामंकुर्या
त्॥ तत्रचतत्षष्टिवारंकुर्यात् गोपालकदशाक्षरीमंत्रेणचेद्दशाविंशतिवारंकुर्यात् गोपा
लकाष्टादशाक्षरीमंत्रेणचेद्द्वादशवारंकुर्यात् एतन्मंत्रेष्वद्वर्णानुरूपंकुर्यात् ॥तदुक्तंक्र
मदीपिकायाम् पवनसंयमनंत्वमुनाचरेद्यमिहजप्तुमभीप्समनुमिच्छति अथवाविलेख्यहरि राम
मंत्रजपविधिषुमूलमंत्रतःसंयमनंविमलधीः मरुतोविधिनाभ्यसेत्स्वरतत्त्वसंख्ययातोजपस्य ६

6

पतोविहितमयुतत्रितयं बुधैः षोडशपूर्वाह्णचरोहिनशः परिपूर्यते स खलु मासतोहम ॥ अथवांगतन्ममंत्र।
नास्तु संयमसकलेषु कृच्छ्रमनुजापकर्मसु सहितेकसप्तकृति ५ वारमभ्यसंस्तनु यात्समस्तदुरितापहा।
रिणां अष्टाविंशतिसंख्यामिष्टफलदं मंत्रं दशार्णजपत्रापछेत् पवनं स संयतमतिस्त्वष्टादशार्णेन चेत्
द्वादश अभ्यस्तत्रिवारमन्यमंत्रैभिर्वर्णानुरूपं जपन् कुर्यादिडेचकपूर्वकं सुनिपुणां प्राणप्रयाणं बुधः रेचयेन्मा।
रुतं दक्षिणोदक्षिणं पूरयेद्वाममध्यनाडीना पुनः धारयेदीरितं रेचकादित्रयं स्यात्कलादंतविद्योव्यमा
त्रात्मकं इति कनिष्ठानामिकांगुष्ठैर्यन्नासापुटधारणं प्राणायामः स विज्ञेयस्तर्जनीमध्यमे विना एवं
प्राणायामं कृत्वा तत्तज्जाप्यमंत्रं प्रतिलोमेनोच्चार्य स्वात्मानं तेजोरूपं ध्यात्वा तत्तेजः करतले दक्षिणना
सिकापुटमार्गेणानिपात्य करन्यासं कुर्यात् यत्र यत्र करन्यासमंत्रः पृथगनुक्तस्तत्र सर्वत्र तत्साध्यमंत्रा स्य
षडंगैः पंचांगैर्वा कुर्यात् तदुक्तं चास्मिन्नेव प्रपंचसारे अंगुलीषु क्रमादंगैरंगुष्ठादिषु विन्यसेत् कनिष्ठां
तास्तत्र द्वाह्ये तलयोः करयोः सुधीरिति अथ करन्यासप्रकार उच्यते उभाभ्यां कराभ्यां तत्तदंगुष्ठाभ्यां स
तत्र पंचांगपक्षे अंगुलीष्वेव विन्यसेत् षडंगपक्षे षष्ठो न्यासस्तावद्वामतलेन दक्षिणहस्ततले दक्षिणहस्त
तलेन वामहस्ततले न्यसेत् एवं करपृष्ठयोश्च तदुक्तं च सत्संप्रदायसर्वस्वाभिधाने प्रपंचसारविवरणे उ
ई भयोः करयोरंगुष्ठयोर्मूलाद्यग्रं तर्जनीभ्यां तर्जन्यादिकनिष्ठांतमंगुष्ठाभ्यां च पंचभिरंगमंत्रैः परामृश्य
पृष्ठतलयोश्च वामे दक्षिणेन दक्षिणे वामेन च विन्यसेदिति एवं कृत्वा पुनर्लिपिन्यासमुपरि मातृकाविधाने
वक्ष्यमाणक्रमेण कृत्वा ध्यात्वा जप्त्वा यथाशक्ति तदुपसंहृत्य पुनः साध्यमंत्रस्य ऋष्यादिपूर्वकं जपं चारभेज्जा
म वासमारभेत् अयमेव सर्वत्र नूतनं जपारंभे पूजारंभे च न्यायः अथ मातृकामंत्रस्य ब्रह्मा ऋषिः गायत्री छंदः
मातृका सरस्वती देवता तत्र ऋष्यादीनां स्थानान्यस्मिन्नेव शास्त्रे पंचमपटलादावुक्तानि ऋषिर्गुरुत्वाच्छि

ऽसेव धार्य्यश्छंदो तत्र स्यादृषिर्मांगं तस्मात् धियावगंतव्यतया मस्तके वहृदि प्रतिष्ठामनुदेवतायाः इति पुनरेषामर्थश्चा
तंत्रे वोक्तः ऋषिर्वर्णादिको धातुस्तो गत्यां प्रापणेपि च तान्प्यांय यृत्तस्तरूपं सत्त्वऋषिस्साकुरुवाचकः छुकारादाना
र्थको धातुस्तः छंदायश्च छंदिकः तयोरिच्छां ददातीति छंदो मंत्राणां वा च आत्मनो देवताभावप्रधानाद्देवते
ति च पदं समस्त मंत्रेषु विद्वद्भिः समुदीरितमिति एवमृष्यादीन् कृत्वा पुनः षडंगन्यासमवश्यं कर्त्तव्यानि कुर्यात्
मैथीदातिरणामर्त्तिकल्पेषु भक्तश्चेदवश्यकर्त्तव्यताराहित्यमुक्तं च अंगन्यासं विना वापि शिवभक्तस्य सि
ध्यति अंगमंत्रैर्विना वापि शिवभक्तस्य सिध्यति अंगमंत्रैर्विना वापि सिद्धसाध्यारिभिर्विना जपेन मंत्रः सर्वे
षां सर्वसिद्धिप्रदो भवेदिति अथ षडंगन्यासस्थानानि च तत्प्रकाराश्चोच्यंते हृदयशिरस्सो शिखायां कवचा
ख्येस्वेषु सचतुर्थीषु नमस्वाहा स्वाचवषट् हुं वौषट् फट् पदैः षडंगविधिः पंचैव यस्य मंत्रस्य भवंत्यंगानि म
त्रिणः सर्वेष्वपि च मंत्रेषु नेत्रलोपो विधीयते इति अथ मातृकामंत्रस्य षडंगविधिः अकखगघङ आंइहृ
दयाय नमः इचछजझञ ईशिरः उटठडढण ऊशिखा एतथदधन ऐकवचं ओपफबभम औनेत्रम् अंयर
लवशषसहलक्षः अस्त्रम् मातृकावर्णैरंगविधौ सर्वत्रैवमेव स्वराणां विंदुयुक्तं च हलांताद्धि
तं च स्वराणां मध्ये ऋकारादिवर्णचतुष्टयरहितं च स्वरान्तरं हं हृ युटितकादिवर्गं च कर्त्तव्यं तदुक्तं च आद्यं
तस्वरषट्कलब्धेपरयोरंतास्थितः कादिभिर्वर्गैर्यान्तगतैः क्रमेण कथिता न्यस्या षडंगानि चेदिति त
त्रांगन्यासमुद्राप्रकारः क्रमदीपिकोक्तप्रकारेणोच्यते अनंगुष्ठाऋजवो हस्तशाखा भवेन्मुद्रा हृदये शीर्ष
के च अधोमुखांगुष्ठा खलमुष्टिः शिखायां करद्वंद्वांगुलयो वर्मणीरिस्युः नाराचमुष्ट्युद्धृतबाहुयुग्मं कां
गुष्ठतर्जन्युदितो ध्वनिस्तु विष्वग्विमुक्तः कथितोस्त्रमुद्रा यत्रादृशा तर्जनीमध्यमे च पत्राद्दीणीत्युनेन
यत्र शाढ्हनपंचांगपदे नेत्रलोपः प्रागुक्तः सूचितः तत्र नाराचमुष्टिलक्षणमुच्यते हस्ततलद्वयमन्योन्यं

संमुखीकृत्यतयोर्मध्यमानामिकाकनिष्ठांगुलीर्मुष्टीकृत्य तर्जनीद्वयं तु ऋजूकृत्यान्योन्याग्रेण संस्पृश्यांगुष्ठ
द्वयं तु तथैव ऋजूकृत्यान्योन्यं संश्लिष्य ताभ्यामंगुष्ठतर्जनीद्वंद्वाभ्यामुदितो धेनुः स्वपरितो विषक्तः अस्त्रमु
द्रेत्यर्थः तत्रास्त्रमुद्रानंतरं नेत्रमुद्रोक्ता वैलवदेवताविषये सर्वत्र अस्त्रन्यासानंतरं नेत्रन्यास इति केषांचित्
तोऽस्त्रूचितः मंत्रदेवताप्रकाशिकायामप्यंगविधिरुक्तः त्रिद्व्येकं दशकं त्रिद्वि संख्याकांगुलीभिः क्रमात्
अस्यार्थः अंगुष्ठतर्जनीमध्यमायुक्तेनांगुलित्रयेण हृदयं अंगुष्ठतर्जनीभ्यां शिरः अंगुष्ठेन शिखा उभयक
रदशांगुलिभिः कवचं तर्जनीमध्यमानामिकात्रितयेन नेत्रं उभयकरांगुष्ठतर्जनीभ्यामस्त्रमिति अंगाना
मर्थस्तु हृदयं बुद्धिगम्यत्वात्पुरुणाम नमः स्यान्नमः पदं क्रियते हृदये नातो बुद्धिगम्या नमस्कृतिः तेजार्थः शिरसे
चेति विषयाहरणे द्विठः शिरोमंत्रेण चोक्तं गविषयाहृतिलक्षणा शिखा तेजः समुद्दिष्टा वषडित्यंगमु
च्यते तत्तेजो सा तनुः प्रोक्ता शिखामंत्रेण मंत्रिभिः कचग्रहनरत्यस्माज्ज्ञातोः कवचसंभवः हुंतेज स्तेज
सा देहो गृह्यते कवचं ततः अस्त्रज्ञौं दिक्कोधात्मंतेप चलनार्थको येनानिष्टं समादिष्य चालयेत्फडु
दाग्निना नेत्रं वौषट्‌ समुद्दिष्टा वौषट्‌ दर्शनमुच्यते दर्शनं हग्विषयेण स्यात्तत्तेजो नेत्रवाचमिति एवं
मंगन्यासं कृत्वा पुनर्वीजशक्त्यादीनि स्मरेत् यत्रयत्र वीजशक्तीष्टप्यगनुक्ते तत्र सर्वत्र प्रणवो वीजं भुव
नेश्वरी शक्तिरित्याचार्याभिप्राय इति वर्णयंति तदुक्तंच प्रपंचसारटीकाकारेण अनुक्त वीजशक्ति
विशेषाणां मंत्राणां प्रणवो वीजं भ्रूतिः शक्तिरिति विवरणकारैस्तु तत्रोक्तानिच अत्रतु हमिति
वीजम् स इति शक्तिः वीजशक्तिकीलकैस्तु मनयोर्हंपोईदिचन्यसेत् केवलं मनसा स्मरेद्वाअष्टोत्तर
वारं जपेद्वा तत्र गोपालविषये तु क्वचित्क्वचित्किंचिदधिकानि संति क्लीं वीजं स्वाहा शक्तिरिति म
नयोः जं कीलकं वं वीजं एतद्वयं हृदयं हंसः प्रकृतिरिति नाम्नो दुर्गाधिष्ठात्री देवता विमृशभिमानि।

सान

नीदेवता एतद्धृदये हृदि न्यसेत् सर्वमंत्रस्यापि प्रकृतिर्देवता अधिष्ठात्रीदेवता अभिमानिनीदेवता चे
ति देवतात्रैविध्यमस्ति यथा गायत्रीमंत्रस्य सूर्योस्य नारायणोस्य शक्तिरस्य एवं सर्वत्रानुक्तस्य
ले गुरुमुखाद्देवता ज्ञेयम् ॥ मंत्रदेवताप्रकाशिकायामुक्तं बीजं शक्तिं च मूलाधारे न्यसेत् सकल पु०
मंत्रेषु ब्रह्म बीजं माया शक्तिः जीवो बीजम् बुद्धिः शक्तिः उदानो बीजं सुषुम्ना नाडी सरस्वती शक्तिरिति ॥
मूलाधारे न्यसेत् तत्र ब्रह्ममायाशब्दाभ्यां प्रणवहल्लेखार्थभूते परब्रह्ममूलप्रकृती उच्येते जीवबुद्धिश
प्र·सा· सं· ८ ब्दाभ्यां सर्वकारणभूतब्रह्ममाययोर्जीनभागा उच्येते उदानसुषुम्नानाडीशब्दाभ्यां ब्रह्ममाययोः प्रवर्तकभावो गो.
उच्येते एवं सत्य शबलितयोर्ब्रह्ममाययोः सर्वत्र प्रपंचकारणत्वं प्रणवहल्लेखयोः समस्तमंत्रबीजशक्तिकार
णत्वं चोक्तं भवति तस्मात्समस्तमंत्रानुस्यूतशब्दब्रह्मात्ममातृकामंत्रावगाहि प्रणवहृल्लेखावाच्यताप्रकाशि
तं ब्रह्मस्वरूपप्रत्यगात्मभूतं वा उमाविवित्तप्रकाशात् समस्तांगसहितसर्वदेवतामंत्रमूर्जयः सा
8 गपवशात् प्रज्वलिताग्निविस्फुलिंगा इव प्रादुर्भूता इति भावयेत् अनंतरं तथाविधाभीष्टदेवतामंत्रैर्न्त
रेअंतर्बहिश्च व्याप्नोतीति चिंतयेत् पंचाशद्वर्णभेदैर्विहितवदनदोःपादयुक्कुक्षिवक्षोदेशां भास्वत्कपर्दाक
लितशशिकलामिंदुकुंदावदातां अक्षस्रक्कुंभचिंतालिखितवरकरां त्रीक्षणां पद्मसंस्थां अच्छाकल्पाम
तुच्छस्तनजघनभरां भारतीं तां नमामि तत्राक्षस्रक्कलशमाला ॐ भः ... ॐ भः चिंतेति ज्ञानमुद्रा लिखि
तं पुस्तकं तत्र दक्षिणांगुष्ठतर्जन्योरन्योन्याग्रसंस्पर्शो नपराभिमुखप्रदर्शनम् ज्ञानमुद्रेति कीर्तिते पुनरेवं ध्या
त्वा त्रिंशत्पटले वक्ष्यमाणविधानेन वक्ष्यमाणप्रकारेण प्राणप्रतिष्ठां कृत्वा मांसपूजां पंचोपचारैः कुर्यात् तत्प्रका राम
र उच्यते प्रथमम भयकरांगुष्ठाग्रेण अभयकनिष्ठयोर्मध्यमपर्वणोः स्पर्शनपूर्वकं ॐ गंधं कल्पयामी त्युक्त्वा ८
गंधोपचारं समर्पयेत् पुनस्तथैव तर्जन्यग्रद्वयेनांगुष्ठद्वयमध्यदेश संस्पर्शने कं ॐ पुष्पं कल्पयामीति पुष्पम्

स्पर्वकं^

द्या पुष्पोपचारं समर्पयेत् पुनरितराः प्रतितत्त्वं मुकुलीकृतानामादिषु अङ्गुष्ठाग्रेण मध्यमपर्वदेशसंस्पर्शी
नपूर्वकमेव गंधपुष्पदीपनैवेद्यमुद्राः क्रमेण तत्तन्नाम्ना पूर्वं देवस्य समर्पयेत् एवमेव सर्वत्र मानसपूजाप्रका
रः तत्क्रमदीपिकायां स्पष्टं चैतत् च ततो नैवेद्यमुद्रिकां प्रधानया कनिष्ठया स्पृष्टान्नानामिकां नितरां मनुं जपन्
प्रदर्शयेदिति प्रधानया अंगुष्ठेन तत्र तु केवलं नैवेद्यमुद्रामात्रं प्रदर्शितं अयमेव न्यायस्तरमुद्रिकाणा
मपि द्रष्टव्यः अथवा कल्पांतरोक्तप्रकारेण गंधाद्युपचारमंत्रः लं पृथिव्यात्मने नारायणाय मन्तं गंधं क
ल्पयामि हं आकाशात्मने वासुदेवाय ब्रह्म पुष्पं कल्पयामि यं वाय्वात्मने संकर्षणाय धूपं कल्पयामि
रं अग्न्यात्मने प्रद्युम्नाय दीपं कल्पयामि वं अवात्मने अनिरुद्धाय अन्नं दं नैवेद्यं कल्पयामि एवं एभि
र्मंत्रैः पूर्वोक्तमुद्राप्रकारेण मानसपूजां कुर्यात् एवं स्वहृदये देवतां ध्यात्वा तत्र मानसपूजां कृत्वा मातृ
कासरस्वतीमंत्रं पूर्वं सेवापुरःसरं लक्षसंख्यं जपेत् न्यासे तु तावत्संख्यं पुरश्चरणार्थं अकारादिक्षा:
न्तकारांतावर्णमातृसरस्वतीमंत्रः तत्र पूर्वं सेवेति सर्वेषां मंत्राणां पुरश्चर्यायाः प्रागेव तदधिकारसि
द्ध्यर्थं एतावत्संख्यं जप्तव्यमित्यस्ति नियमः तावत्तत्तद्विधानोक्तसंख्यापा पूर्वं जप्त्वा पश्चाद्यथाविधि पु
रश्चर्यां कुर्यादित्यर्थः तत्स्वरूपं वक्ष्यति चास्मिन्नेवग्रंथे पंचसारे वक्ष्यमाणेन त्रिंह विधाने द्वात्रिंशत्सहस्रैर
धिकृतिरपुतैर्भवेत् पुरश्चरणं तावद्विलोविलक्षैः सिद्धिः समीहितास्यमानोरिति क्रमदीपिकाया
मप्येवमेवोक्तमष्टादशाक्षरी विधाने दशाक्षरी विधाने च तेनानुज्ञाता पूर्वं सेवा द्वितीये मासे द्वादशमामा
रभेतामलायां प्रजपेदयुतं च तदर्धं दशाक्षरं मनुवरं षष्ठक्रमप्राः अष्टादशाक्षरं चेदयुतं तद्वितयमितुदीरि
तां संख्येति पुनरपि तत्रैवोक्तं एकं वैषामशक्तो गदितमिह मया पूर्वसेवाविधानं निर्दिष्टे तस्मिन्नु पुनरप्य
जपत्तु विधिवत्सिद्धये साधकेंद्र इति तत्र द्वितीयमासीति प्रथमे मासि दीक्षां कृत्वा पश्चाद्द्वितीये मासि जा

प्यादिरित्यर्थः तत्र एकं वैषामभ्यक्षाविति एतेषां पदानामस्मिन्नर्थे अन्वयो नास्ति पूर्वैरेवान्वयः तत्र पूर्वमेवासंख्याय
त्रनोक्ता तत्र सर्वत्र सहस्रसंख्यया कर्तव्यमिति संप्रदायः तदुक्तं च मेधादक्षिणामूर्तिकल्पे संख्यानुक्तेः सहस्रं स्यात्
मानुक्तेर्घृतं तथा समिधोनुक्तविषये पालाशाः परिकीर्तिता इति तत्र शिवभक्तश्चेत् पूर्वसेवापेक्षा नियमो
मो नास्ति तदुक्तं चिदंबरकल्पे पूर्वसेवां विनाप्यपि शिवभक्तस्य सिध्यतीति इति अथास्य मातृकामंत्रस्य
अ॰मा॰ नाम॰ दारन्यासस्थानान्युच्यन्ते कोनं नवेत्र हृदि स्मृति नेगोडेष्ट दर्नेमध्यासे दोःपत्संध्यग्रेषु च पार्श्वे हृदयपृष्ठ
सं॰ वाम नाभिजठरेषु हृद्दोर्मूलापरगलकक्षेषु हृदादिपाणिपादयुग्मे जठराननयोर्व्यापकेसंज्ञान्न्यसेद् यथान्या
दोर्मूल नुक्रमशः तत्र पादयोर्व्यापकान्तराणि तानि तु हृदयादारभ्यैव तत्र उक्तस्थानपर्यन्तं व्यापकरूपेणैव न्यसे
त् तदुक्तं च क्रमदीपिकायाम् हृदयपूर्वमनेन यथान्वहं न्यसतु शुद्धकलेवरसिद्धय इति तत्र हृदोर्मू
लापरगलककक्षेषु स्वत्रक्रदीपिकामते कक्षेककुदि दोर्मूल इति दक्षिणकक्षे वामे तु दोर्मूले वामकक्ष
9
इति विशेषः एवं सृष्टिन्यासः एतद्विपरीतस्थानक्रमेण मंत्रप्रतिलोमेन संहारन्यासः पुनर्हृदयस्थल
स्थानमारभ्य हल्भिरनुलोमन्यासरीत्या न्यस्त्वा पश्चात्स्वरैः शीर्षादिस्थानेषु न्यसेत् एवं स्थितिन्या
सः तत्र सृष्टिन्यासे शुद्धमातृकायां न्यसेत् संहारे तु सविंदुकमातृकायां स्थितिन्यासे तु विसर्जनीयां
तैर्वर्णैर्न्यसेदितिपोषः अथ गुरुमुखोत्सकलमंत्रोपदेशाविधिं वक्ष्ये ॥ तत्र प्रथमं सपदेशार्थमास
नियमं चिदंबरकल्पोक्तप्रकारेण वक्ष्ये ॥ तत्र मित्रारिशोधनम् क्वचित्क्वचिन्मंत्रप्रधानभाववशान्मा
स्तथापि मासशोधनम् अवश्यं कर्तव्यम् तदुक्तं चिदंबरकल्पे पंचाक्षरस्य मंत्रस्य नैव मित्रारिशोध
नम् तथाप्यवश्यकर्तव्यं मासशोधनमादरादिति अतो मासनियमोऽच्यते असिद्धिर्मेषे मिथुने मृतिर्मरणं राम
वंधुनाशनम् शुभप्राप्तिः स्यानना पाशः संपत्ती रत्नसंपदः ज्ञानप्राप्तिर्ज्ञाननाशः अमोघार्थी वशीकृ ९

दि४

तिः एवं चैत्रमासानां फलान्याहुर्मनीषिणः सोमवारे शुक्रवारे स्वसंपत्क्षेमसाधके मैत्रेयं परमं मैत्रे
वा मंत्रदीक्षां समाचरेदिति एवमुक्तेषु शुभेषु मासेषूपदेशं कुर्यात् मेषे प्रतापवान् भूयात् वृषभे तु
सुखी भवेत् मिथुने रिक्तहस्तः स्यात्कर्कटे दुःखवान्भवेत् सिंहे सर्वसमृद्धिः स्यात्कन्यायां तत्क्षणा
संक ल्लभेत् तुलायां लाभवान्भूयात् वृश्चिके कर्कटं भवेत् धनुर्मासे तु सौभाग्यं मकरे धनवान्भवेत् ॥
कुंभे स्यादायुषो वृद्धिर्मीने स्याद्राजवल्लभः इत्यादि मासानालोच्य वदेन्मंत्रं विचक्षणः अथोपदेशार्थं
तिथिवारनक्षत्रादिनियमो लिख्यते अश्विनी रोहिणी चार्द्रा तथा पुष्योत्तरात्रयम् हस्तचित्रा स्वा
ति मैत्रं विशाखा च धनिष्ठिका पुनर्वसू रेवती च प्रशस्ता मंत्रसंग्रहे मैत्रमित्यनुराधा पौर्णिमा पंचमी
चैव द्वितीया सप्तमी तथा त्रयोदशी च दशमी प्रशस्ता मंत्रविग्रहे तृतीया विहिता नित्यं षष्ठी सर्वत्र गा
र्हिता रवौ गुरौ बुधे शुक्रे कर्तव्यं परमेश्वरि मंत्राद्यारंभणं मेषे धनधान्यप्रदं भवेत् वृषे मरणमाप्नोति
मिथुने पत्यनाशनं कर्कटे सर्वसिद्धिः स्यात्सिंहे मेधाविनाशनं कन्या लक्ष्मीप्रदा नित्यं तुलायां सर्वसिद्ध
यः वृश्चिके सर्वसिद्धिः स्याद्धनुर्ज्ञानविनाशनम् मकरः पुत्रदः प्रोक्तः कुंभो धनसमृद्धिदः मीनो दुःख
प्रदो नित्यमेवं राशिफलं प्रिये योगाश्च प्रीतिरायुष्मान्सौभाग्यः शोभनः शुभः सुकर्मा च धृतिर्वृद्धिर्ध्रुव
सर्वश्च हर्षणः वरीयांश्च शिवः सिद्धिर्ब्रह्मा चैंद्रश्च षोडश इति शुक्लपक्षे प्रकुर्वीत कृष्णे वा देशिकोत्तमः
शुक्ले सर्वसमृद्धिः स्यात्कृष्णे मध्यमतो भवेत् द्वादश्यामपि कर्तव्यं त्रयोदश्यामथापि च महाभवचतुर्द
श्यामुपरागेषु च द्वयोः दद्यन्मंत्रं भवेन्मंत्री दरिद्रः सप्तजन्मसु धर्मदः प्रातःकालः स्यात्संगवो राज्यदः स्मृतः म
ध्याह्ने सर्वसिद्धिः स्यात्सायाह्ने मध्यमो भवेत् रजनीमंत्रदाने तु निषिद्धो देशिकोत्तमैः सूर्यग्रहणकाले तु ना

स्यदन्वेषितं भवेत् मलमासं विवर्जयेत् इति अथ मंत्रदेवताप्रकाशिकोक्तप्रकारेण मासादिनियमो लिख्यते
तत्र मासफलानि ज्ञात्वा शुभकाले दीक्षा कर्तव्या अस्ति हि र्भूमिसंपत्तिर्मरणं वंधुनाशनं आयुर्वृद्धिः प्रज्ञाना
शः संपदो ज्ञानसंपदः शुभप्राप्तिः प्राणनाशो श्रमो वाच्यो वशीकृतिः एवं चैत्रादिमासानां फलान्याहुर्मनीषिणः
तत्रादौ गुरुमंत्राणां शिष्यस्य नक्षत्रादिकोष्ठानां फलं परीक्ष्य दीक्षां कुर्यात् तत्र नक्षत्रपरीक्षा राज्यलाभोपका
८= रायप्रारम्पारीद्वरः ऊरु गोपालककुटीप्रायाकुलाविलुप्टिता लिपिः नक्षत्रेषु क्रमाद्योज्या संख्या द्वौ रेव
प्रस्ता· तीयुतौ अस्यार्थः रेवतीनक्षत्रयुक्तौ भवतः राइति द्वयम् ज्यइत्येकम् लाइति त्रीणि भोइति चतुष्टयम्
मं· पइत्येकम् काइत्येकं राइति द्वयम् पइत्येकं प्राइति द्वयम् रइति द्वयम् भाइत्येकं रीइति द्वयम् द्वइति
१० ऊ= द्वयं रइति द्वयम् ऊइत्येकं ऊंइति द्वयम् गोइति त्रीणि पाइत्येकं लइति त्रीणि कइत्येकम् कुइत्येकं
टीइत्येकम् प्राइति द्वयं याइत्येकम् कुइति द्वयं लाइति त्रीणि वइति चतुष्टयम् ॥ एतदुक्तं भवति अ
आ अश्विनी इ भरणी ईउऊ कृत्तिका ऋॠऌॡ रोहिणी ए मृगशीर्षं ऐ आर्द्रा ओऔ पुनर्वसुः क पुष्यं
खग अश्लेषा घङ मघा च पूर्वाफाल्गुनी छज उत्तराफाल्गुनी झञ हस्तः टठ चित्रा ड स्वाती ढण विशा
खा तथद अनुराधा ध ज्येष्ठा नपफ मूलं ब पूर्वाषाढा भ उत्तराषाढा म श्रवणं यर धनिष्ठा ल शतभि·
षा वश पूर्वाभाद्रपदा षसह उत्तराभाद्रपदा ळक्षअंअः रेवती इत्येवमक्षरेषु नक्षत्राणि ज्ञात्वा मंत्राद्यक्षरेणात्मनामा
द्यक्षरायानुकूल्यं ज्ञातव्यं जन्मसंपद्विपत्क्षेमप्रत्यरिः साधको वधः मैत्रं परममैत्रं च नवैतानि पुनः इति नक्षत्रयुक्तानि पुनः
ज्ञातव्यानि अथ राशिपरीक्षा वेलागरुखरः शोणः शर्मणो वतिभेदितः लिप्यणी राशिषु ज्ञेया षष्टेशांदीप्रयोजयेत् अ मम
स्यार्थः वेइति चतुष्टयं लाइति त्रीणि गइति त्री· रुइति द्वयं खइति द्वयं रइति द्वयं शोइति पंच णइति पंच शाइति पंच मंइ १०

तिर्यंच णो इति पंच वे इति चत्वारि एतदुक्तं भवति अ आ इ ई मेषः उ ऊ ऋ ॠ इति वृषः ऌ ॡ इति मिथुने ॥
ए ऐ कर्कटकम् ओ औ सिंह अं अः शषसहलक्षा कन्या कवर्गस्तुला चवर्गो वृश्चिकः टवर्गो धनुः तव
र्गो मकारः पवर्गो कुंभः यरलवा मीन एकपंचनववंधुरक्षकाद्वेचषष्टदशमास्तु सेवकाः त्रीणि रुद्रगणा।
सप्तत्रोषकाद्वादशाष्टचतुरस्तु घातकाः जपेन बंधु सिद्धः साध्यस्सेवया च समेवकः मंत्रः सपोषको ज्ञानात्।
घातयेतस्य घातकः एवमत्तो राशि ज्ञात्वा फलानि ज्ञातव्या अथ भूतरूपरीक्षा अ इ उ ऋ ऌ पंचवर्णाः नि
क्रमेण वायु अग्नि भूमि जलाकाशात्मकास्तथा आ ई ऊ ॠ ॡ पंचवर्णास्तथा ए ऐ ओ औ अं इति पंचवर्णा
स्तथा कचटतप पंचवर्गाश्च यरलवश पंचवर्णाश्च षक्षलसह पंचवर्णाश्च वायु अग्नि भूमि जलाका
शात्मका भवंति तदुक्तं ह्रस्वाः पंचपरेण संधि विकृताः पंचाथ विंदुतिकाः काद्याश्चाणाङ्कुताशभूपवर्गे खम पञ्चोवर्गाः
पा या द्याः शवर्णांतिकाः होतांषलक्षसाः क्रमेण कथिताभूतात्मकास्ते एवकु तैस्तैः पंचभिर् कवेमयाजलाकाश मयाः =
ख्या: = कैः स्युः स्तंभनाद्याः क्रियाः इति साधकादीनां पूर्वं मंत्रस्थापितदत्तरम् यद्येकभूतदैवत्यं नानीयात्स्व कुलं
हितं पार्थिवारुणं (वायुधे) मित्रमाग्नेयमाप्यमारुतम् माहेंद्रवारुणानां च शत्रुत्वे मारुतः स्थितः आग्नेयवा
रुणं शत्रुर्वारुणौ तैजसं तथा एतेषामेव सर्वेषां सामान्यत्वेन नाम सं मातृवन्मंत्रविद्यानाम विरोधे सम
स्थितं एवं पंचभूतवलं ज्ञेयं ॥ अथ सिद्धसाध्यसुसिद्धारिपरीक्षार्थं कोष्ठोद्धारक्रमः कथ्यते तत्र चतुष्क
दयुक्त कोष्ठचतुष्कं कृत्वा तत्र कोष्ठचतुष्टयाद्यपदेषु चतुर्ष्व दक्षिणक्रमेण अकारादि स्वरचतुष्टयं वि
लिखेत् द्वितीयेषु उकारादि तृतीयेषु ऌकारादि चतुर्थेषु ओकारादि विलिखेत् अवशिष्टानपि तथा एव
मुक्तप्रागदक्षिणक्रमेण ककारादि नकारांतान् षोडशवर्णान् विलिख्य पुनस्तेनैव क्रमेण पकारादि स
कारांतान् षोडशवर्णांश्च विलिख्य हलन्त पवशिष्टवर्णत्रयं प्रोक्तक्रमेण प्रथम द्वितीय तृतीय कोष्ठादिष

सिद्धः अकपह	साध्यः आखद	सुसिद्धः इगध	अरिः ईघन
साध्यः उङ·पल	सुसिद्धः ऊचफ	अरिः ऋछब	सिद्धः ॠजभ
सुसिद्धः ऌझमल	अरिः ॡञय	सिद्धः एटर	साध्यः ऐठल
अरिः ओडव	सिद्धः औढश	साध्यः अंणष	सुसिद्धः अःतस

देशविलिखेत् तत्रकोष्ठचतुष्टयेस्वनामाद्यवर्णोयत्रकोष्ठेतिष्ठतितत्कोष्ठमादिंकृत्वाप्रदक्षिणक्रमेणसिद्ध
साध्यसुसिद्धारीन्कल्पयेत् द्वितीयकोष्ठचतुष्टयेष्वपिस्वनामादिवर्णोयोगोपदसमसंख्याकंपदमादिंकृत्वा
क्रमेणसाध्यपूर्वकंसिद्धादिचतुष्टयंकल्पयेत् एवंतृतीयकोष्ठपदचतुष्टयेष्वपितथाविधमादिंकृत्वा
प्र॰सा॰ सुसिद्धपूर्वकसिद्धादिचतुष्टयंकल्पयेत् तथाचतुर्थकोष्ठचतुष्टयेष्वपितथाविधमादिंकृत्वाअरिपूर्व दि
सं॰ कसिद्धादिचतुष्टयंकल्पयेत् एतेषुषोडशस्थानेषुमध्येमंत्राद्यवर्णोयत्कोष्ठपदेतिष्ठतितत्कोष्ठपदेतन्ना
१२ मांकितःसमंत्रोभवति एतत्कोष्ठगतफलमुच्यते सिद्धःसिध्यतिकालेनसाध्यःसिध्यतिवानवा सुसिद्ध
स्तत्क्षणादेवअरिर्मूलंनिकृंतति सिद्धसिद्धोयथोक्तस्तुद्विगुणात्सिद्धसाधकः सिद्धसुसिद्धोर्धजपा
त्सिद्धारिर्हंतिगोत्रजान् साध्यसिद्धोद्विगुणतःसाध्यसाध्योनिरर्थकः साध्यसुसिद्धोर्धजपात्साध्यारि
र्हंतिगोत्रजान् सुसिद्धःसिद्धोर्धजपात्साध्यःसाधिकाज्जपात् ग्रहणात्सुसिद्धस्तुतदरिर्ज्ञातिनाशनः
अरिसिद्धःसुतंहन्यादरिसाध्यस्तुकन्यकां पत्नीमरिसुसिद्धःस्यात्शत्रुःशत्रुर्यथात्महा उष्टदोषाभिमती
ये॰ रिवर्णप्रचुरंमंत्रकं सम्यक्परीक्षितंयत्नात्तद्वर्जंन्मतिमान्नरः आदौसिद्धस्तथांतेचसर्वसिद्धिफलप्रदः
दा॰ आदावंतेभवेत्साध्यःकृच्छ्रसाध्यउदाहृतः आदावंतेसुसिद्धस्तुक्षिप्रमेवप्रसिद्ध्यति आदावंतेरिपुर्यस्तुसाकं
स॰ [illegible] निकृंतयेत् आदौसिद्धांत्यसाध्योयोद्विगुणेनैसिध्यति आदौसाध्यःसुसिद्धांतेप्रोक्तमार्गेणसिध्यति सुसिद्धादिस्तु
साध्यांतस्त्वनुक्रमेणमेपद्यते आद्यंतयोर्यदासिद्धोमध्येसाध्यःप्रजायते आद्यंतयोर्यदासाध्योमध्येसिद्धःप्रजायते ताबुभौसा
ध्यसिद्धौद्विजपाधिकेनसिध्यतः आदौसिद्धेनसंयुक्तःसुसिद्धेनततथांततः श्रवणादेवसिध्येतसाधकस्यनसंशयः सिद्धां राम
तरितसाध्यस्तुसुसिद्धांतरितोथवा पीडांसिध्यतिमंत्रोवैयथोक्तंमंत्रविग्रहैः सिद्धांतरितःशत्रुःसुसिद्धेनापिवेद्धवेत् नासौरिपुर्भ ११
वेन्मंत्रःकिंतक्षा

क्लेशेन सिध्यति साध्येनां तरितः सिद्धः स सिद्धोपि तथा यदि सिध्यत्यतीवकष्टेन साधकस्य न चान्यथा।
रिपुर्णां तरितं सिद्धं स सिद्धं च तथा त्यजेत् रिपुर्णां तरितो मंत्रो नैव ग्राह्यः कदाचन ॥ नाम्नाक्षरं समारभ्य या
वन्मंत्रादिदर्शनं त्रिधाकृत्वाक्षरैर्हत्वा तद्वद्विपरीतकम् कृत्वाधिकोक्षराणि तेयक्षराणि चेन्मंत्र उत्तमः
स्वयमृणी चेत्तन्मंत्रं त्यजेत्सर्वक्षराणीयतः त्रिभिर्गुणित्वा सप्तभिर्हरेत् तद्विपरीतैं सप्तभिर्गुणित्वात्रि।
७प्र भिर्हरेदित्यर्थः तत्र शर्मप्रसिद्धनाम्नोर्मध्ये किं वा ग्राह्यमित्याकांक्षायां कल्पांतरे प्रोक्तम् प्रसिद्धनामग्रहणी
यात्मलोपेन च नागृह्यादिति तत्रापवाद उच्यते प्रणवस्यन्तरीमायायोमव्यापी वउत्तरः प्रसादो वह्निरूपी च।
समसाधारणाः स्मृताः सौरमंत्राश्च ये पिसर्वैसवानारसिंहकाः सिद्धसाध्यसुसिद्धारि विचारपरिवर्जिताः
नृसिंहार्कवराहाणां प्रासादप्रणवस्य च सपिंडाक्षरमंत्राणां सिद्धादीन्नैव शोधयेत् एकाक्षरस्य मंत्रस्य मा
यामंत्रस्य पार्वति वैदिकस्य च मंत्रस्य सिद्धादीन्नैव शोधयेत् हंसस्याष्टाक्षरस्यापि तथा पंचाक्षरस्य च छिन्नं जपस्य
मंत्रस्य त्रिपादतस्य चैव हि नपुंसकस्य मंत्रस्य सिद्धादीन्नैव शोधयेत् एकद्वित्र्यादिवीजस्य सिद्धादीन्नैव शोधये
त् अकारादिक्षकारांतैर्विंदुमन्मातृकाक्षरैः अनुलोमविलोमस्थैः क्लृप्तया वर्णमालया प्रत्येकं वर्णसंयुक्ताः
जप्ताः स्युः सर्वसिद्धिदाः वैरमंत्रा अपि नृणां मन्ये मंत्राश्च किंपुनः मंत्रादिषु च सर्वेषु हृल्लेखां कामवीजकं श्री
वीजं वापि निक्षिप्य जपेन्मंत्रविशुद्धये तारसंपुटितो वापि दुष्टमंत्रोपि सिध्यति स्त्रीपुंनपुंसकत्वेन त्रिधा स्युः
मंत्रजातयः स्त्रीमंत्रा वह्निजायांता नमोंताश्च नपुंसकाः शेषाः पुमांसस्ते शस्ता वश्योच्चाटनकेषु च क्षुद्रक्रि
आग्नेयः क्रूरे सौम्यः सौम्य यायां विध्वंसे स्त्रियोन्येषु नपुंसकाः तारांत्याग्निवियत्प्रायो मंत्र आग्नेय इष्यते शिष्टः सौम्याः प्रशस्तौ तौ कर्म
णोः क्रूरसौम्ययोः आग्नेयमंत्रः सौम्यः स्यात्प्रायशोंते नमोन्वितः सौम्यमंत्रस्तथाग्नेयः फट्कारेणान्वितोंततः
स्वापकालो वामवहो जागरो दक्षिणावहः आग्नेयस्य मनोः सौम्यमंत्रस्यैतद्विपर्ययः प्रबोधकालं जानीया।

ये

दक्षिणवश्याकृष्टिग्रथस्य
वा सपुटः सेमस्त

उभयोर्मंत्रयोर्विरहः स्वापकाले तु मंत्रस्य जपोनर्थफलावहः वश्याकर्षणसंतापे होमे स्वाहां प्रयोजयेत् क्रोधो
पशमने धीमांस्तो पूजने च नमो वदेत् वौषट् संमोहनी दीपपुष्टिमृत्युंजयेषु च ओंकारं प्रीतिनाशे च छेदने मा
रणे तथा उच्चाटने च विद्वेषे तथा धी विकृतौ च फट् विघ्नग्रहविनाशे च हुंफट्कारं प्रयोजयेत् मंत्रोद्दीपन
कार्ये च लाभालाभे वषट् स्मृतः एवं कर्मानुरूपेण तत्तन्मंत्रं प्रयोजयेत् ग्रथितादिप्रभेदश्च मंत्राणां व
प्र॰सा॰ दतेधुना ग्रथितं संपुटं स्यात् समस्तं च विदर्भितम् तथाक्रान्तमाद्यन्तगर्भस्थं सर्वतो वृतम् तथायु
स॰ क्तविदर्भं च विदर्भग्रथितं तथा इत्येकादशधा मंत्राः प्रयुक्ताः कार्यसिद्धिदाः साध्यनामाक्षरमेकैकम
१२ न्त्रार्थे संप्रचोदितम् ग्रथितं तत्समाख्यातं वश्याकृष्टिकरं परं मंत्रमादौ वदेत्सर्वं साध्यसंज्ञामनन्तरम् पुनर्वि
परीतं पुनस्तान्ते मंत्रं तत्संपुटं स्मृतम् शांतिपुष्टिकरं तेषां त्रैलोक्यैश्वर्यदायकम् अर्द्धं मंत्रं तथाद्यन्ते मंत्रं द्वा
द्विवर्णाः मध्ये चास्य भवेत्साध्यं ग्रस्तमित्यभिधीयते अभिचारेषु सर्वेषु योजयेन्मारणेषु च साध्यनामव
देत्सर्वं पश्चान्मंत्रं तथा वदेत् एतत्समस्तमित्युक्तं शत्रूच्चाटनकारकम् द्वौ द्वौ मंत्राक्षरौ यत्र एकैकं साध्य
वर्णकं विदर्भितं तु तत्प्रोक्तं दुष्टग्रहवशंकरं मंत्रेणांतरितं साध्यं समंतात्तिष्ठते यदि आक्रान्तं तद्धि जानीयात्
सद्यः सर्वार्थसिद्धिदं स्तोभस्तंभसमावेशावश्योच्चाटनकर्मसु सकृत्सर्वं वदेन्मंत्रं अन्ते चैव तथा पुनः मध्ये
चास्य भवेत्साध्यमाद्यन्तमिति तद्विदुः अन्योन्यप्रीतियुक्तानां विद्वेषणकरं परं आदौ चान्ते तथा मंत्रं द्विः
त्रिः संप्रयोजयेत् साध्यनाम सकृन्मध्ये गर्भस्थं तदुच्यते मारणोच्चाटने वश्ये प्रसक्तं कारयेन्नृणां हेतिनो सैन्य
धीगर्भस्तंभने च गतेः तथा त्रिधा मंत्रं वदेत्पूर्वं तथैवान्ते पुनस्त्रिधा सकृत्साध्यं वदेन्मध्ये तद्धि यात्सर्वतो वृतं स
र्वोपसर्गशमनं महामृत्युनिवारणं सर्वसौभाग्यजननं स्मृतानामसृतप्रदं आदौ मंत्रं ततो नाम पुनर्मंत्रं समा राम
लिखेत् एवमेव त्रिधा कृत्वा भवेद्युक्तिविदर्भितम् एवं विकल्पितं चान्यत्तस्याद्यन्ते प्रकल्पयेत् विदर्भ १२

ग्रंथितं नाम मंत्रलक्षणमुत्तमम् सर्वकर्मकरं श्रीकं सर्वैश्वर्य्यफलप्रदम् एवमेते प्रयोगास्तु स्तिउमंत्रस्य सि
द्धिदाः एवमुक्तेषु शुभेषु मासेषूपदेशं कुर्यात् तत्र प्रथमं प्राक्प्रोक्तमष्टमोः पटलयोः उक्तेन मार्गेण वा।
दीक्षां होमकलशादीन् कृत्वा तत्र संत्रोक्तिः समये संकोचेन केवलकलशमात्रमुक्तेन प्रकारेण वास्मिन्नेव
पटले उपरि वक्ष्यमाणमातृकावर्णौषधीनां मध्ये तत्तत्साध्यमन्त्राणां ये वर्णास्तेषामेवौषधानि गृही।
त्वा क्वाथयित्वा केवलं नीष्पीउ अग्नाडीकृत्य तेन जलेन वा उपरि अष्टमे पटले स्वयं वर्णविधानेन वक्ष्यमाणा।
दशमूलपुष्परसैर्वा अश्वत्थवटोडुंबरप्लक्षाणां त्वचः क्वाथयित्वा तैर्जलैर्वा अद्भुजलैरेव वा कलशमा।
पूर्य्य उपरि सप्तविंशतिपटले प्रसंगात् वक्ष्यमाणं च तत्रिविधानेव वक्ष्यमाणकलशसामान्यपूजाक्रमेण
तत्तन्मंत्रविधानोक्तविशेषपूजाक्रमेण च संपूज्य गुरुः शिष्यमभिषिच्य मंत्रमुपदिशेत् अथवा चिदंबरक।
ल्पोक्तप्रकारेण दीक्षां कुर्यात् तत्प्रकार उच्यते संपूज्य देवं पूजांते शिष्यमाहूय सद्गुरुः स्वर्णपुष्पैरलंकृ
त्वा देवं तत्र प्रणामयेत् पुंखतो येन संस्रोतः पुरतः स्थापयेत्ततम् स्वयं परशिवो भूत्वा निःसंदिग्धमनुर्दिशेत्
निजहस्तेन शिष्यस्य समंत्रं मूर्द्धि संस्पृशेत् स्पर्शदीक्षेति सा प्रोक्ता मलत्रयविमोचिनी अथवा शारदातिल
११८ कोक्तप्रकारैर्दीक्षां कुर्यात् अथ वर्णात्मिकां वक्ष्ये दीक्षामागमचोदिताम् पुंप्रकृत्यात्मिका वर्णाः शरीरमपि
तादृशं यतस्तस्मात्तनौ न्यसेद्वर्णान् शिष्यस्य दैशिकः ततस्त्याननुतान्वर्णान्प्रतिलोमेन संहरेत् स्वज्ञा
नेदेवताभावविधिना देशिकोत्तमः तदा विलीनतत्त्वोऽयं शिष्यो दिव्यतनुर्भवेत् परमात्मनि संयोज्य तच्चै।
तन्यं गुरुर्द्धिया पश्चादुत्पाद्य तान्वर्णान् न्यसेत् शिष्यतनौ पुनः सृष्टिक्रमेण विधिवच्चैतन्यं च नियोजयेत्
जायते देवताभावः परानंदमयः शिशोः निवृत्तिर्जानुपर्य्यंतं ततस्त्वादारभ्य संस्थिता जानुतो नाभिपर्य्यंतं प्रति पदस्य =
ष्ठाव्याप्य तिष्ठति नाभेः कंठावधिव्याप्ता विद्या शांतिस्ततः परं कंठाल्ललाटपर्य्यंतं व्याप्ता तस्माच्छिरोवधि शां

दिलीना कुर्यात्

त्यतीतकलाज्ञेया कलाव्याप्तिरितीरिता संहारक्रमयोगेन स्थानात्स्थानांतरे गुरुः संयोज्य वेधयेद्विद्वा
यं नान्त्ययान्तां शिवावधिः इत्थं प्रोक्ता कलादीक्षा दिव्यभावप्रदायिनी ततो वेधमयीं वक्ष्ये दीक्षां संसार
मोचिनीम् ध्यायेच्छिष्यतनोर्मध्ये मूलाधारे चतुर्दले त्रिकोणमध्ये विमले तेजस्त्रयविजृंभिते वलि
त्रयसंयुक्तां तडित्कोटिसमप्रभां शिवशक्तिमयीं देवीं चेतनां मंत्रविग्रहां सूक्ष्मां सूक्ष्मतरां शु
क्तिं भित्त्वा षट्चक्रमंजसा गच्छंतीं मध्यमार्गेण दिव्यां परां शिवावधिः वादिसांताद्दलस्थार्णान् सं
प्र॰ मा॰ सं॰ १३ हरेत्कमलासने तं षट्पत्रमये पद्मे बादिलांतार्णराजिते स्वाधिष्ठाने समायोज्य वेधयेदात्तया गुरोः
तान्वर्णान्संहरेद्विद्वांस्तं पुनर्नाभिपंकजे दशपत्रे डादिफांतानवर्णाढ्ये योजयेद्गुरुः तान्वर्णान्योजये
द्रुद्रे तं पुनर्हृदयाम्बुजे कादिठांतार्कपत्राढ्ये योजयित्वा ईश्वरे गुरुः तान्वर्णान् संहरेत्तस्मिंस्तं पुनः क
ण्ठपंकजे स्वराढ्ये षोडशदले योजयित्वा स्वरान्पुनः सदाशिवे तान् संहृत्य तं पुनर्भ्रूसरोरुहे द्विदले
द्विदल वर्ण द्वयम् हक्षलसिते योजयित्वा तयोर्गुरुः दलवर्णं संहरेद्विद्वान् कलायां तं नियोजयेत् तं नादे तं तथा नादं ना
दांते योजयेद्गुरुः तद्व्यापिन्यां समायोज्य विलयं क्रांतरैश्चलं ततः पुनर्गुरुवक्त्रेण योजयेद्देशिकोत्तमः ॥
13 सहैकमात्मना शक्तिं वेधयेत्परमे शिवे गुर्वाज्ञया छिन्नपाशस्सदाशिवः पतेद्भुवि संजाततदिव्यबो
धोसौ सर्वं वदति तत्क्षणात् सास्यात्क्षिवो भवत्येष नात्र कार्या विचारणा एषा वेधमयी दीक्षा प्रो
स्पर्शदीक्षा वर्णदीक्षा कलादीक्षा वेधदीक्षा क्ता संवित्प्रदायिनी क्रमाच्चतुर्विधा दीक्षा तंत्रेस्मिन्समुदीरिता कल्पांतरे प्रोक्तम् गुरोरालोकन
मात्रेण भाषणात्स्पर्शनादपि सद्यः संप्राप्यते ज्ञानं सा दीक्षा शांभवी स्मृता चिंतं तत्त्वसमायाय परत
त्त्वोपबृंहितान् उच्चरेत्संहतान्मंत्रान्वाग्दीक्षेति निगद्यते निमील्य नयने ध्यात्वा परतत्त्वं प्रसन्नधीः समस्पर्शेद्गुरुः राम
न्वर्ण

होमः

शिष्यं हृदीक्षासमं भवेत्प्रिये तत्र दीक्षाकलशाभिषेकं स्तौति संक्षेपादिति कथिता द्वितीया दीक्षा जप‸णां प्रवर
फलप्रदां चिराय प्राप्यैनां जपयित्री विधिनादरेण कार्या विद्वद्भिः सकृत विधिर्निजेष्टसिद्ध्यै प्रोक्ते नैवं कलशवि
धिनैकेन वा नैकेन वा नेककुम्भैर्भक्त्या यो वा समतिरभिषिंचेत् नरो मंत्रजापी कामान् प्राप्नोत्ययमिह प्रा
प्यापि किं तत्र चित्रं लोकैश्चिन्त्यो न खलु मणिमंत्रौषधीनां प्रभावः अनेककुम्भैरिति पंच नव पंचविंशत्यादिसं
ख्याकैरित्यर्थः पुनस्तस्मिन्नुपदेशसमये ऽष्टांगगुरुप्रणामविधिं वक्ष्ये दोर्भ्यां पदाभ्यां जानुभ्यामुरसा शिरसा
दृशा मनसा वचसा चेति प्रणामोऽष्टांग ईरितः बाहुभ्यां च सजानुभ्यां शिरसा वचसा धिया पंचांगकः प्रणामः
स्यात्पूजासु प्रवराविमौ एवमष्टांगनमस्कारं पंचांगनमस्कारं कृत्वा गुरुमुपसर्प्य दक्षिणां च दद्यात् तत्सं
ख्याविशेष उच्यते वाससी च पुनरंगुलिभूषां ते मकुटमुकुलजप्रवेषु ईप्सितार्घ्यमणिमिति प्रतिदत्वा वर्द्धि
तौ द्विजमुखैरितवाग्भिः नत्वा पुनस्तनुमस्ते परमात्मने स्वं द्रव्यार्द्धमेव गुरवे चतुरंशकं वा दत्वा द्रव्यं भू
मथ वापि च वित्तशाठ्यं हित्वार्थयेत्त्रिजगतां तु तदधीनचेताः एवं गुरुदक्षिणां कृत्वा दीक्षाकलशेनाभि
षेचयित्वा पश्चाद्दक्षिणां दत्वा वा उपदेशं गृह्णीयात् पुनरुपदेशविधिस्तद्ग्रहणविधिश्चोच्यते तत्र सर्व
शिष्यं षडंगादीन् कारयित्वा पश्चान्मंत्रं शिष्यायोपदिशेत् तदुक्तं च रहस्योपनिषदि अंगहीनानि वाक्या
नि गुरुर्नोपदिशेद्बुधः प्रोक्तं भाष्ये देवताधिकरणोपक्रमम् योह वा अविदितार्षेयछन्दोदैवतब्राह्मणेन मंत्रे
स्याणुं वर्च्छति णयाजयति वाध्यापयति वा स्थाणुं वर्च्छति गर्त्तं वा पद्यते तस्मादेतानि मंत्रे विद्यादिति पुनरुभाभ्यां गुरुशिष्या
भ्यां तस्मिन्समये कर्त्तव्यविशेषः अस्मिन्नेव कल्पे षष्टपटले तेनोक्तः विमले परिधाय वाससी पुनराचम्य गुरुं प्र
णम्य च निकटे समुपासतो वदेद्यः शिष्यस्स मंत्रविशो गुरुः गुरुणा समनुग्रहीतमंत्रं स यो जपेच्छता वच्या गुरु

न्या

देवतामनूनामैक्यं संभावयन्धिया शिष्यः मंत्रे मंत्रगुरावपि मंत्री मंत्रस्य देवतायां च त्रिषु विहितसत
तभक्तिः प्रत्यहं हि निजेप्सितं फलं लभते तत्र गुरुदेवतामनूनामैक्यमिति गर्वादीनामात्मना ऐक्यमनु
ध्यायन्नित्यर्थः तदुक्तं रामकल्पे देवतागुरुमंत्राणां भावयेदैक्यमात्मना एवं संचिंतयन्मंत्री मंत्रप्र
तिदिनं जपेदिति उपदेशपानं तं गुरुः स्वशक्तिहानौ नवा त्वयेसहस्रं जप्यादितिसंप्रदायः क्रम
दीपिकायामप्येवमेवोक्तः उपदेशविधिः परिहितसिततरवसन हितयो वाचंयमः समाचांतः बद्धांजलिः
प्रणम्यदेशिकनामानं हरिमथाप संगृह्य तद्दक्षिणतउपास्तामभिमुखमेकाग्रमानसः शिष्यः न्या
प्र॰सा॰ सं॰ टि सैर्यथाविधि तमच्युतं साधु धूपगंधाक्षतादिभिरलंकृतवर्मणोस्य ऋष्यादिपूर्वकमथमं त्र
२८ वक्त्रयात्रिशो गुरुरनर्घ्यमवाम कर्णे गुरुणा विधिवत्प्रसादितं तं मनुं शोर्धशतं प्रजप्य येथः
तःश्रुणोतु सम्यक्कुसुमयान्भक्तिभरावनम्रमूर्तिः दत्वा शिष्याय मंत्रं न्यस्त्वाथ गुरुः कृतात्मयजना विधिः ...
14 त्वं सहस्रं स्वशक्तिहानौ नवा त्वयेजप्यादिति मंत्रदेवताप्रकाशिकायामुक्तं (अथाचार्यः) अथाचार्यः शिष्ये
णगुरुभक्तिनमस्कारादिकारयित्वा शिष्यस्य देहे प्राणावमातृकाभुवनेश्वरीन्यासपूर्वकं विघ्नेश्वरस्य सर्वतोभ्र ख
लमंत्रन्यासं कृत्वा स्वहृदये स्थितं तेजोमयीं मंत्रमूर्तिं दीपादीपांतरन्यायेन ब्रह्मनाडीमार्गतो निर्गमय्य शिष्यहृ
दयप्रविष्टां चिंतयन् तन्मस्तके अमृतमयं स्वहस्तं निधाय तद्दक्षिणकर्णप्रदेशे मंत्रं त्रिवारमुच्चार्य वियोरयंमंत्रः
सिद्धोस्त्विमुपदिशेत् तत्र स्त्रीशूद्रयोस्तु प्रणवं वैदिकमंत्रं च विना मंत्रांतरमुपदिशेत् तत्र प्रणवस्थाने चतुर्दशस्वरा
नुस्वारमौ कारं योजयेत् अथ सर्वमंत्राणां ग्रहणे गुरोरसंभवे कल्पांतरोक्तप्रकारेणोपायविशेषो लिख्यते गुरोरभावे मंत्रा राम
णां ग्रहणक्रमउच्यते कृष्णपक्षे त्रयोदश्यां दक्षिणामूर्तिसन्निधौ लिखित्वा राजते पत्रे तालपत्रेथवा पुनः मंत्रं तस्य दक्षिणा २८

पश्चाज्जपित्वा महेश्वरं पायसादि निवेद्यं च कृत्वा तं प्रणिपत्य च शतकृत्वः पठेन्मंत्रं दक्षिणामूर्त्तिसन्निधौ स
।र्वेषां चैव मंत्राणामेवं ग्रहणमिष्यते अथवा नद्यास्तु सिंधुगामिन्यास्तीरे चोत्तरे संस्थिते स्थंडिलं कारयेत्तत्र।
।शुचौ देशे शुभे दिने तालपत्रे लिखित्वा तं मंत्रं तत्र विधाय च आवाह्य भास्करं तत्र यथाविधि समर्चयेत् त
तस्त्रिधा वदेच्छान्तं देशिकस्तो यथा एवं गृह्णीत मतिमान् सर्वेषां विधिः स्मृतः इति मंत्रग्रहणोपायः एवं य
थोक्तलक्षणाद्गुरोर्लब्ध्वा तत्कृत्वा मंत्रं यथोक्ते कालेन नियमेन यथोक्तेन संकल्पप्रकारेण यथोक्तपामात्र
यापुरश्चर्यां कुर्यात् गुरुलक्षणं त्वस्मिन्नेव कल्पे त्रिपुराविधाने वक्ष्यति सत्संप्रदायाद्गुरोर्लब्ध्वा मंत्रमिमं न।
चान्येति विस्तरेण द्वात्रिंशत्पटले वक्ष्यति स्थाननियमं तु सुदर्शनविधाने वक्ष्यति समुद्रतीरेष्वथवाद्रिशृंगे।
समुद्रगानां सरितां च पारे जपेद्विविक्ते निजएव गेहे विलोऽग्नि हे वा पुरुषो मनस्वीति क्रमदीपिकायामप्युक्तम्
अद्रेः शृंगे गंगायास्तटे विल्वमूले हृदन्ते तोये गोकुले विष्णुगेहे अश्वत्थाधस्ताद्देवधेश्मापि रुद्रा
तेष्वासीन एकैकशस्तु प्रजपेदयुतं च तत्षद्दशान्तरं मनुवरं स्थकृक्रमशः इति शिवगीतायामप्युक्तम्।
बिल्ववृक्षं समाश्रित्य यो मंत्रान्विविधान् जपेत् एकेन दिवसेनैव तत्पुरश्चरणं भवेत् यस्तु विल्ववने नि
त्यं कुटीं कृत्वा जपेन्नरः सर्वे मंत्राः प्रसिध्यन्ति जपमात्रेण केवलं पर्वताग्रे नदीतीरे विल्वमूले शिवालये।
अग्निहोत्रे केशवस्य सन्निधौ तु जपेत्तु यः नैवास्य विघ्नं कुर्वन्ति दानवा यक्षराक्षसाः तं न स्पृशन्ति पापानि शि।
वसायुज्यमृच्छति मंत्रदेवताप्रकाशिकायामपि पुरश्चरणविधिरुक्तः ग्रहणेऽर्कस्य चैंदोर्वा शुचिःसर्वसर्वमुपो
षितः नद्यां समुद्रगामिन्यां नाभिमात्राम्भसि स्थितः ग्रहणादि विमोक्षान्तं जपेन्मंत्रं समाहितः अनंतरं दशां
शं चक्रमाद्धोमं समाचरेत् तदन्ते मंत्रसिद्ध्यर्थं गुरुं संपूज्य तोषयेत् ततो मंत्रसिद्धिः स्याद्देवता च प्रसी

सर्वेषां कृतिमूलानां नित्यनैमित्तिकात्मनां कर्मणामविरोधेषु कालेषु जप उच्यते इति शिवगीतायामप्युक्तम् ॥ २

अथवा देवतारूपं गुरुं भक्त्या प्रतोषयेत् पुरश्चरणहीनोऽपि मंत्री सिद्ध्येन्न संशयः एवं साधितमंत्रस्तु काम्यकर्मा
ण्यथाचरेत् तत्र तंत्रोक्तमार्गेण काम्यसिद्धिस्ततो भवेत् कालनियमस्तु रामकल्पे उक्तः सर्वदा ब्राह्मे मुहूर्ते आरभ्य
आमध्याह्नं जपेन्मन्त्रं अत ऊर्ध्वं कृते जापे विनाशो भवति ध्रुवम् पुरश्चर्याविधावेवं सर्वकामफलेष्वपि नित्ये नैमि
त्तिके वापि तपश्चर्यासु वा पुनः सर्वदैव जपः कार्यो न दोषस्तत्र कश्चनेति नियमस्तु क्रमदीपिकायामुक्तः कृत्वा
प्र॰सा॰ सं॰ १५ स्नानाद्यं कर्म देहार्चनं तां तपश्चर्यां श्रित्य प्रागीरितं मंत्रिमुख्यः देहार्चनं नाम वाह्यपूजावदेव देहेऽपि मानसपूजेत्यर्थः
मृद्धोमौनी सब्रह्मचारी निशाशी जप्याछन्नात्मा शुद्धपद्मालदाम्ना कुर्वन् शुश्रूषां गोषु तासां पयःप्रयच्छन् ग्रासा
न्तेषु प्रोद्दहस्थानकंपा मंत्राधिष्ठात्रीं देवतां वेदमाना ङ्गोगो ङ्वौषधं धातभानं गुरुं च कुर्वन्नात्मीयं कर्म वर्णाश्रमोक्तं
मंत्रं जप्यादिद्भिः स्नानकाले भिषिंचेत् आचामन्नूर्यार्घ्यं सलिलं संख्याभिजप्तं भोजनं श्राद्धं समभजन् हूं
ति पुनरपि क्रमदीपिकायामेवोक्तम् शाकं मूलं फलं गोस्तनभवदधिनी भैक्ष्यमन्नं च सक्तौ गौडा
द्यानः स्तितिधरषिर्वरादौ क्रमात्तस्यान भेदे एकं चैषामशक्तौ गदितमिह मयेति संकल्पप्रकारस्तु श्रीमत्प्र
पंचसारस्यैवमत्संप्रदायसर्वस्वाभिधाने विवरणे उक्तः सर्वेषां मंत्रविद्यादीनां पुरश्चरणसमये साध्यदेवतां तंत्रो
ने॰ रा॰ क्तेन विधानेन समभ्यर्च्य तदग्रे देवतां प्रतिदिवसमेवं संख्यं जपहोमादिभिस्त्वां भजामीति संकल्प्य पश्चात्प्रतिदि
वसमन्यूनानतिरिक्तमनुष्ठानं विधाय परिपूर्णासंकल्पे प्राग्वदभ्यर्च्य पुरतः प्रांजलिः प्राग्वत्प्रतिदिवसमेवं सं
ख्यं स्वामिन्नित्थं भजामीति विज्ञाप्य प्रतिदिवसं जपसंख्या शनैः शनैरारोहावरोहणे कुर्यात् तत्रारंभसमये एवं
क्रियत इत्युत्तरोत्तरसंख्योनरूपेणैव प्रार्थ्य तथा कुर्यात् समापनसमये तत्तद्विपरीते न प्रार्थ्य क्रमेण राम
ह्रासयेदित्यर्थः तत्र मंत्रदेवताप्रकाशिकोक्तप्रकारेण स्थाननियमपुरश्चरणादिविधिर्लिख्यते तत्र पुरश्चर १५

एं नाम मंत्रफलसिद्ध्यर्थमुपोद्घातत्वेन पूर्वसेवनम्‌ तत्र स्थानादिनियमविशेषा उच्यन्ते पर्वताग्रे नदीतीरे विल्व
मूले जलाशये गोष्ठे देवालये अश्वत्थउद्याने तुलसीवने पुण्यक्षेत्रे गुरोः पार्श्वे चित्तैकाग्र्यस्थलेपि वा पुरश्चरण
कृन्मंत्री सिद्ध्यत्येव न संशयः दीराहारी फलाशी वा शाकाशी वा हविष्यभुक्‌ भिक्षाशी वा भवेद्धायकृच्छ्
चान्द्रायणादिकृत्‌ लवणं क्षारनालं च गृंजनं कांस्यभोजनम्‌ तांबूलं च द्विर्भक्तं च दुःसंवादं प्रमत्तता श्रुतिस्मृ
तिविरोधं च जपं रात्रौ च वर्जयेत्‌ भूशय्या ब्रह्मचारित्वं मौनं चर्या नसूयता नित्यं त्रिषवणस्नानं क्षुद्रकर्मवि
वर्जनम्‌ नित्यपूजा नित्यदानं देवतास्तुतिकीर्तनम्‌ नैमित्तिकार्चनं चैव विश्वासो गुरुदेवयोः नैमित्ति
कार्चनं संक्रान्त्यादिषु पूजनम्‌ जपनिष्ठा द्वादशैते यमाः स्युर्मंत्रसिद्धिदाः नित्यं सूर्यमुपस्थाय तस्यैवा
भिमुखो जपेत्‌ देवताप्रतिमादौ वा वह्नौ वाप्यर्चितन्मुखः अनिर्वेदस्तथा व्यग्रशास्त्रोक्ताचारपाल
कः स्नानपूजाजपध्यानहोमतर्पणतत्परः निष्कामो देवतायां च सर्वकर्मनिवेदकः एवमादीन्स्व नि
यमान्पुरश्चरणकृच्चरेत्‌ यदि ग्रामे जपेन्मंत्री तत्र कूर्मं निरीक्षयेच सिद्ध्यर्थं तन्मुखे तिष्ठेत्त
रुच्यते कूर्मस्यांगानि चाष्टसु मुखं वह्नौ च पार्श्वको पादौ पुच्छमिति प्रोक्तं प्रशस्तं मुखमेव तु स्व
क्रमादिन्द्रपूर्वादिदिक्षु पूर्ववन्यसेत्‌ तथा कादीन्स्वरवर्गान्मध्ये शैववदिशां विना ग्रामनामाद्यवर्णो यस्यां दिशि
च तिष्ठति तत्र कूर्ममुखं वेत्तैर्यमन्यांगानीतरत्र वा मुखे न तत्फलं विद्यात्करयोरल्पकं फलं नैष्फल्यं पा
दयोर्मध्ये त्वौदासीन्यं तु पार्श्वयोः वधबंधनदुःखानि पुच्छदेशे भवन्ति च स्वस्य तत्वा कूर्मचक्रं तत्कर्माणि न॰
साधयेत्‌ आसनस्थो जपेत्सम्यक्कर्मवार्यगतमानसः कौशेयं चर्म वैयाघ्रं चैलं तैलमयापि वा दारवं ता
लपत्रं वा कांबलं दार्भमासनम्‌ प्राच्ये ष्टकाश्मधरणी तृणपल्लवनिर्मितं वर्जयेदासनं मंत्री दारिद्र्यव्याधि
दुःखदं वीरं वा स्वस्तिकं वापि बद्धमन्यतरदासनम्‌ उदङ्मुखः प्राङ्मुखो जपहोमादिकं चरेत्‌ पद्मं
वा

वास्तुकं वापि विधायार्चनादिकं चरेत् एकं पादमथैकस्मिन् विन्यस्योरुणि संस्थितः इतरस्मिंस्तथा चोरुं वीरा-
सनमुदाहृतम् जानूर्वोरन्तरा सम्यक् कृत्वा पादतले उभे ऋजुकायः समासीनः स्वस्तिकं तत्प्रचक्षते सीवन्या
आत्मनः पार्श्वे गुल्फौ नियम्य पादयोः सव्ये दक्षिणगुल्फं तु दक्षिणे दक्षिणेतरं एतद्वा स्वस्तिकं प्रोक्तं स-
स्व व्येनसेतरं करं अंगुष्ठौ चापि बध्नीयाद्धस्ताभ्यां व्युत्क्रमेण तु ऊर्वोरुपरि विप्रेन्द्र कृत्वा पादतले उभे पद्मासनं भवे-
देतत्सर्वेषामपि पूजितम् संपीड्य सीवनीं सूक्ष्मां गुल्फेनैव तु सव्यतः सव्यं दक्षिणगुल्फेन मुक्तासनमुदीरितं
एवमासनमुक्तः सन् भूतशुद्धिं समाचरेत् पृथिव्या मेरुपृष्ठ ऋषिः सुतलं छन्दः कूर्मो देवता आसनार्थे वि-
प्र·मा· नियोगः आसनं चापि देवेभ्यो ब्रह्मकर्म समाचरेत् उत्पतन्तीह भूतानि पृथिव्यां नागवासिनः पृथ्वि त्वया
स धृता लोका देवि त्वं विष्णुना धृता त्वं च धारय मां देवि पवित्रं कुरु चासनम् अपसर्पन्तु ये भूता ये भूता भुवि ग
१६ संस्थिताः ये भूता विघ्नकर्त्तारस्ते नश्यन्तु शिवाज्ञया ॐ ह्रीं अनन्तासनाय नमः आधारशक्तिकमलासनाय
नमः ॐ फडित्यासनमंत्रः जपस्य मात्रा नियमस्त्वस्मिन्नेव शास्त्रे उपरि वैलवाशन्तरी पटले वक्ष्यते नाति-
16 द्रुतं नातिविलंबितं वितं चेति कल्पान्तरेऽप्युक्तम् उच्चैर्जपोऽधमः प्रोक्त उपांशुर्मध्यमः स्मृतः उत्तमो मानसो
देवि त्रिविधः कथितो जपः अतिह्रस्वो व्याधिपीडा अतिदीर्घस्तपःक्षयः अक्षराक्षरसंयुक्तं जपेन्मौक्तिक-
हारवदिति एवं मातृकामंत्रपुरश्चर्यां कृत्वा तदन्ते मधुरत्रयमिश्रैः कोमलैः युतं पुरश्चरणहोमं कुर्या-
त् अथवा प्रत्यहं जप्याज्जुहुयात्तद्दशांशतः नैरन्तर्यविधिः प्रोक्तो न दिनं प्रतिलंघयेत् दिवसा-
तिक्रमात्तस्मान्मंत्रसिद्धिर्भवेन्नहि यावत्संख्यं जपेदह्नि पूर्वस्मिंस्तावदेव तु दिनान्तरेऽपि प्र-
जपेदन्यथा सिद्धिरोधकृत् तत्र मधुरत्रयं नाम क्षौद्रं गुडाज्यमिश्रितं क्षौद्रं क्षीराज्यमिलितं चे-
तिपक्षविशेषः तत्र विद्वेषविषये चेत् क्षौद्रं गुडाज्यमिश्रितमेव शक्तिविषये चेत् प्रायेण राम
१६

होम

तदेव तु तत्र होमेऽशक्तश्चेत्तज्जपसंख्यापेक्षया वेदसंख्यागुणितो ब्राह्मणैर्मन्त्रो जप्तव्यः षट्संख्यागुणि
तः क्षत्रियैर्जप्तव्यः अष्टसंख्यागुणितो वैश्यैर्जप्तव्यः होमेन समाकं चेत् एषां त्रयाणामपि समानैव संख्या
पुनर्वर्णत्रयाणां मध्ये होमरहितत्वे यो वर्णस्तस्य विहितसंख्यातस्त्रीणां च तद्वर्णमाश्रित्य तस्य द्विगुणापि।
संख्या विहितेति संप्रदायः तदुक्तं च क्रमदीपिकायां अशक्तानां होमे निगमरसनागेंद्रगुणितो जपः।
कार्यश्चेति द्विजन्मप्रविशामाहुरपरे सहोमस्य देयांसमरहजपो होमरहितो यदुक्तो वर्णानां स खलु वि
हितस्तत्तुल्यदृशं येवर्णमाश्रितोपदिष्टः स च तत्र तत्र भक्त्यैव विहितं विदधीत विधिवदेनं श्रद्धावान्भक्ति
भावनस्तत्र इति तत्राहुरपरे इति द्विगुणातिक्रमेणेति तदुक्तम् यद्यदंगं विहीयेत तत्तत्संख्याद्वि।
गुणो जपः कर्तव्यः सांगसिद्ध्यर्थं तदशक्तेन भक्तितः विप्राराधनमात्रेणाव्यंगं सांगमवाप्नुयादिति तत्र
भक्तश्चेत्तस्य द्विसंख्यापि मंत्रेऽधिकारोऽस्तीति वर्णयंति तदुक्तं च क्रमदीपिकायाम् क्षितिसुरनृपवैश्यतुर्यजा।
नां मुनिवनवासिगृहस्थवर्णिनां च जपहुतयजनादिभिर्मनूनां फलति हि कस्यचित्कदाचित्
सर्वेषु वर्णेषु तथाश्रमेषु नारीषु नानाह्वयजन्मभेषु दाता फलानामभिवांछितानां द्रागेव गोपालकमं
त्र एषः न्यूनमत्युत्कटयादलपातनेकारणं भवति भक्तिरजस्रा तच्चतुष्टयफलाप्तये ततो भक्तिमानधिकृ
तो हरौ गुरौ चेति अथ होमार्थं कुंडलक्षणविधिमस्मिन्नेव प्रपंचसारे प्राक्प्रपंचमे दीक्षापटले उक्तेन प्र
कारेणाह वदे प्रागेव लक्षणयुक्तानि च मंडपेऽस्मिन् कुंडानि कारयेत् सम्यगष्टासु दिशास्व आखंडमर्कमतं। ला॰
वारिधनाधिपानां दोर्मात्रकाणि विलसद्गुणमेखलानि चतुरस्रमर्धशशिबिंबविलसितमथ त्रिकोण
कं पद्मदलरुचिरवृत्तमिति ब्रुवते बुधा विधिवत् कुंडलक्षणम् विंशद्भिश्चतुरधिकाभिरंगुलीभिः सूत्रे।
णाप्यथ परिमृज्य भूमिभागं ताभिश्च प्रवेशनतत्तावतीभिरेकां तु पल्कोचांगुलीमपि मेखलाश्च कार्याः

मत्स्यसर्वकगुणान्विताः क्रमात् द्वादशाष्टचतुरंगुलोच्छ्रिता। सर्वतोंगुलिचतुष्कविस्तृता मेखलाः सकल
सिद्धिदा मताः। योनिस्तत्पश्चिमस्यामथ दिशि चतुरस्रस्थलात्स्थनाला तन्मध्योन्नता स्थिरं श्रोपरि परिवित
ताश्वत्थपत्रानुकारा उत्सेधायामकाभ्यां प्रकृतिविकृतिसंख्ताङ्गुलाष्टांगुलाभ्यां द्विस्तृत्या द्वादशार्धा
ङ्गुलिमितनमिताग्रा निदिष्टे च कुण्डे इति अस्यार्थः तत्र दीक्षाविधाने तु चतुर्दिक्षु चैव चतुर्विधं कुण्डमष्टकं
सा॰ तेषां मध्ये चतुरस्रकुण्डं तु सार्वकामिकं तेन तत्सर्वहोमं धारणं तेन तदेव कुण्डं कुर्यात्। तदुक्तम्। तत्रैव
॥ त्यै दीक्षापटलकाले अथवादिशि कुण्डमन्तरेणापि विदध्याच्चतुरस्रमेकमेव गदितैः पिलक्षणैः सम
प्र॰सा॰ तापवनेदृष्टिमनोहरं च कांक्षति। तेन चतुरस्रकुण्डलक्षणमेवात्र कथ्यते। प्रथमं तावच्चतुर्विंश
से॰ १० त्यंगुलप्रमाणमायामविस्तारेण तावदंगुलिप्रमाणं निम्नेन च भूमिभागे सूत्रेणापरि
कल्प्य पुनस्तस्मात् निम्नस्थलादेकांगुलतो वहिः परितः सूत्रमास्फाल्य तद्बहिस्तो द्वादशांगु
लमानेन परितः सूत्रमास्फाल्य सूत्रानयोरास्फालितसूत्रयोर्मध्ये चतुरंगुलविभागेन तिस्रो मेखलाः
17 कार्याः इत्थं मेखलास्थानम्। अथ मेखलालक्षणमुच्यते दोःप्रमाणादीर्घेण द्वादशांगुलोत्सेधेन चतु
रंगुलविस्तारेण प्रथमां मेखलां विरचय्य तस्यां मेखलायां बहिः पार्श्वे अष्टांगुलोत्सेधेन चतुरंगुल।
विस्तारेण द्वितीयां मेखलां तद्बहिस्तत्पार्श्वे चतुरंगुलोत्सेधविस्तारेण तृतीयां मेखलां चाविर।
चय्य पुनस्तत्कुण्डस्य पश्चिममेखलामध्यदेशे भूमौ प्रथममेखलामध्यदेशसंश्लिष्टं द्व्यंगुलायाया
मविस्तारमेकांगुलोत्सेधं चतुरस्रं कृत्वा तस्य सर्वदेशमारभ्य ऊर्ध्वक्रमेणादंडवद्दन्नतः द्विती
यमेखलाग्रान्तं वृत्ताकारेण नालं विरचय्य तत्र मध्यममेखलायां परिस्तरणार्थं छिद्रं वि।
धाय तस्माद्द्वितीयमेखलायादारभ्य तृतीयमेखलाविस्तरस्य प्राग्भागावधि अश्वत्थस्य प। राम
स्रा १०

त्राकारं योनिं च चतुर्विंशत्यंगुलप्रमाणं तृतीयमेखलातो यवमात्रसमुन्नतां तामश्वत्थपत्राकारां मध्यमौष्ठांगु
लविस्तारेण मग्रानुषडंगुलतः पश्चिमभागोदारभ्याग्रभाभ्यां पार्श्वाभ्यां क्रमेण संकोचवतीमलभागादग्रा।
वधिक्रमेण किंचिच्छिन्नस्थलामग्रतो यवमात्रेण किंचित्कुण्डस्योर्ध्वं निविष्टामिव कुर्यात्‌ तत्राश्वत्थस्य पत्रस्य
चतुर्विंशत्यंगुलप्रमाणत्वेन प्रथममेखलामारभ्य द्वितीयमेखलाग्रावधि मेखलनालं तदग्रादारभ्य
मेखलपत्रारंभः तत्र द्वितीयमेखलांतः तृतीयमेखलोच्छ्रायश्चतुरंगुलः मेखलतेन तत्रैव पत्रस्य चतुरंगुलसं
ख्याजाता पुनर्मेखलात्रयस्य विस्तारं प्रत्येकं चतुरंगुलप्रमाणम्‌ मेखलतत्र द्वादशांगुलप्रमाणं पत्रस्य जा
संभूय षोडशांगुलप्रमाणं जातं पुनरष्टांगुलविस्तारं च संभूय चतुर्विंशत्यंगुलप्रमाणं अश्वत्थस्य पत्रा
कारो योनिः अथवा प्रथममेखलातारभ्य द्वितीयमेखलाग्रावधि पत्रस्य नालं तदष्टांगुलप्रमाणं मेखलत
त्रमारभ्य तृतीयमेखलाग्रावधि चतुरंगुलप्रमाणम्‌ तत्रैवारभ्य मेखलात्रयस्य विस्तारे दैर्घ्ये चतुरंगुलं = प्रमाणमित्यर्थः
चतुरंगुलं संभूय द्वादशांगुलसंख्या जाता एतानि सर्वाण्यंगुलानि संभूय चतुर्विंशत्यंगुलानि जातानि
एवं वा चतुर्विंशत्यंगुलप्रमाणा अश्वत्थस्य पत्राकारा योनिः तस्मादुक्तेन प्रकारेण कुण्डस्य गर्ततायाम विस्ता।
रोच्छ्राययोनीलां प्रत्येकं चतुर्विंशत्यंगुलप्रमाणमानेन निर्मीते न सर्वं च चतुर्विंशतितत्त्वात्मकमिति सं
प्रदाय इति कर्तुर्दक्षिणहस्तस्य मध्यमांगुलिपर्वणोः मध्यस्य दीर्घमानेन मात्रांगुलमितीरिता यवाना
मष्टभिः स्मृतः मानांगुलमुदीरितम्‌ इत्यं सर्वहोमसाधारणं कुण्डलक्षणमुक्तम्‌ तत्र देवताप्रकाशि
कायां तु होमसंख्यानुसारेण कुण्डस्य हस्तपरिमाणविशेष उक्तः तत्र कापालिख्येत कोटिहोमेऽष्टह।
स्तम्‌ अर्धकोटिहोमे सप्तहस्तम्‌ दशलक्षहोमे षट्‌हस्तं पंचलक्षहोमे पंचहस्तं एकलक्षहोमे चतुर्ह।
स्तम्‌ अर्धलक्षे त्रिहस्तम्‌ अयुते द्विहस्तम्‌ सहस्र एकहस्तम्‌ कुण्डं कुर्यादिति केचित्‌ अन्ये तु

प्र.सा.
सं.
१८

क्रूरप्रयोगे दक्षिणदिशि त्रिकोणं कुण्डं कुर्यात् व्याधिमृत्युपरिहारार्थं पश्चिमदिशि वर्तुलं कुर्यात् उच्चा
टनशोषणार्थं वायुदिग्भागे षट्कोणं कुण्डं कुर्यात् श्रीसमृद्ध्यै उत्तरदिशि पद्माकारं कुर्यात् ज्ञानार्थमीश
दिग्भागे अष्टकोणं कुर्यात् तत्रैकहस्तमानानुसारेण मेखला सर्वं कुण्डस्य गर्तमेखलादीनां चतुर्विंशत्यङ्गुल
मानमुक्तम् तदपि हस्तमानाधिक्यानुसारेण वर्द्धनीयम् अथ शारदातिलकोक्तप्रकारेण कुण्डस्य हस्तमा
नमुच्यते मुष्टिमात्रमितं कुण्डं शतार्धे संप्रचक्षते शतहोमे ऽङ्गुलिमात्रं वा बाहुमात्रं सहस्रके द्विहस्तमयुते ल
क्षे च चतुर्हस्तमुदीरितम् दशलक्षेषु षड्ढस्तं कोट्यामष्टकरं स्मृतम् एकहस्तमितं कुण्डमेकलक्षे विधीयते
लक्षाणां दशकं यावत्तावद्धस्तेन वर्द्धयेत् दशहस्तमितं कुण्डं कोटिहोमे प्रशस्यते सर्वसिद्धिकरं कुण्डं च
तुरस्रमितीरितम् पुत्रप्रदं योनिकुण्डं मर्द्धचन्द्रं शुभप्रदम् शत्रुक्षयकरं त्र्यस्रं वर्तुलं शान्तिकर्मणि । छेदमा
रणयोः कुण्डं षडस्रं पद्मसन्निभं वृष्टिदं रोगशमनं कुण्डमष्टास्रमीरितम् विप्राणां चतुरस्रं स्याद्राज्ञां वर्तु
लमिष्यते वैश्यानामर्द्धचन्द्राभं शूद्राणां त्र्यस्रमीरितम् चतुरस्रं तु सर्वेषां केचिदिच्छन्ति तान्त्रिकाः कुण्डस्वरूपं
जानीयात्परमप्रकृतेर्वपुः प्राच्यां शिरः समाख्यातं बाहू दक्षिणसौम्ययोः उदरं कुण्डमित्युक्तं योनिः पादौ च
पश्चिमे नित्यनैमित्तिकं होमं स्थण्डिले वा समाचरेत् हस्तमात्रेण तत्कुर्यात् वालुकाभिः सुशोभितम् अ
ङ्गुलोत्सेधसंयुक्तं चतुरस्रं समन्ततः एवं कुण्डलक्षणान्युक्तानि ॥ अथ होमसामान्यविधिर्विद्याप्रशाकल्पो
क्तप्रकारेण वक्ष्ये विविक्ते रुचिरे रम्ये सुखासीनः समाहितः आत्मानमात्मना ध्यात्वा जपहोमादिकाः क्रि
याः स्वगृह्योक्तविधानेन अग्निं प्रज्वाल्य देशिकः कुण्डे वा स्थण्डिले वापि ब्राह्मणैरथवा स्वयम् औपासनेप
दिस्वार्थमितरेषां तु लौकिके इति अवकल्पे तत्रकल्याज्यभागान्तं सर्वं मुखोल्लेखनादिकं स्वगृह्योक्तवि
धानेन ततो होमं समाचरेत् इति स्वगृह्योक्तेति आचार्यस्य कर्तुर्वा इति विकल्पः ॥ धन्वन्तरिवि।

18

राम
१८

धानेउक्तम् ॥ अग्निमुखोदिकमाविलं स्वचरणविहितक्रमेण कृत्वाग्नौ आवाहयेद्वैयनायेपरिवारयुतं
प्रपूज्यगंधाद्यैरिति अस्मिन्नेव शास्त्रे प्राकृदीक्षापटलेउक्तम् तत्राथो सहितमतीमतीद्रियां मांसम्यक्त्वा।
च^ सकलजगन्मयीं शक्तिं तद्योनौ मणिभवं मारणायकं वातारणादिपलगृहोयमेवखाग्निं चित्पिंगलहन।
हनदहदहपचपचसर्वज्ञाज्ञापयस्वाहा अनेनानलं ज्वालयेत् अग्निं प्रज्वालितं वंदेजातवेदंहुताशनं सु
वर्णवर्णमनलं समिद्धं सर्वतोमुखम् अनेन ज्वालितं मंत्रेणोपतिष्ठेद्हुताशनं ततः प्रविन्यसेद्देहे जिह्वा
मंत्रैर्विभावसोः सलिंगगणदमद्रुस्यनासाने त्रेषुचक्रमात् सर्वांगेषु च जिह्वाश्च वदंते त्रिविधात्मिकाः
हिरण्या कनका रक्ता कृष्णा चैव तथा सुप्रभा बहुरूपातिरक्ता च जिह्वा सप्तेति सात्विकाः पद्मरागाः सुवर्णा च।
तृतीया भद्रलोहिता लोहिताख्या तथा श्वेता धूम्रिनी च करालिका राजस्यः कथिता जिह्वाः क्रमात्कल्प
णेरेतसः विश्वमूर्ति स्फुलिंगिन्याधूम्रवर्णा मनोजवा लोहिता च कराला ख्याकालीतामसजिह्विकाः
अनलैरार्बिविंदुतास्सादियांतालगान्विताः सात्विका देवपूजासु राजसाः काम्यकर्मसु तामस्याः
क्रूरकार्येषु प्रयोक्तव्या विपश्चिता सुराः सपितृगंधर्वा यक्षा नागाः पिशाचकाः राक्षसाश्च क्रमा
दग्नेराश्रितास्सनाम्नामी जिह्वास्त्रिदशादीनां तत्तत्कार्यसमाप्तये जुहुयाद्दोक्तितासिद्धिंद
द्युस्ताः देवतामताः स्वनामसदृशाकाराः प्रायोजिह्वाहविर्भुजः तत्रानलेराद्यी त्यादेरयमर्थः अन
लइति रेफः ईईइति यकारः अर्घी लूकारः षष्ठस्वरः बिंदुरिति अनुस्वारः प्रतिलोमेन सकारादि यांतैर्वर्णैः
योजयेत् एतदुक्तं भवति सकाररेफयकारषष्ठस्वरबिंदूनां कूटं स्र्लृं इति प्रथमं बीजं एवमेव योज
ना^ येत् एवं सप्तजिह्वामंत्रादौ योजयेत् अथ श्रीविद्याकल्पसूत्रोक्तप्रकारेणाग्निजननविधिर्लिख्यते
॥ अथ स्वेष्टमंत्रस्य होमविधानं व्याख्यास्यामः ॥ चतुरस्रं कुंडमथवा हस्तायामं मंगलोन्नतं

प्र॰ सा॰ सं॰ १९ स्थंडिलं वा कृत्वा सामान्यार्घ्यमुपशोध्य सामान्यार्घ्योपशोधनं नाम शंखपूरणविधिः तेनाधोक्षं प्राची।
रुदीचीं स्वस्तिस्वरेखालिखित्वा तामरेखां सब्रह्मयमसोमरुद्रविष्णुंद्रानुषट्कतारनमः संपुटितान
भ्यर्च्य षट्कतारनमःसंपुटितानिति ऐं ह्रीं श्रीं ऐं क्लीं सौः ब्रह्मणे नमः एवं मायादिबीजादियोजनीयम् ॥
महस्त्रार्चिषे हृदयाय नमः स्वस्तिपूर्णाय शिरसे स्वाहा उत्तिष्ठपुरुषाय शिखायै वषट् धूमव्यापिने कव
चाय हुं सप्तजिह्वाय नेत्रत्रयाय वौषट् धनुर्धराय अस्त्राय फट् इति स्वदेहे षडंगं विधाय अग्निमंत्रस्य भृ
गुऋषिः गायत्री छंदः हुताशनो देवता इति ऋष्यादिकं विन्यस्य अनेनैव षडंगेन हुं उमभ्यर्च्य तत्राष्टकोणं
षट्कोणत्रिकोणात्मकमग्निचक्रं मंडलं क्रमेण विलिख्य पीतायै श्वेतायै अरुणायै कृष्णायै धूम्रायै ती
व्रायै स्फुलिंगिन्यै रुचिरायै ज्वालिन्यै नमः इति त्रिकोणमध्ये वह्नेः पीठशक्तीः संपूज्य तं तमसे रं रजसे सं सत्वाय
19 आत्मने अंतरात्मने ज्ञानात्मने परमात्मने नमः इति तत्रैवाभ्यर्च्य अनिष्यमाणस्य वह्नेः पितरौ वागीश्वरी
वागीश्वरौ पीठे समभ्यर्च्य तयोर्मिथुनीभावं ध्यात्वा ह्रीं वागीश्वरी वागीश्वराभ्यां नमः इति ध्यात्वा अरणौ
सूर्यकांतात् द्विजगृहाद्वा वह्निमुत्पाद्य स्वपात्रे ताम्रपात्रे वा आग्नेय्यामैशान्यां नैरृत्यां वा निधाय अग्निशकलं
क्रव्यादांशं नैरृते विसृज्य निरीक्षणप्रोक्षणताडनावगुंठनादिभिरग्निं विशोध्य निरीक्षणादिकं नाम हृद।
यमंत्रेण निरीक्षणम् शिरोमंत्रेण प्रोक्षणं अस्त्रमंत्रेण ताडनम् कवचमंत्रेणावगुंठनमिति वि।
शोध्य ॐ वैश्वानर जातवेद इहावह लोहिताक्ष सर्वकर्माणि साधय स्वाहेति मूलाधारोद्भूतं संवि।
दग्निं ललाटनेत्रद्वारा निर्गमय्य तं वाह्याग्नियुक्तं पातयेत् तत्रास्त्रेण संरक्ष्य सह्रन्यहौं वषडिति मं
त्रेणाधेनुमुद्रयामृतीकृत्य दाय हुं उत्सो परिप्रदक्षिणं त्रिः परिभ्राम्य वागीश्वरीबीजाय नमः वागीश्वर राम १९

बीजमिदं ध्यात्वा वागीश्वरीगर्भनाडौ वागीश्वरेणाहितं विभाव्य ॐ उग्निं निधाय नाभिदेशे द्विः इति समस्तस्य पा।
रिधानस्य संवृत्तिं विभाव्य शौचाचमनार्थं तोयबिंदुं हृदयमंत्रेण दत्वा अग्निं प्रज्वलितं वंदे जातवेदं कृताश।
ने सुवर्णवर्णमनलं समिद्धं विश्वतोमुखं इत्युपस्थापक कवचमंत्रेण ईंधनेनाच्छाद्य उत्तिष्ठ पुरुष हरि।
तपिंगललोहिताक्ष सर्वकर्माणि साधय स्वाहेति वह्निमुत्थाप्य चित्पिंगल हन हन दह दह पच पच स-
र्वज्ञाज्ञापय स्वाहेति प्रज्वाल्य वागीश्वरीगर्भे घृतं ध्यात्वा गर्भाग्नये नमः इति गर्भस्याग्निं संपूज्य गर्भे रे-
ता तोवीर्यमस्त्रमंत्रेण समस्तगर्भकंकणं देव्या हस्ते बध्वा गर्भाधानपुंसवनसीमंतोन्नयनजननजातकर्मनाम-
करणान्नप्राशनचौलोपनयनव्रतसमावर्तनविवाहकर्माणि वषट्तारनमोंतमंत्रेण कुर्यात् तद्विशेषो।
लिख्यते ऐं ह्रीं श्रीं ऐं क्लीं सौः नमः इत्यभ्यर्च्य हृदयमंत्रेणाहुतित्रयं तिलैः कुर्यादिति गर्भाधानं विधाय पुं-
सवनार्थं तृतीये मासि वषट्तारैरभ्यर्च्य शिरोमंत्रेणाहुतित्रयं तिलैर्दत्वा सीमंतोन्नयननिमित्तं षष्ठे मासि व-
षट्तारैरभ्यर्च्य शिखामंत्रेणाहुतित्रयं तिलैर्दत्वा जननार्थं दशमे मासि वषट्तारैरभ्यर्च्य कवचमंत्रेणाहुति-
त्रयं तिलैर्दत्वा जातस्य गर्भमलापहस्तनार्थं वह्निं दर्भाग्रैः षट्तारमंत्रेण संधुक्ष्य देवीहस्तस्य दर्भकंकणं।
मुन्मुच्य स्वर्णबंधनादीकं देव्याः कृतमिति ध्यात्वा हृदयमंत्रेणाभ्यर्च्य सद्यः सूतकनिवृत्तये कुंभमस्त्रमंत्रे- ल
जह्वाभस्मासंसिच्य दर्भेणास्त्रमंत्रेण ताडनं कृत्वा वह्निरक्षार्थं पूर्वादिमेखलासु तरपूर्वाग्रदर्भान्परिस्तीर्य
तेषु परिधिविष्टरान् संस्थाप्य वज्राणां लालापनोपदैर्याग्रैः पृष्ठे च मूलाग्रयोर्ध्व तास्तिक पालाशपः पं-
च समिधः अस्त्रमंत्रेण हुत्वा परिधिषु ब्रह्मणे नमः विष्णवे नमः रुद्राय नमः ईश्वराय नमः इति षट्तार न-
मः संपुटितान् पूर्वादिपरिधिस्थान् संस्पृश्य विष्टरेषु पूर्वादीशानांतमिंद्रादीनभ्यर्च्यार्घ्याद्युपचारान् द।
त्वेति विघ्नसंघातं निवार्य ततः स्रुक्स्रुवौ पाणियवक्त्रकृतौ ताम्रकृतौ वामकृष्णासूर्ध्ववदनावधोमु।

प्रताप्य

स्रौ गृहीत्वा तत्र स्रुक्का ऊर्ध्ववदनत्वं स्रुवस्याधोवदनत्वं चेत्यर्थः । अस्त्रमंत्रेणाभ्युक्ष्य कवचमंत्रेणावगुंठ्या
नाग्नौ प्रताप्य परिभ्राम्य कुशाग्रेण तदग्रं संमृज्य पुनः परिभ्राम्य मध्येन मध्यं संमृज्य पुनः परिभ्राम्य मूले
स्रुक्स्रुवयोः न मूलं संमृज्य प्रताप्य पुनः परिभ्राम्य तयोः कुशसंमार्जितप्रदेशाग्रे ग्रीवे तत्वाय नमः मध्ये विद्या
तत्वाय नमः मूले आत्मतत्वाय नमः इति तद्दर्भेण विन्यस्य शक्तिरूपां स्रुचं पुरुषात्मकं स्रुवं भावयि
प्र·सा· त्वा तद्ग्रीवायां कवचमंत्रेण त्रिसूत्रेणावेष्ट्यात्मनः सव्यभागे कुशोपरि संस्थाप्य तद्दर्भान् अग्नौ प्रक्षिप्य
सं· स्रुक्स्रुवौ हृदयमंत्रेण पूजयेत् । अथ गव्यमाज्यं दारुपात्रे मृत्पात्रे ताम्रपात्रे वादाय नैरृतकोणे प्रोक्षणता री॰
२· डनावगुंठनैः प्राग्वत् मंत्रैर्विशोध्य स्वदेहं ब्रह्ममयं विचिंत्याज्यमादाय कुंडस्योर्ध्वं त्रिधा विभज्याज्यमग्नौ
प्रणीताविधि प्रक्षिपेत् कुशाग्रेण घृतबिंदुमादाय ॐ ह्रां ब्रह्मणे स्वाहेति कृत्वा पुनर्विष्णुमयं स्वदेहं विचिंत्याज्य
मादाय ऐशान्यां प्रक्षिपेत् कुशाग्रेणाज्यबिंदुमादाय ॐ ह्रीं विष्णवे स्वाहेति कृत्वा पश्चात् स्वदेहं रुद्रमयं
२० ध्यात्वा नाभिस्थाने प्रक्षिपेत् ॐ ह्रूं रुद्राय स्वाहेति आज्यबिंदुं कुशाग्रेण जुहुयात् उद्गृह्य [illegible] कुंडनाभौ
संस्थाप्य ग्रंथियुक्तपवित्रेणास्त्रमंत्रेणोत्सृज्य ग्रंथिमुन्मुच्याग्नौ क्षिपेत् हृदयमंत्रेण दग्धदर्भोल्मुकम
स्त्रमंत्रेण घृते प्रदर्श्य अस्त्रमंत्रेणाग्नौ क्षिपेत् दीप्तेनान्येन दर्भेण कवचमंत्रेण नीराज्याग्नौ क्षिपेत् ततः
प्रादेशमात्रं मध्यग्रंथि कुशद्वयं प्रणवेन छित्वा मध्ये न्यस्य दक्षिणवामक्रमेण [illegible] तद्द्वयं
विभाव्य पुनर्दक्षिणवाममध्यभागेषु पिंगलेडासुषुम्नानाडीत्रयं च संविभाव्य समस्तमाज्यं [illegible] स्रुवेणाज्य
मादाय ॐ ह्रां अग्नये स्वाहेति अग्नेर्दक्षिणनेत्रे हुत्वा वामभागादाज्यमादाय ॐ ह्रां सोमाय स्वाहेति वा
मनेत्रे हुत्वा मध्यादाज्यमादाय ॐ ह्रां अग्नीषोमाभ्यां स्वाहेत्यग्निमध्यनेत्रे हुत्वा ॐ ह्रां अग्नये स्विष्टकृते स्वा राम
हेति अग्निवक्त्रे च स्विष्टिं [illegible] आज्यस्याल्पां स्वाहेति क्षिपेत् [illegible] आहुतिः २॰
है

ॐ ह्रां सोमाय स्वाहा ॐ ह्रां अग्नये स्वाहा ॐ ह्रां सोमाग्निभ्यां स्वाहा अग्नये स्विष्टकृते स्वाहेति वामदक्षिण
मध्यनेत्रेषु चक्षुषी कृत्वा आज्यस्थालीं वेदाश्रिताभिमंत्र्य अस्त्रमंत्रेण संरक्ष्य कवचमंत्रेणावगुंठ्य तत्तन्मू
लमंत्रेणाधेनुमुद्रयामृतीकृत्य मूलमंत्रेण संशुद्ध्य संस्कृताज्यं किंचिद् हृज्ज्व शोधयेत्. अथ नामक
२ रणार्थं षट्तारैरभ्यर्च्याख्यमंत्रेण तिलैराहुतित्रयं दत्वा अन्नप्राशनमप्येवं चौलोपनयनव्रतसमावर्त्तनवि
वाहकर्मणां षट्तारैः पृथक् पृथक् अभ्यर्च्य षट्तारशर्वकैस्तत्तन्मूलमंत्रैः पृथक् पृथक् तिलैः समा
हुतीर्जुहुयात्. एवं गर्भाधानादि द्वादशसंस्कारैरग्निमुपचर्य हृदयमंत्रेण वागीशावभ्यर्च्य विसृज्य विन
ताहं यनमरुणांत्रावद्धमौलिं स्वभ्रक्लां अग्नकमरुणमनेकाकल्पमंभोजसंस्थां अभिमतवरशक्तिस्वस्तिका
भीतिहस्तं नमत कनकमालालंकृतांसं कृशानुमिति ध्यात्वा शर्वीकाग्निचक्राष्टकोणे जातवेदसे सप्तजि
ह्वाय हव्यवाहनाय अश्वोदरजाय वैश्वानराय कौमारतेजसे विश्वमुखाय देवमुखाय नमः इत्यभ्य
र्च्य षट्कोणे शर्वीकाग्निषडंगमभ्यर्च्य त्रिकोणे अग्निं शमयित्वा ॐ तिष्ठ पुरुष बहुरि पिंगल लोहिताक्ष धनं
मे देहि दापय स्वाहा इत्यनेनाग्निमंत्रेणाग्निं संशुध्य हिरण्यायै कनकायै रक्तायै कृष्णायै सुप्रभायै अतिर ५४
क्तायै बहुरूपायै नम इत्यग्नेः सप्तजिह्वामंत्रैरासनेन पृथक् पृथक् सप्ताहुतीर्जुहुयात्. गर्भाधानादिसं
स्कारशरणार्थं वौषडंताग्निमूलमंत्रेणाहुतिं कुर्यात्. तद्यथा सर्पिषा स्रुवमापूर्य पुष्करोपरि अधोमु
खम् स्रुवं निधाय पुष्करोपरि स्रुवउपरिरित्यर्थः तदग्रे पुष्पमारोप्य वामदक्षिणहस्ताभ्यां शंखवत् संयु
ताभ्यां पुरस्सव्येन त्वग्रौ तावुभौ स्रुक्स्रुवावादाय समपादः समुत्थाय ऊर्ध्वकायो नाभ्यां तिर्यग्विधा
३ य स्रुगग्रं दत्तदृष्टिः वौषडंतमूलमुच्चरन् वामहस्तनीतं स्रुवमानीय यवप्रमाणधारया समस्तमाज्यं व
ह्नौ निपेदिति पूर्णाहुतिः वैश्वानरोतिष्ठ चितिपिंगल हन हन दह दह पच पच सर्वज्ञाज्ञापय स्वाहेति आहुतित्रयं

विधाय वह्निरूपायां जिह्वायामिष्टदेवतामावाह्यावरणैः सह समर्चयेत् अथाग्निसाध्यदेवतयोरैक्यभाव
नाप्रकारः अग्नेस्त्वमैश्वर्यं तेजःपावनपरमंयतः तस्मात्त्वदीयहृदये संस्थाप्यात्मवियाम्यहम् इत्यग्निं सं
पं: प्रार्थ्य अग्नेर्विग्रहमध्यनाड्या स्वस्वं प्रविश्य तदीयहृत्पद्मे स्वेष्टदेवतामावाह्य तत्र भास्वरे देवं सावरणम
भ्यर्च्य तन्मूलमंत्रमुच्चार्य वह्निस्थदेवतानासाविनिर्गतां ज्योतीरूपिणीं वामगोलीनां रश्मिमात्रां वि
योगेनाविच्छिन्नाम् भयमकृतां स्वदा एकेनैवात्मनाध्यापयेत् एवं कुंडमाताग्न्यात्मनामैक्यं भावयेत् ए
प्रसा॰ सि॰ वमग्नितननं कृत्वाग्नौ ग्नेपीठावरणार्चनादि सर्वं कं होमं कुर्यात् अथ महालक्ष्मीरत्नकोशोक्तं होम
२२ सामान्यविधिर्लिख्यते कुंडस्य मध्यमे भागे कृतमग्न्यर्पिते पुनः अग्निरूपमहं वक्ष्ये सिध्यर्थं सर्वकर्मसु
यतो यस्मिन्नविज्ञाते होमो भवति निष्फलः हिरण्या कनका रक्ता कृष्णा चैव तु सुप्रभा अतिरक्ता बहु
रूपा जिह्वाः सप्त प्रकीर्तिताः हिरण्या वारुणे जिह्वा वायव्ये कनका तथा रक्ता चोत्तर जिह्वा स्यात् कृ
२१ ष्णा याम्यदिशि स्थिता सुप्रभा पूर्वजिह्वा स्यादतिरक्तानले स्थिता बहुरूपा तु नैरृत्यां जिह्वास्थानं
प्रकीर्तितं जिह्वाभेदं वदंत्येवं शृणु वक्ष्ये विधानतः कुंडस्य पूर्वदिग्भागे काली जिह्वा प्रकीर्तिता आग्ने
यां तु कराली स्याद्दक्षिणे तु मनोजवा स लोहिता च नैरृत्ये धूम्रवर्णा तु वारुणे स्फुलिंगिनी तु वायव्ये रिंगि लिंगी
सौम्ये विश्वरुचिः स्मृता काल्यां कराल्यां जिह्वायां शांतिकं पौष्टिकं भवेत् मनोजवायां जिह्वा
यामभिचारो विधीयते भूतप्रेतपिशाचादिशांतिर्लोहितजिह्वके निर्दूयाय धूम्रवर्णायां तु ष्टिकामो।
विधीयते स्फुलिंगिन्यां तु जिह्वायां तस्यामुच्चाटनं विदुः याम्यविश्वरुचिर्जिह्वा कुंडस्योत्तरभागतः स
र्वार्थसाधिनी जिह्वा लक्ष्मीस्तत्र प्रतिष्ठिता एवं ध्यात्वा तु जुहुयात् तत्तत्कार्यानुरूपतः अथ तंत्रसमुच्चयोक्तप्र राम
कारेणापि होमसामान्यविधिर्मूलग्रंथे विना केवलमर्थतो लिख्यते प्रथमं तावदाज्यभागांतं कृत्वाऽथ्या २२

त्यागेववागंधपुष्पाभ्यामाराधनमभितः पर्युक्षणपूर्वकंकृत्वापीठस्यावाहनावरणपूजानिवेद्यपर्यंतांकृत्वा
निवेद्यध्यानेहोमंसमाचरेत् प्रथमंप्रणवव्याहृतिपूर्वकंपीठमंत्रैःसकृत् आज्याहुतिंकृत्वाआवाहनमुद्रा।
ज्यं॰ नेमूलेनचतुर्वारमाहुत्वाअकारमकारउकारैर्विहितैस्त्रिभिर्हुत्वाजितंतेत्यादितत्तदुपचारमंत्रैर्हुत्वाततन्मूले
नचतुर्वारंहुत्वाषडंगमंत्रैर्हुत्वाततन्मंत्रैर्वर्णैर्हुत्वाकिरीटादिभिर्भूषणैरस्त्रादिभिर्भूषणैरस्त्रादिभि।
र्वीतत्रतत्रोक्तायुधैश्चहुत्वापुनरंगावरणैर्निमील्यधाम्यवसानैश्चहुत्वा आज्येनचतुर्गृहीतपूर्वकमृत्या
पूर्णाहुतिंमूलमंत्रेणवौषडंतेनहुत्वा ततस्तत्रोक्तद्रव्यहोमंसमारभेत् तत्रापिद्रव्यांतरारंभेचमंत्रांतरारंभे
चपूर्णाहुतिंकुर्यात् पुनर्होमावसानेमूलेनचतुर्वारंप्रसन्नपूजार्थमाज्यंहुत्वावृत्समापणब्रह्मार्पणमंत्रेण
चाज्यंहुत्वाव्याहृतिप्रणवेनचहुत्वा संस्रावंकृत्वाहोमंसमापयेत् पुनरग्नौप्रसन्नपूजांकृत्वाअग्नेर्मूलं नं॰
करणादिकंकृत्वासाध्यमाहूयते नाग्निसमर्चनादिकंकारयित्वातस्मूर्धिमूलमंत्रंजप्त्वाततस्माद
त्तिणांगृहीत्वाअग्निंविसर्जयेत् अथहोमद्रव्यपरिमाणंशारदातिलकोक्तप्रकारेणाभिलिख्यते। अथात्र
होमद्रव्याणांप्रमाणंतुविधीयते कर्षमात्रंघृतंहोमेशुक्तिमात्रंपयःस्मृतं कर्षंषोडशमाषप्रमाणं।
तद्द्विगुणाशुक्तिः उक्तानिपंचगव्यानितत्समानिमनीषिभिः तत्समंमधुदुग्धान्नमन्नमात्रमुदाहृतं भूमात्रौ
ग्रासमात्रंकर्षद्वयमात्रं दधिप्रसृतिमात्रंस्याल्लाजाः स्युर्मुष्टिसंमिताः पलद्वयंप्रसृतिः पृथुकास्तत्प्रमा
णाःस्युःसक्तवोपितथोदिताः गुडंपलार्द्धमानंस्यात्शर्करापितथास्मृताः ग्रासार्द्धंचरुमानंस्यादिक्षवः प
र्वावधिःस्मृताः एकैकंपत्रपुष्पाणितथाश्वत्थानिकल्पयेत् कदलीफलनारंगफलान्येकैकशोविदुः
मातुलंगंचतुष्खंडंपनसंदशधाकृतम् अष्टधानालिकेराणिखंडितानिविदुर्बुधाः त्रिधाकृतंफलंबि
ल्वंकपित्थंखंडितंद्विधा उर्वारुकफलंहोमेचोदितंखंडितंत्रिधा फलान्यन्यानिखंडानिसमिधःसदृशा

मा:
गुंजा व्रीहयो मुष्टिमात्रास्तु मुद्गमाषयवास्तथापि तंडुलाः स्थूलदर्धांसाः कोद्रवा मुष्टिसंमिताः गोधूमार
क्तकलमा विहिता मुष्टिमानतः तिलास्थूलकमात्राः स्युः सर्षपास्तत्प्रमाणकाः अकिंप्रमाणा लवणं म
गुग्गुल: री चान्यापि विंशतिः पूरं वदरमात्रं स्याद्रामवंत स्तमं विदुः चंदनागुरुकर्पूरकस्तूरी कुंकुमानि च तिंति
डी बीजमानानि स्मृतानि देशिकैः वैश्वानरं स्थितं ध्यायेत्सम्यग्घोमे तु देशिकः शयानमाशु होमे
तु निषण्णं शेषवस्तुषु आसीनं तर्जकृत्याहूहे हेर्विपाश्चित्सर्वकर्मसु कंठे होमे भवेद्व्याधिर्निर्वैथत्वमुदीरितं
प्रसोसं· म. नासिकायां मनःपीडा मस्तके धननाशनम् काष्ठानि कर्णौ धूमस्तु नासिकांगारकात्मुखाः भस्म मूर्द्धि
२२ मुखेज्वाला वितेया यत्र तत्र च स्वर्णसिंदूरवालार्ककुंकुमक्षौद्रसन्निभाः सर्वकर्मरतसौवर्णाः शुभ
नाः परिकीर्तिताः भेरीवारिदहस्तीद्रध्वनिर्वह्नेः शुभावहः नागचंपकपुन्नागपाटली शुष्विकानिभः
पद्मेंदीवरकल्हारसर्पिर्गुग्गुलसन्निभः पावकस्य शुभो गंधः स्तुक्तं तत्र वेदिभिः प्रदक्षिणास ... स्प
कंपाः छत्राभाः शिखिनः शिखाः स्वप्रभायजमानस्य राष्ट्रस्यापि विशेषतः कुंदेंदुधवलो धूमो वह्नेः
प्रोक्तः शुभावहः कृशः कृशगतेर्वर्णो यजमानं विनाशयेत् श्वेता रांडुनिहंत्याशु वायसस्वरसन्निभः
खरस्वरसमो वह्नेर्ध्वनिः सर्वविनाशकृत् इति गंधो ... भुजो होता ... खप्रदो भवेत् छत्रह ... नाशिखा ...
न्मः ... धनपरिक्षयम् शुकपक्षनिभो धूमः पारावतसमप्रभः हानिं तुरंगजातीनां गवां च कुरुते चिरात
एवं विधेषु दोषेषु प्रायश्चित्तानि देशिकः मूलेनाष्टेन ... विंशति माहुतीः अथास्य मातृका
सरस्वत्याः पूजार्थं मंत्रवक्ष्ये सर्वाश्च देवता यंत्रे खलु संपूज्याः तदुक्तं रामकल्पे यंत्रं मंत्रमयं प्रोक्तं
मंत्रात्मा देवतेरिता पुरा भगवता प्युक्तं तंत्रे संमोहनाह्वये देहात्मनोर्यथाभेदो मंत्रदेवतयोस्तथा राम
तस्मात्पीठे महायंत्रं लिखित्वा तत्र पूजयेत् विनामंत्रेण चेत्पूजा देवता न प्रसीदति कृमदीपि २२

कायामप्येवमेवोक्तम् शालिग्रामे मणौ यंत्रे स्थंडिले प्रतिमासु वा नित्यं शस्ताहरेत्कार्यां न तु केवलभूत
ले इति तस्माद्यंत्रप्रकारो लिख्यते व्योमादि तु चतुर्दशस्वरविसर्गार्णस्फुरत्कर्णिकं किंजल्कालिखि
तस्वरं प्रति दलं प्रागाद्यवर्गाष्टकम् त्वाविं वेन च सप्तमार्णवपुजाग्राशासु संवेष्टितं वर्णाब्जं शिरसि स्मर
तं विषगदप्रध्वंसि मृत्युंजयं अस्यार्थः प्रथमम् अष्टदलं पद्मं विलिख्य तन्मध्ये कर्णिकायां हकारसकारच
तुर्दशस्वरान् औकारविसर्गाणां कूटं स्यौः इत्येतद्विलिख्य तन्मध्ये साध्यनामयंत्रस्यापादीन् उपरि त्रिंश
पटले त्र्यंबकमंत्रविधाने प्रसंगाद्वक्ष्यमाणेन क्रमेण विलिख्य पुनरेतस्मात्कर्णिकावृत्तात् बहिरष्टसु
दिक्षु एकैकस्यां दिशि तिर्यक्रेखाद्वंद्वं स्वरेखाकृरूपेण विलिखेत् एवं विलिखिते षोडश दलरेखास
ख्या भवति तत्र द्वयोर्द्वयोरेखयोस्तिर्यक्रूपेण विलिखितयोरंतराले किंजल्ककेसरादिसंज्ञं भवति सर्व
यं मंत्रेपि केसरस्थानमिदमेव तत्र चतुर्दलपत्रे षोडशादिदलपत्रेपि अष्टदलपत्रोक्तरीत्या तत्तद्दलसंख्या
नुगुण्येन केसरस्थानसंख्यापि वर्द्धनीया इत्येव विशेषः एवं किंजल्कस्थानं संपाद्य तेष्टस्वकिंजल्कस्था षि^
नेषु षोडशस्वरवर्णान् सबिंदुकान् एकैकस्मिन्स्थाने द्वौ द्वौ विलिखेत् एवं सर्वत्र केसरस्थाने स्वरास्तत्र वि
मि^ धेयाः पुनरष्टदलेषु क्रमेण कवर्गं प्राग्दले विलिख्य तदनंतरदलमारभ्य क्रमेण चवर्गटवर्गतवर्गपवर्गं
यादिचतुष्टयं शादिचतुष्टयं लादिद्वयं च एतानि सबिंदुकान्यालिखेत् सर्वयंत्रविषयेपि दलेषु वा केस
रेषु वा कादिवर्गादालेखनविधौ सबिंदूनेव वर्णान्विलिखेत् यत्र यत्र केसरे कादिवर्णालेखनीया भवंति
तत्र सर्वत्र त्रयेणापयथास्थानं विभज्य तान्वर्णान्विलिखेत् स्वबाह्ये शिष्टान्वर्णान्समालिखेत् उपरि वक्ष्यमाण ए
योगयंत्रेषु वशीष्टान्वर्णांश्च विलिखेत् एवं सर्वत्र यंत्रन्यासः पुनरस्मिन्नेव प्रकृते मातृकायंत्रे पद्मविशेषोस्ति

पादिपञ्चकं

तत्र षट्सप्तमयोर्दलयोर्यादिपंचकं विलिख्य अष्टमे दले प्रथमतृतीयपंचमपंचदशषोडशस्वराणि
पंच विलिखेत् इत्येकेषामाचार्याणां मतः पुनर्बहिश्चतुरस्रं सशूलाग्रं विलिखेत् तत्र तु पत्र
त्र चतुरस्रलेखनविधिः तत्र सर्वत्रानुक्तेपि सशूलाग्रमेव चतुरस्रं विलिखेत् एवमत्र चतुरस्रं विलि
ख्य तस्य पूर्वादिदिक्चतुष्टये वमिति आग्नेयादिकोणचतुष्टये ठकारं अभावयम्बं सविंदुकं विलिखेत् एवम
प्र.सा. सं. २२ त्स्वरूपं यंत्रं साध्यशिरसि स्थितम् मुक्तिफलदं स्यादिति अस्मिन्नपि यंत्रे पीठार्चनं कुर्यात् अथ सकलदेवतामंत्रा
र्चने साधारणपीठपूजाविधानमुच्यते गं गुरुभ्यो नमः गं गणपतये नमः इति पीठस्य दक्षिणवामभागे
समभ्यर्च्य आधारशक्तये मूलप्रकृत्यै आदिकूर्माय अनंताय पृथिव्यै क्षीरसमुद्राय श्वेतद्वीपाय मणिमंडपा
यकल्पवृक्षाय श्वेतछत्राय नमः सितचामराभ्यां रत्नसिंहासनाय इत्येतैराधारशक्त्यादिभिः रत्नसिंहा
सनांतैर्मंत्रैः नमोंतैः सर्वाधस्तादारभ्य उपर्युपरिक्रमेण पीठमध्ये समर्चयेत् तत्र वैष्णवपीठविषये चेत् क्षी राज.
23 रसमुद्रस्थाने रत्नसमुद्रायेति योजयेत् शैवादिविषये तदुभयमपि नास्ति पुनरपि केवलवैष्णवविष
ये श्वेतद्वीपायेति तत्राप्यैश्वर्यप्रधानविषये रत्नद्वीपायेति योजयेत् शैवादिविषये तदुभयमपिना
स्ति (पुनरपि केवलवैष्णवविषये श्वेतद्वीपायेति तत्राप्यैश्वर्यप्रधानविषये रत्नद्वीपायेति योजये
त्) शैवादिविषये कैलासगिरये इति योजयेत् पुनरपि केवलशैवादौ कल्पवृक्षादयश्च न संति तत्रा
प्यैश्वर्यप्रधानविषये चेद्यथायोग्यं योजनीयं इतरत्सर्वदेवतापीठार्चनेपि तुल्यमेव पुनः धर्माय
नमः ज्ञानाय नमः वैराग्याय नमः ऐश्वर्याय नमः एतान्पीठपादरूपान् पीठस्याग्नेयादिको राम
णेषु समर्चयेत् तत्र कल्पांतरमते धर्मकंदाय ज्ञाननालाय वैराग्यकर्णिकायै ऐश्वर्यदलेभ्यो नम इति त्र २२

उं सोममण्डलाय

स्मिन्नन्ते उपर्युपरि कंदादीन् यथोचितस्थानेषु समर्चयेत् पुनः अधर्माय अज्ञानाय अवैराग्याय अनैश्व
र्याय एतानपि पीठस्य फलकरूपान् प्रागादिदिक्षु समर्चयेत् सं सत्वाय रं रजसे तं तमसे मां मायायै विं वि।
द्यायै अं अनंताय पं पद्माय अं सूर्यमंडलाय ^ मं वह्निमंडलाय अं आत्मने उं अंतरात्मने पं परमात्म
ने ॐ ह्रीं ज्ञानात्मने नमः सं सत्वायेत्याद्यैर्ज्ञानात्मने इत्येतैरास्तरणरूपैर्मंत्रैः पीठमध्ये समर्चयेत्
तत्र वैष्णवस्नानायामनंतापुनर्मध्ये अष्टदलं पद्मं विचिंत्य प्रागादिदलेषु कर्णिकायां च नवशक्तयश्च।
आसनमंत्रदेवताश्च समर्चनीयाः क्वचित्क्वचिदासनमंत्रो नास्ति तत्र सर्वत्र केवलपद्ममेव समर्चयेत् एत
त्पीठमंत्रं सर्वत्र समानमेव अयमेव सर्वदेवताविषये पीठार्चनन्यायः तत्र तु नवशक्त्यासनमंत्रा
णामेव सर्वत्र विशेषः एतत्सर्वं सकलदेवतापूजाविषयेऽपि तुल्यमेव च तत्र तु वैष्णवपीठं समर्चये
दित्युक्ते तन्नवशक्त्यासनमंत्रा एव विविच्यन्ते ताः तथा दौर्गे विनायके सौरादौ सारस्वते च अथ पुनरत्र।
मातृकाया नवशक्तयः उच्यंते मेधायै प्रज्ञायै प्रभायै विद्यायै धियै धृत्यै बुद्ध्यै विद्येश्वर्यै इति नवशक्त
यः ॐ ह्रीं वर्णाब्जाय सरस्वत्यासनाय नमः इति पीठमंत्रः एतास्तु अष्टसु केसरेषु अष्टौ शक्तयः नवमीं तु क
र्णिकायां देवतास्थाने एवमेव सर्वत्र नवशक्तिस्थानानि आसनमंत्रश्च कर्णिकायामेव एवं पीठं संपू
ज्य अस्मिन्मातृकासरस्वतीं मूलमंत्रेण समावाह्य आवरणैः सह समर्चयेत् प्रथमं मातृकाया अंगैः
प्रथमावरणे केसरेषु समर्चयेत् तत्प्रकारस्तु तत्र तत्रांगन्यासे उक्तमंत्रैः ज्ञेयः हृदयाय नमः शिरसे नमः
शिखायै नमः कवचाय नमः नेत्राभ्यां नमः अस्त्राय नमः इत्येवं प्रकारेण चतुर्थ्यंतत्वेन समर्चयेत् सर्व
त्रांगार्चनाविधावेवमेव न्यायः तत्र हृदयादिचतुष्टयमाग्नेयादिकोणचतुष्टयकेसरेषु पुरतो नेत्रं चैत
त्सु पुरतो नेत्रं च तत्सु दिक्षु अस्त्रं समर्चयेत् क्वचित्क्वचिद्यथा पूर्वादिदिक्षु हृदयादि दिक्ष्वस्त्रं यथाव

दि

राहादिविधानेंतत्र समभ्यर्चयेत्पूर्वेआग्नेयेऐशान्यनैर्ऋत्यादिषु हृदयादिवैसवेप्रागादीनि विशेषउक्तः
अंगावृतौसर्वत्रैवएवंस्थाननियमः ॥ तदुक्तं चाऽस्मिन्नेवप्रपंचसारे प्राक्कदीक्षापटले हृदयाद्यस्त्रि
षु पुरतोनयनं दिशांक्रमात् पुनरस्त्रं च समर्चयेत् ॥ क्रमादिति पुनरेतासामंगदेवतानां रोचींष्यु
च्यंते हारस्फटिककलायांजनपिंगलवह्निरोचिषो ललनाः अभयवरोद्यतहस्ताः प्रधानत
नवोंगदेवताः कथिताइति ॥ क्रमदीपिकायामप्येवमेवोक्तम् तेजोरूपास्तु हृद्धिरंगानि
चकेसरेषु समभियजेत् हुतवहनिर्ऋतिसमीरणशिवदिक्षु हृदादिवर्मपर्यंतं पूर्वादिदिक्षु वा
स्त्रं क्रमेणगंधादिभिः सम्यक्सुमनाः मुक्तेंदुकांतकुवलयहरिनीलहुताशनप्रभाः प्रमदाः
अभयवरस्फुरितकराः प्रसन्नमुखोंगदेवताः स्मर्यां इति तत्र तेजोरूपास्त्य स्यपदस्यपू
र्वेणान्वयः ॥ तत्र पूर्वादिदिक्नियमउच्यते पूज्यपूजकयोर्मध्ये पूर्वमित्यभिधीयते प्रादक्षिण्ये
नविज्ञेयाप्राच्याग्नेयादिकल्पना यत्रैव भास्वानुदयं प्रयाति प्राचीमिमां वेदविदो वदंति मध्ये तयोः पूजक
पूज्ययोस्त्र सदागमज्ञाः प्रवदंति तां तु रुद्रादीनामपिकल्पितदिक्क्रमेणैव पूजाक्रमः नतुयथास्थितदि
क्क्रमेणैव पूजाक्रमः नतुयथास्थितदिक्क्रमेण पुनः अंकंखंगंघंङंआंनमः इंचंछंजंझंञंईंनमः उंटंठंडं
ढंणंऊंनमः ऋंतंथंदंधंनंॠंनमः लृंपंफंबंभंमंलॄंनमः एंयंरंलंवंऐंनमः ओंशंषंसंहंऔंनमः अंलंक्षंअः नमः
एतेन सानुस्वारस्वरपूर्वकत्वेन वर्गाष्टकेण द्वितीयावृतिः पुनः ब्रह्माण्यैः माहेश्वर्यैः कौमार्यैः वैष्णव्यै वारा
ह्यैः इंद्राण्यैः चामुंडायै एताभिस्तृतीयावृतिः तत्र मातरः सप्तसंख्याकाः किलपूजाविषये तु सर्वत्राष्टसं
ख्यकाः तस्माद्वत्राष्टमस्थाने महालक्ष्मीं पूजयेत् महालक्ष्म्यै नमः इति क्वचिदन्यथासौरादिविषयेत्व

प्र॰सा॰ से २८

24

राम २८

कृष्णाय नमः इत्यष्टमस्थाने दुर्गादिविषये चंडिकायै इत्यष्टमी अन्यत्सर्वाष्टमीन महालक्ष्मी तदुक्तं
चास्मिन्नेव प्रबंधे ब्रह्माणी माहेश्वरी कौमारी वैष्णवी च वाराही इंद्राणी चामुंडाश्च महालक्ष्मीश्च मातरः प्रो
क्ता इति सर्वत्र मातृणामष्टसंख्याकत्वं प्रागुक्तं चास्मिन्नेव शास्त्रे त्रिगुणात्मिकायाः शक्तेः सकाशात्स
र्वस्य जगतउत्पत्तिकथनप्रकरणे यदष्टधा सा गुणितानतद्प्रकृतिभेदिनी अष्टादशाहि वस्त्राशा मात
मूर्त्यादिभेदिनी इत्यष्टसंख्येकानां प्रकृत्यष्टाक्षरादीनां मध्ये मातृणां परिगणितत्वात् तत्र मातॄणां
वर्णादयउच्यंते ॥ ताश्च श्वेता दवलयपुस्तकधारिण्यः ब्रह्माणी कनकवर्णा अक्षसूत्रकमंडलव
राभयधरा शूलपरशुडमरुभिकपालधरा माहेश्वरी अंकुशदंडखट्वांगपाशधरा कौमारी चक्रघंटाक
पालशंखधरा वैष्णवी मुशलवज्रखिटाभयधरा वाराही अंकुशतोमरपाशधरा इंद्राणी शूलकपा
लनृशिरः कृपाणधरा चामुंडा रक्तादर्शवीजपूरकपालपंकजधरा महालक्ष्मीः पुनर्व्यापिन्या
दिभिश्चतुर्थ्यंतैः व्यापिन्यै· पालिन्यै· चापिन्यै· क्लेदिन्यै· धारिण्यै· मालिन्यै· हंसिन्यै·
शांत्यै· इत्येतास्तु कलायुग्मशश्चाष्टवर्गाणीति मूलग्रंथस्य च पूरणाच्चतुर्थ्यावरणत्वेन
तास्तिविवरणकारैरुक्तम् पुनरिंद्रादिभिः पंचमी इंद्राय सुराधिपतये वज्रलिशधराय ऐरावतवा
हनाय सरस्वतीपार्षदाय नमः इति पूर्वदिशि उक्तविशेषणैः सहेंद्रं समर्चयेत् ॥ पुनः अग्नये तेजो
धिपतये शक्तिधराय मेषवाहनाय सरस्वतीपार्षदाय नमः ॥ यमाय प्रेताधिपतये दंडधराय महि
षवाहनाय सरस्वतीपार्षदाय नमः निर्ऋतये रक्षोधिपतये खड्गधराय प्रेतवाहनाय सरस्वतीपार्षदाय
नमः वरुणाय जलाधिपतये पाशधराय नक्रवाहनाय सरस्वतीपार्षदाय नमः वायवे प्राणाधिपत
ये अंकुशधराय हरिणवाहनाय सरस्वतीपार्षदाय नमः सोमाय नक्षत्राधिपतये गदाधराय पंच

वाहनायसरस्वतीपार्षदायनमः ईशानायविद्याधिपतयेत्रिशूलधरायवृषभवाहनायसरस्वतीपार्षदाय
नमः अनंतायनागाधिपतयेचक्रधरायकूर्मवाहनायसरस्वतीपार्षदायनमः ब्रह्मणेलोकाधिप
तयेपद्मधरायहंसवाहनायसरस्वतीपार्षदायनमः एतानींद्रादीन्लमादितत्तद्बीजपुरस्सरंउक्तविग्र
हांस्तत्रैवसर्वत्रयागादिषूर्ध्वतान्दिक्षुसमर्चयेत् यकारादयोष्टौवर्णाः वायव्यग्नीन्द्रवरुणेश्वर
रात्सेन्द्रश्वेतेशवीजानिभुवनेशीपाशवीजेचतत्तद्बीजयोगस्तुविवरणकारैरुक्तः षडुक्तंचास्मिन्ने
प्र॰सा॰ सं॰ वकल्पे इंद्राग्नियमनैरृतवरुणानिलशशिशिवाहिपतिविधर्मैः जात्यधिपहेतिवाहनपरिवारयुजः
२५ तां क्रमेणयष्टव्याः इतितत्रकश्चित्कश्चिदनंतालोकपालाः अस्मिन्शास्त्रेतुअहिपतिविधयइतिविशेषता ॥
काः क्रमदीपिकायामप्येवमेवोक्तम् हरिहव्यवाड्तरणिजनपाशवायुसोमशिवशेषपद्मजा
न्प्रयजेत् स्वदिक्षुमलधीरिति तत्रतुसरस्वतीइज्याविषयेचेत्सरस्वतीपार्षदायेतियोजयेत् इतरत्रतुत
त्तद्देवतापार्षदत्वेनयोजयेदितिविशेषः पुनरेतेषामिंद्रादीनांरोचींषिउच्यंते पीतःपिंगःकृष्णोधूम्रःश्वे
तश्चधूम्रसितशुक्लाः काशारुणांवुजाभालोकेशावादयःप्रोक्ताः एवंक्रमेणतेषांरोचींषिध्येयानि। सवा
क्रमदीपिकायामप्येवमेवोक्तं कपिशकपिलनीलश्यामलश्वेतधूम्रामलसितशुचिरुक्मावर्णानां।
वासवाद्याः कार्कमलविराजत्वायुधादिव्यवेषाविविधमणिगणास्वकुत्रस्फुरद्भूषणाढ्याः इतिलो
कपालइज्याविधौसर्वत्रैवमेवन्यायः पुनस्तत्रतुयत्रयत्रावृत्तिविधौइंद्रादिभिरेवस्यादावृत्त्यवसानमुच्यते
इंद्रादिभिस्तृतीया इंद्रादिभिःपंचमी इतिपंचावरणमीरितं इंद्रादिभिःसप्तमी इतिसप्तावरणमीरितं।
म् इत्याद्येवंप्रकारेणतत्रापियत्रपुनः इंद्रादिभिश्चतुर्थी इंद्रादिभिःषष्ठी इत्येतावदेवोक्ताश्चावर राम २५

णावसानग्रहणं च न क्रियते तत्रोभयत्र एतैर्वर्णायुधवाहनपरिवारादिविशेषणैर्विशिष्टानामेवेन्द्रा
दीनां समर्चितत्वात् वज्रादयो न पृथगावरणे समर्चनीयाः यत्र पुनरिन्द्रादिभिः पंचमी वज्रादिभिः षा
ष्ठी इन्द्रादिभिः वज्रादिभिरष्टमी इत्यादि एवंप्रकारेण वज्राद्याहृतिः पृथगेवोच्यते तत्र तु सर्वत्र यद्यपि व
ज्राद्यायुधाकृतिविशेषणयुक्ता एवेन्द्रादयः समर्चिताः तथापि वज्रादयस्तु पृथगावरणे समर्चनीयाः
तत्प्रकार उच्यते वज्राय शक्त्यै दण्डाय खड्गाय पाशाय अंकुशाय गदायै त्रिशूलाय चक्राय न
लिनाय एतानीन्द्रादीनामस्त्राणि प्रागादिक्रमेण समर्चनीयानि तदुक्तं चास्मिन्नेव कल्पे वज्रं शक्तिर्द
ण्डं खड्गपाशांकुशौ गदाशूलौ रथचरणनलिनसंज्ञौ प्रोक्तान्यस्त्राणि लोकपालानां क्रमदीपिकायाम
प्येवमेवोक्तम् दम्भोलिशक्त्यभिधदण्डकृपाणपाशचक्रांकुशाह्वयगदात्रिशिखारिपद्माः अर्च्या बहिर्नि
जसलाञ्छितमौलियुक्ताः स्वस्वायुधाभयसमन्वितपाणिपद्मा इति एतेषां रोचींष्युच्यन्ते पीतहिमजलद
गगनाचिरप्रभासकुन्दनीलरुचः करवन्दारुवर्णाः प्रोक्तास्तु वर्णतोपि वज्राद्या इति क्रमदीपिकायाम
क्रमं कनकरजततोयदाकृतिः एवं दिनशो मातृकास्वती? यजेत् अथ सकलदेवतापूजासामा
न्यक्रमं वक्ष्ये तत्र पूजा पंचविधा तदुक्तं च मंत्रदेवताप्रकाशिकायाम् अभिगमनमुपादानमिज्या
स्वाध्यायो योग इति श्रीपंचरात्रे पंचविधमभिहितं तत्र अभिगमनं नाम देवतास्थानमागत्य संम
र्जनोपलेपनादि निर्माल्यनिर्हरणादिकरणं उपादानं नाम गंधपुष्पादिपूजासाधनसंपादनम् इ
३ ज्या नाम पीठपूजादिकप्रधानदेवतापरिवारदेवतापूजनम् स्वाध्यायो नाम अर्थानुसंधानपूर्वकं म
म न्त्रजपसूक्तस्तोत्रपाठनामकीर्तनम् तत्त्वप्रतिपादकशास्त्राभ्यासश्च योगो नाम देवतास्वरूपं स्व
स्वरूपं देवतामूर्तिरूपं स्वस्य मूर्तिरिति भावना एवं पंचविधप्रकारपूजानां सालोक्यसामीप्यसारू

श्रु.मा.
सं.
२६
26

सार्द्धमापुञ्जपद्माणि पंच फलानि यथाक्रमं भवंति इत्येतच्चपंचरात्रे भिहितमिति तत्र प्रथमं शाक्तस्मिन्नेव।
मातृकाविधाने आदौ सामान्येन सकलदेवतासाधारणजपपूजारंभविधिरुक्तः किल तेन प्रकारेण स्नात्वासने उप
विश्य सर्वं गुरुगणपतिवंदनादिकं कृत्वा पूजामारभेत् तत्र तावत्सकलदेवतापूजासाधारणशंखपूरण
विधिः क्रमदीपिकोक्तप्रकारेणावदयते आचम्य प्रविशो गोमयांभसा स्थंडिलं निजमूलमंत्रविशुद्धम् न्यस्ततत्र
विहितासदोंभसाणांत्वमंत्रमनुनाविशोधयेत् तत्रांघसमनोतनानयोनिलिपेद्धृदयमंत्रमुच्चरन् ह
प्रयेद्दिमलपाद्यसामधीरतरैः प्रतिगतैः शिरोंतकैः पीठमावमलिलेषु मंत्रविद्वह्निवासरनिशाक
तोक्रमात् मंडलानि विषकस्त्रवोलैरर्चयेद्धदनधूपदीपितैः तत्रतीर्थमनुनाभिवाहनं तीर्थं । ये =
रुचिमंडलात्पुनः स्वीयहृत्कमलतो हरिततर्णागालिनीं चाशिवमाप्रदर्शयेत् तज्जलेन पनमंत्रको
लितं वर्मणाप्समवगुंठ्यदोर्युजा मूलमंत्रसकलीकृतमसेत् अंगकैश्च कलयेद्दिशो विशः अस्त्रता
दिपुतमच्युतीकृतं संस्पृशन् जपतु मंत्रमष्टशः किंचनतिपत्तवर्द्धनीजले शोदयेत्रिजततं तेनमुना
त्रिष्करेण मनुनाविलिं तत्पसाधनं च अस्त्रमचंदनादिकम् शंखपूरणविधिः समीरितो गुप्त एष यजा।
नाम्नणीरिह गंगे च यमुने चैव गोदावरि सरस्वति नर्मदे सिंधु कावेरि जलेस्मिन्सन्निधिं कुरु एष ती
र्थमंत्रः प्रोक्तोङ्कुशितो चनिवारणः कनिष्ठांगुष्ठकौ सक्तौ करयोरितरेतरम् तर्जनीमध्यमानां।
मास्तंहतामग्नसन्नितः मुद्रैषा गालिनी प्रोक्ता शंखस्योपरि चालिता इत्यंतानांग्रपानामयम
र्थः प्रथमं निजासने उपविश्य तत्पुरतो गोमयांभसा स्थंडिलं शल्यवाचा मंडलं विलिप्य।
पुनर्थ्ययद्देवताविषयपूजा तन्मूलमंत्रस्य ये षडंगमंत्राः तेषामंते यो स्त्रमंत्रः अस्त्रा
यफडित्यंतः तेनास्त्रमंत्रेण शंखं प्रक्षाल्य पुनस्तस्मांगामसहृदपमानोके हृदपायनमरत्यंतेन। राम २६
ने ^

नमंत्रेण शंखे गंधपुष्पाक्षतादिभिः संपूज्य पुनः मातृकावर्णान् प्रतिलोममुच्चार्य तदंते सर्वांगमंत्राणां मध्ये ।
शिरःस्थाने उक्तं शिरसे स्वाहेत्येतं मंत्रमुच्चरन् जलेन शंखमापूर्य पुनः विषशब्दवाच्येन मकारेण वदनसर्व
पदवाच्यबिंदुयुक्तेन मं वह्निमंडलाय दशकलात्मने नमः इत्येवं शंखपीठं समभ्यर्च्य पुनः ककारेण सू
चितं मातृकान्यासे शिरःस्थाने उक्तम् अकारं तदपि वदनसर्वपदवाच्येन बिंदुनायुक्तं वामरकमंडलपदो
त्तरं च अं सूर्यमंडलाय द्वादशकलात्मने नमः इत्येवं प्रकारेण शंखं समभ्यर्च्य पुनः श्रवणाद्वस्सूचितं मातृ।
कान्यासे श्रोत्रस्थाने उक्तं उकारं तदपि वदनसर्वपदवाच्यबिंदुनायुक्तं निशाकरमंडलपदोत्तरं च उं सोम
मंडलाय षोडशकलात्मने नमः इत्येवं प्रकारेण शंखस्थजलं समर्चयेत् गंगे च यमुने चैव गोदावरि सरस्वति
नर्मदे सिंधुकावेरि जलेऽस्मिन् संनिधिं कुरु इत्यनेन तीर्थमंत्रेण तीर्थमादित्यमंडलात् शंखे समावाह्य पुनः हृद
यकमलाद्दिष्टं च साध्यमंत्रेण तस्मिन् जले समावाह्य पुनः सर्वांगमंत्राणां मध्ये शिखायै वषट् इत्येतेन शि
खामंत्रेण गालिनीमुद्रां तस्मिन् जले प्रदर्शयेत् गालिनीमुद्राप्रकारस्तु कनिष्ठांगुष्ठकौ सक्तौ कारयोरिनर
क्षि^ तरं इत्यादि प्रकारः पुनः सर्वांगमंत्राणां मध्ये नेत्राभ्यां वौषट् इत्येतेन मंत्रेण तत्तुल्यं संवीक्षयेत् तद् नं निरी
क्षणं नेत्रमंत्रेण न चेन्मूलमंत्रवित् पुनः सर्वांगमंत्राणां मध्ये वर्मस्थाने उक्तं कवचाय हुं इत्येतेन कवचमं
त्रेण तत्तीर्थं हस्तद्वयेन सम्यगवगुंठ्य अधोमुखेन गृहीतं तर्जनीद्वयेन परितो भ्रमणमवगुंठनमुद्रा पुनस्तत्तीर्थ
देवतां तत्र मूलमंत्रं व्याप्तिकेन सकलीकृत्य मूलमंत्रस्यांगैरंगन्यासं च कृत्वा अस्त्राय फट् इत्येतेन दशदिग्बंधं
कुर्यात् पुनः स्तनादियुक्तं सम्पुटस्वरूपीकृतं तज्जलं स्पृशन् मूलमंत्रमष्टवारं जपेत् पुनस्तज्जलं किंचिदुद्धृ
त्य तद्वर्द्धनीपात्रे निक्षिपेत् अवशिष्टेन निजतनुं संप्रोक्ष्य पुनः अवशिष्टेन तीर्थजलेन त्रिवारं मूलमंत्रमुच्चरन्

द्वप

जल
यत्क्रमस्तमादीन्संप्रोक्षयेत् एवं प्रोक्षणविधिः अर्घ्यादिपात्रनियमस्तु गौतमीये सर्वस्य त्रीणि पा
त्राणि पाद्यस्यापि त्रयं भवेत् तथैवाचमनीयानि पात्राणि च विभागशः तथा करणदौर्वल्यादेकमेव
प्रशस्यते विहाय शंखं कर्तव्यं मध्ये शंखः प्रशस्यते सर्वपूजासाधारणोयं एवं शंखप्रोक्षणं कृत्वा पुनस्त
द्वर्द्धनीपात्रजलं शंखे किंचित्क्षिप्यते न जलेन प्रथममात्मपूजां कुर्यात् आत्मा स्वरूपार्थं पुनरावाहनार्थं चत
प्र·स्ता सं· २२ दुक्तं चाग्निवस्याकल्पे नारुद्रो रुद्रमर्चयेत् नाविष्णुर्विष्णुमर्चयेदिति पुनरपि तत्रैवोक्तम् आत्मशुद्धिं
कृत्वा हृदयकमलस्थस्यान्तर्यामिणो अभिव्यक्तिं संपाद्य दीपाद्दीपान्तरमिव अरणीमथनेनापि व्य
क्तमग्निमाहवनीयादाविव हृदयकमलात्प्रतिमामावाहयेदिति अथात्मपूजाविधिस्तत्र समन्वयाय स्य
प्रकारेण लिख्यते न्यासक्रमान्निजतनौ प्रजपेत् पीठं हृद्वारिजान्निसमर्च्य परं महस्तत् आधारमस्य गणमही
सितिनिरंजनांशो रिष्ठानयेत्प्रणवताक्रमवित्तदेकं आयम्य वायुमणुना सकलीक्रियां च कृत्वास्तनाद्युपह
तीः क्रमशः समर्च्य तारोपचारान्निजमूलतदक्षराद्यैः न्यासक्रमाद्भियजेज्जलगंधपुष्पैः मूलेन गंधरस
लिप्ततनुर्मुरारौ स्वं मूर्तिपंजरपदे षणाभिर्द्विबिन्दुः भाले गले सयुगले हृदि पंचमं त्रैरीशोन्तलिप्तपरो द्वि
वमूलतो यं मूलेन मूर्ध्नि मनुनानिखिलेन पंचकृत्वः किरीटमनुना च रथांगपाणेः न्यासे च आत्मके न त्रि
समां जलिमीश्वरे च कृत्वाय जेद्विविधसूनवरैरथेति श्वेतारुणक्रमकृतोभयपार्श्वयोगान्कुर्यात्तु
रौद्रितुलसीकुरवीरपद्मान् नाम्भात्मवित्वपत्रिकेषद्रोणमंगेशोषाणि वैकपुगरवकमेतदिष्टं धूपं च दी
पं च समर्प्य तस्मै नैवेद्यवद्यापराचित्तसुधां च यम् दत्वार्चयित्वा परितो ममचैनं लयांगनिहृं च समादधीत २। • राम
त्यात्मपूजाया समन्वयोक्तो मूलग्रंथः अस्य विवरणमिदानीमात्माराधनमाह न्यासक्रमादिति हृद्वारिजन्म २७
नीति हृत्पद्मे समर्च्यं परं महस्तत्त्वं टिमाकृतास्मिन्परिकल्पयेत् यत्र कल्पनामात्रं चेदिहापि कल्पनेवतत्रावा

मूलमंत्रेण ९ =

(margin) मूलाधारान्मारहृदय समर्प्य प्रणवमंत्रः ३८

हृन्नादिकृतं चेदिहापि तत्कर्त्तव्यं नात्र विग्रहः किं तत्तेजोरूपमेवेति परमं महस्तदिति यदेवोक्तम् मू
लमंत्रेणैव समर्चनं आधारभांज्यने महोसीति तदेव मांत्रं महो मूलाधारे हृदये पुनर्भ्रूमध्ये ब्रह्मरंध्रे वा
तदीयपद्मकर्णिकायां प्रणवांशैरकारादिभिस्तारपुटितैर्विहृत्य तैरेव जलगंधादिभिः पूजयेत्
पीठपूजायां कृतायां मूर्त्तिपूजां कृत्वा तस्मामाधारत्रयमपि शक्त्यांशैर्विभाव्य पुनर्हृदि मांत्रं महः पू
जनीयक्रमवित्यदैतैन तत्सर्वमुक्तम् प्रणावतस्तदैक्यं नयेदिति ह्रातं प्रणवमुच्चरन् मूलाधारगतं।
महसो हृदयवर्धिनीवारश्वकाभतयोऽमनम् तदातन्महसैकीभावः ततस्तत्तदुपर्याधारावधितं।
य्योऽमनं तथा च तदूर्ते नैकीभावः पुनर्द्वादशांतावधितत्क्रमयोऽमनं च विभावयेदिति भावः पुनर्मूलमं
त्रेण त्रिवारं प्राणायामं कृत्वा देहत्रयव्याप्तिं विभाव्य व्यापकं कृत्वा गंधपुष्पाक्षतैः सकलीकुर्यात् जलगंध।
पुष्पैरिति तदीयानां ग्रहणम् तत्र पुष्पानंतरं किंचित्कर्त्तव्यमस्तीत्याह मूलेनेति लिप्तेति मूर्द्धादिपादांतं
गंधार्द्रकरतलद्वयेन व्यापकाभिप्रायं मूर्ध्नोरसि हृदि बद्धिर्मूर्त्तिपंजरपदेष्वनुलिंपत्विति संबंधः द्वादशनाम
त्तिमंत्राः केशवनारायणादिमंत्राः ततस्थानानि च मूर्लीककूर्दोर्हृल इत्यायुक्तानि द्वादशार्णमंत्र योग
स्त्विहापीष्यते द्वादशार्णेति वासुदेवद्वादशाक्षरीः तत्पर्यः ऊर्ध्वपुंड्रानुलेपनं चैतत ईशो भाले गलेंसपुरु
ले हृदि पंच मंत्रैरनुलिंपत्विति ईशानादिपंचब्रह्माणीह पंचब्रह्ममंत्राः तिर्यक् त्रिपुंड्रानुलेपनं चैतत षड
नं मात्मानमभ्यर्च्य तत्पूर्वोपविष्टेरालिप्य पुंड्राणि ललाटमध्ये कंठे च बाँसहितपार्श्वते न हृदंतरे पंच च पवित्रा
दे णीति पुनर्भस्मनि तेपोपि कार्य्यः यथोक्तं केवक्रे हृदि गुह्ये च पादयोर्वदनेषु च ईशादिपंचमंत्रैस्तनि
लि वेद्भस्म मंत्रितं अष्टत्रिंशत्कलार्ण्येन द्वादशान्ताभिरेव च जप्ताप्पि हृदये तेन ताभिर्दिस्तु निलिपेदिति ।

प्र॰ सा॰
सं॰
२८

28

त्वाचम्यविधानेनतस्नानं तदंचैवंकृत्वा सगंधपिपिवेरित्याद्युक्तनयेनतेनभस्मनैव सर्वविधायपुनराचि
विधानेनाचम्यसरयग्रहंप्राप्यैतादि सर्वंकार्यं पुनरिहचैतावद्विधेयमितिपरेष्विति म॰लत इति हरिह
दुरादिषु एवंगंधरस्मालेपनस्र्वकंभाल्लगलादिपंचस्थानेषु म॰लतोनुलिंपत्वित्यर्थः दुर्गायांहरिवा
स्कंदगणाधिपयोः शिववत् इतरयोस्तिर्यकूर्ध्वपुंड्र विकल्प इति किराटिमनुनाचेति स्याणवात्मकोणा
नुनाचेति अत्रापिपंचकृत्व इति संबोध्यते स्याणवात्मकः स्याणुमंत्रः विविधस्तनवैरितियन्दित्यन्वयः ओं
विविधानिस्तनवराणि विशिष्टकुसुमानि इति शेषः वक्ष्यमाणप्रकारार्थः तदेवाह श्वेतारुणेति हरेस्तुल।
सीकरवीरपद्मानुनाभ्यात्माविल्वविधिकुर्यादित्यन्वयः पादतलादिनाभ्यंतं तुलसीद्वयं तदादिहृत्स्थानं करवीरद्वयं
तदादिचिलुपर्यंतंपद्मद्वयंचकुर्यात् श्वेतारुणकं कृतोभयपार्श्वयोगानितितेषांतत्कालविशेषणं श्वेतारुण ८
कृमेणकृतउभयपार्श्वयोगोयेषामितिसमासः यथातुलसीद्वयेश्वेततुलसीपादतलादिनाभ्यंतंदक्षिण।
भागेरक्ततुलसी वामभागेकुर्यादित्यादि दक्षिणवामकरयोर्गंधाद्ईश्वेतरक्ततुलसीद्वयंपृथगादायप्रणवो
दितिं एवंकरवीरद्वयंपद्मद्वयमपिकेषडितिषड्मानिकुसुमानिकुर्यात् प्राग्वद्विशेषयोजनादक्षिणकरेश्वे
ततुलसीकरवीरपद्मनिचयंवामकरोत्ततुलसीकरवीरपद्मनिचयंचादायतेनैवमंत्रेणचिह्नपादिकेशावधि
कुर्यादितिभावः अशेषमंगेशेषइति अशेषइतिपदंकरद्वयेनोद्धावचंकुसुमनिचयमादायतेनैवमंत्रेणपादतला
दिकेशांतमाशंधयेदितिभावः श्वेतरक्ततुलस्यायसंभवेपितन्नप्तिपत्तैचतुलसीमात्रेनाप्येतत्कार्यं शिवेकथुग
पूर्वकमेतदिष्टमितितुलसीद्वयस्थानेअर्कद्वयंपुनः करवीरद्वयंपद्मद्वयंचएवमेतत्तुअशूरणमागमविद्भिः दृष्टव्य राम
मित्यर्थः दुर्गायांहरिवत् स्कंदविघ्नेश्वरयोः शिववत् हरिहरौसमुच्चयः पार्श्वस्तरि विकल्पः पुष्पेज्यातावदे २८

उभयात्मकमूर्तौ १८ हरिहरपुजे १८

वमुक्तं पुनर्धूपादीन्याह धूपं चेति तारोपचारं निजमूलतद्दत्तं एवैशित्यन्तु वर्णितमेव मुद्रयैवमाना।
मितिवोध्यं निवेद्यन्तु आपरचित्तसुधार्घ्यदत्वेति शं वेजलं गृहीत्वा तच्छुध्यानि वेद्यं समर्पितामीत्यमूलो।
नापीष्टा तत्प्रणवोपचारं मूलं पूर्वकं सर्वरसमयमर्घ्यं समर्प्यामीति स्वात्मनि देवे तुष्टोकरितःस्म ते
ततेजाः सिद्धकृत्वि वतच्छिरसि विनियोगविधियासमर्पयेदिति भावः पुनर्मानसपूजां कुर्यात् अर्चयित्वेति
प्रसन्नस्त्वलोकापरितोष्यतितां ताम्बूलादि समर्प्य णां पुष्पांजलिं जपस्तुति प्रणामाद्यैर्मनसा शक्तितोनु
ष्ठेयमित्युक्तं लयांगनिवेशं च समादधीतेति समस्ताविद्यादित्यर्थः ब्रह्मार्पणं प्रसन्नाघ्यैमेवमानी यार्घ्ये
चरुत्वालयांगेनात्माराधनं समापयेदिति भावः एतदुक्तं भवति सप्तदशपटले गोपालकविधाने वक्ष्यमा
णोपीठन्यासस्थानेषु निजदेहे पीठमंत्रैः जलगंधादिभिः समभ्यर्च्य तत्पंक्तु चितिं पतिं जप नु हृदहृदूर्ध्वति।
मूलचक्रा उदस्य परमात्मनि संविलाप्य मंत्रात्मना परिणामयन् स्वधी हृद्ब्रह्ममध्ये ध्यायेजपेत्तन्मादिमंत्र
प्रणायि मादिमनुरिति प्रणवसाहितमूलमंत्रः तस्य प्रलैङ्गिकविग्रहमयविग्रहात्मभावत्कमात्या। सोऽहं
रणतिविधिवद्विधाय हृत्पुण्डरीके चैनं वक्ष्यमाणन्यायेन पञ्चादिसमष्टिनिवेश्य विन्यसतामिन्यारिकल्प
येच्च मात्रे चिदानंदघनं महस्तदिति मंत्रोदयं प्रोक्तं तन्महः हृत्पद्मे समर्चयेत् तत्र मंत्रोदयं परिकल्पयेत्
तत्पत्रकलनामात्रे चेदिहापि कल्पनैवकर्तव्या तत्रावाहनादिकृतं चेदिहापि स्यादावाहनादिकल्पनासम
र्चनीयं पुनर्मूलाधारे हृदये भ्रूमध्ये वा ब्रह्मरंध्रे वा ततस्तत्पद्मकर्णिकायां ध्यानत्रयं पीठं संस्थाप्य हकाररे
फरेकाररूपैः शाक्तं शैवाधारत्रयं संभाव्य तत्र स्थूलसूक्ष्मात्वं उरूपान् यथाक्रमेणात्मनोरूपान् ध्यात्वा
अकार उकार मकारैः तारपुटितनमोन्तैः विहितैरेव मंत्रैः पूजयेत् ॐ अं ॐ नमः ॐ उं ॐ नमः ॐ मं ॐ नमः
इति ततः स्वतत्प्रणवमुच्चरन् मूलाधारगतमहसः हृदवधिनीवारसूककामतयोद्गमनं तदा तन्महसैकी
॥

भावंचसंभाव्यततोहृदाधारगततेजस्समस्तंतदुपरिकल्पितमूर्त्तमध्याधारेवाब्रह्मरंध्राधोधोवातदवधिनीवारश्र
काभतयोद्गमनेनसंविभाव्यतन्महसैकीकृत्यपुनर्मूलमंत्रेणत्रिवारंप्राणायामंकृत्वाष्टलादिमर्त्तित्रयस्या
ऐक्यंसंभाव्यततोमूलाधारादाब्रह्मरंध्रपर्यंतंदंडायमानंततोनूपुरस्थालातंतेजः स्मृतप्राणावेनशून्य
येत् पुनस्तन्महः हृदयकमलेसंभाव्याभीष्टमंत्रात्मनापरिणामय्यमूलमंत्रेणप्राणायामत्रयंकृत्वा
पुनः मूलमंत्रेणव्यापकत्रयंकृत्वाऽंगन्यासात्पृथग्न्यासैः सकलीकुर्यात् ततः आसनादिषुपंचांगानक्र
पु॰मा॰ मेणदत्वा ॐनमः अंनमः उंनमः मंनमः ॐनमः इतिसमभ्यर्च्य जितंतेइत्यादितत्तदुपचारमंत्रैरभ्यर्च्य अभी
स्तं॰ ष्टमंत्रेणचाभ्यर्च्य अभीष्टमंत्राक्षरैस्तन्न्यासस्थानेषुसमभ्यर्च्यांगमंत्रेणतत्तत्स्थानेषुचसमभ्यर्च्य आवरण
२९ निभूषणानिचसमभ्यर्च्य श्रियैनमः पुष्ट्यैनमः इतिदेवताहृदयेसमभ्यर्च्य पुनर्गंधरसालिप्तहस्तेनता
लद्वयेनमूलमंत्रंजपन्व्यापकंकृत्वा गंधेनद्वादशाक्षरमंत्रवर्णाश्रयैः केशवादिद्वादशनामभिः ल
लाटादिस्थानेषुऊर्ध्वपुंड्रंधारयेत् भालोदरहृत्कूलकूर्परतलेवामेतरपार्श्वभुजादिगलेवामत्रपृष्ठकाऊ
29 त्सुतथाम्रर्द्धन्यपिषड्गुणवर्णमन्त्ररीतिस्थानानिपुनर्द्वादशाक्षरमंत्रंसकलमुक्त्वाऽत्रषोडशस्था
नेशिरसिधारयेत् शिवविषयेईशानादिपंचमंत्रैः भालेगलेंसयुगलेहृदिभस्मनातिर्यक्त्रिपुंड्रंकुर्या
त् तदुक्तंच अर्चनसमभ्यर्च्यसुगंधपिष्टेनालिप्यपुंड्राणिललाटमध्ये कंठेचवामदक्षिणयोर्मितेनहृदंतरे
पंचपवित्रमंत्रैरीति पुनर्भस्मनितद्देपायिकार्य्यः तदुक्तंच केवक्त्रेहृदिगुह्येचपादयोर्वदनेषुच ईशानादि
पंचमंत्रैस्तन्निः क्षिपेद्भस्ममंत्रितम् अष्टविंशत्कलास्थानेष्वादरात्ताभिरेवच जन्हाग्निहृदयंतेन
रक्षार्थंदिक्षुनिक्षिपेत् अग्निहृदयमिति अग्निरितिभस्मेत्यादिमंत्रः अग्निबीजंवाअष्टत्रिंशत्क राम
लाः पंचविंशत्पटलेवक्ष्यंते स्नानाचमनविधानेतदन्यंतंतरंचैवंकृत्वामंगपीठेरित्यायुक्तनयेन॥ २९

भस्मनैव सर्वं विधाय पुनरपि विधानेनाचम्य अमरोऽहं भावयेत्यादि सर्वं कार्यं पुनरिहात्मार्चनानुविधाव
ष्यैतत्सर्वं कार्यमिति हरिहरादिषु एवं गंधरसालेपसर्वकं मालादिपि च स्थानेषु मूलमंत्रेनानुलिंपेत् दुर्गा
यां हरिवत्सकंदगणपत्योः शिववत् हरिहरेशानामिति निर्णयः गंधपुष्पं तु विकल्पः इति मर्दनि पंचवारं पुष्पांज
लिं कुर्यात् पुनः विशेषविषये श्वेततुलसीं दक्षिणहस्तेन कृष्णतुलसीं वामहस्तेनादाय मूलमंत्रमुच्चार्य।
तुलसीद्वयं समर्पयामीति पार्श्वद्वयेपि पादादिकटिपर्यंतं यजेत् एवं श्वेतकरवीरं दक्षिणहस्तेन रक्त
करवीरं वामहस्तेनादाय मूलमंत्रमुच्चार्य करवीरद्वयं समर्पयामीति पार्श्वद्वये कट्यादिकंठपर्य
तं यजेत् एवं श्वेतपद्मं दक्षिणहस्तेन रक्तपद्मं वामहस्तेनादाय मूलमंत्रमुच्चार्य पद्मद्वयं समर्पयामी
ति पार्श्वद्वयेपि कंठादिब्रह्मरंध्रपर्यंतं सर्वांगेषु संयजेत् श्वेतकसर्वाणिकुसुमानि हस्ताभ्यामादाय मू
लमंत्रमुच्चार्य पादादिब्रह्मरंध्रपर्यंतं सर्वांगेषु संयजेत् शिवे तु लाक्ष्यानेत्रर्कद्वयमिति विशेषः मू स्पाः ९४
लमंत्रेण धूपदीपौ मुद्रया दत्वा मूलमंत्रमुक्त्वा सर्वां समर्पयामि पराचित्स्य पार्श्वे दत्वा पुनः अमरोऽहं दत्वा
ब्रह्मार्पणं च समन्त्रार्घ्यं च अवसानीयार्घ्यं च दत्वा लपांगं कृत्वा अहं नो मम मां वा स्मरन्नामारमेत एवमा
त्मानमभ्यर्च्य गंधपुष्पादिभिरलंकृत्य पुनरपि तद्वर्द्धनीपात्रस्थमलेशं लेकिंचिद्दिक्षिप्य तेन जलेन अ
स्मिन्नेव पटले प्रागुक्तेन क्रमेण पीठपूजां कुर्यात् पुनस्तथैव गंधपंकेनापि तेनैव पीठमंत्रेण समर्चये
त् पुनः पुष्पैश्च समर्चयेत् पुनस्तत्पीठमंत्रान्सर्वान् जपन् धरसीत्यादिवत्प्रमाणमंत्रं वा जपन् गंधा
दिभिः समर्चितघंटां वामकरेण वादयन् धूपं प्रदद्यात् पुनरेकवारं शंखे जलं दत्वा धूपमुद्रां च ॐ।
धूपं कल्पयामीत्यनेन मंत्रेण प्राङ्मानसपूजोक्तविधिना प्रदर्शयेत् पुनरपि तेनैव पीठमंत्रं जपेन वा उद्दी

पंखेत्यादिवक्ष्यमाणदीपमंत्रजपेनवादीपंचतथैवचंवंवादयन्प्रदर्श्यपुनरपि तत्क्षीरजलेदत्वादीप
मुद्रांचतन्मंत्रेणाष्टाभिः मानसपूजोक्तविधिनाप्रदर्शयेत् पुनस्तस्मिन्पीठेदेवताविग्रहंसममभिषिच्य
निधायएककवारंमूलमंत्रेणपुष्पमाराध्यकेवलंमन्त्रविग्रहस्वरूपंसंभाव्यतस्मिन्नेवतांसमावाहयेत्
तत्रआवाहनविधानमुच्यते त्रिवारंप्रणवपूर्वकं जितंतेपुण्डरीकाक्षनमस्तेविश्वभावन नमस्ते
प्र॰ मा॰ स्तुहृषीकेशमहापुरुषपूर्वज इत्येतेप्रणवपूर्वकंमूलमंत्रमुच्चरेत् अनेनमंत्रेणवैसर्वा
सं॰ देवतांसाक्षात्पुष्पहस्तआत्मनःसमावाहयेत् शैवदेवतावाहनंचेत्त्रिवारंप्रणवपूर्वकं नमो
३० स्तुस्थाणुभूताय ज्योतिर्लिंगामृतात्मने चतुर्मूर्तिवपुःछायाभासितांगायशंभवे इत्येतस्मंत्र
मंते प्रणवपूर्वकंमूलमंत्रमुच्चरेत् अनेनमंत्रेणसमावाहयेत् विनायकंचेत्पूर्ववदेवत्रिवारंप्र
णवपूर्वकंगणानांत्वागणपतिमित्यृगंतेप्रणवपूर्वकंमूलमंत्रमुच्चरेत् अनेनमंत्रेणगणपतिंसमा
वाहयेत् दौर्गतामग्निवर्णामित्यृगंतेमूलमंत्रमुच्चार्यावाहयेत् तत्रसर्वत्रमंत्रांते भगवन्नागच्छागच्छ ॐ
छ ॐमावाहयामीत्युच्चार्यआत्मनआवाहयेत् तत्रप्रणवोपचारमूलानांविनियोगस्तत्रतत्रप्रयोगप्रकारे
णलिख्यते मूर्तिचेतत्रमन्त्रविग्रहमयीप्रकल्प्यतत्राभिवाहयत्यमेवचितिंचमंत्री तारत्रयंचलनसंग्रहणेन
मार्थमुक्तोपचारस्तुतिक्रांत्रिजगद्धसरोजात् अत्रीयचेतनकलांविरहय्यदेवंधातारेणचात्मनिपरेफ्रवतो प्रणवेनेत्यर्थः
विलाप्यमंत्रात्मनापरिणमय्यहृदीस्थलंबुध्यागच्छत्यममभिधायततोंजलिस्थे आवाहयामिमनुनाप्र
तगंधपुष्पतोयेवतार्यतन्पात्स्थमंत्रमूर्तौ इतितत्रावाहनभावनाप्रकारः कर्मांतरोक्तःकथ्यते जलगंधपु राम
ष्पादतनान्स्वांजलौगृहीत्वासहृदयकमलस्थितंदेवमंजलिमुद्रयासहप्राणवायुमार्गेणसुषुम्णामध्यपथकृतविश्रा ३०

घ्रा

णानस्सर्वकंब्रह्मरंध्रंनीत्वाहृदयपर्यंतमवरोप्यप्राणवायुनासहपुष्पांजलौवाकूर्चस्थविग्रहमूर्त्तिंदेवतामावा।
हयेत् तत्रावाहनविषयेमंत्रदेवताप्रकाशिकायामुक्तम् स्थंडिलेनित्यमेवस्यात्प्रतिमायांकृताकृतं च
लायामचलायांतुशालिग्रामशिलासुवा नकर्त्तव्यमिहावाहनंसुखेसर्वमेवदिति एवमावाह्य आवाह
नमुद्राःप्रदर्शयेत् आवाहनमुद्राप्रकारःकल्पांतरोक्तप्रकारेणलिख्यते तत्रावाहनमुद्रास्थापनीमुद्रा
सन्निधापनीमुद्रासंनिरोधिनीमुद्रासंमुखीमुद्राप्रार्थनीमुद्रा इत्येवंषडुक्ताआवाहनादिमुद्राः इदानींतत्प्र
काराःकथ्यंते हस्तौतुप्रांजलीकृत्वानामिकामूलपर्वणोः अंगुष्ठौनिक्षिपेत्सेयंमुद्रात्वावाहिनीमता।
अधोमुखीत्वियंचेत्स्यात्स्थापनीमुद्रिकामता उच्छ्रितांगुष्ठमुष्ट्योस्तुसंयोगःसन्निधापिनी अंतःप्रवेशि
तांगुष्ठासैवसंरोधिनीमता मुष्टिद्वयास्थितांगुष्ठौसंमुखौतुपरस्परं संश्लिष्टावुच्छ्रितौकुर्यात्सेयंसंमुखमु
द्रिका प्रसृतांगुलिकौहस्तौमिथःश्लिष्टौचसंमितौ कुर्यात्तुहृदयेसैषमुद्राप्रार्थनसंज्ञिता सर्वासांदेव
तानांचषण्मुद्राःप्रजनेस्मृताः इतितत्रतत्तन्मुद्राप्रदर्शनेआवाहितोभवस्थापितोभव सन्निहितोभव स
न्निरुद्धोभव संमुखोभव प्रसीदप्रसीदेत्येवमुच्चरेच्च एवमेवसर्वदेवतावाहनेपिइमाःषण्मुद्राःप्रदर्शनीयाः
पुनर्मूलमंत्रेणत्रिवारंआप्यदेवतांसकलीकृत्यपुनर्मातृकान्यासःकर्तव्यः तदुक्तंचक्रमदीपिकायां॥
समलंकृतेत्रकुसुमादिभिरप्यभिवाहयेत्परतरंचमहः सकलीविधायकलशस्थममुंहरिमर्चयन्नतत्त्व
मन्त्रमसनैतिपुनःपंचतत्त्वन्यासंकुर्यात् तत्प्रकारउच्यते षोंनमःपरायपरमेष्ठ्यात्मनेवासुदेवायनमः
यंनमःपरायपुरुषात्मनेसंकर्षणायनमः रंनमःपरायविश्वात्मनेप्रद्युम्नायनमः वंनमःपरायनिवृ
त्त्यात्मनेअनिरुद्धायनमः लंनमःपरायसर्वात्मनेनारायणायनमः एतेमूर्द्धास्यहृदयगुह्यपादेषुन्य
स्यपुनः क्ष्रौंनमःपरायकोपतत्त्वात्मनेनृसिंहायनमः इतिदेवताविग्रहेव्यापयेत् तदुक्तंचक्रमदीपिका

८।२।३१

प्रपञ्चसारसंग्रहः

याम अथ परमेष्ठिपुंमांसौ विश्वनिवृत्तीच सर्वरूपनिषदः न्यसेदाकाशादिस्थानेष्वाग्रावला
र्णकैः सलवैः वासुदेवः संकर्षणः प्रद्युम्नश्चानिरुद्धकः नारायणः क्रमशः परमेष्ठ्यादिभिर्युतः श्री
ततः कोपतत्त्वं क्ष्लौं बीजयुक्तं नृसिंहं न्यसेत् सर्वगात्रेषु तत्त्वतः क्रमेणेति तत्त्वात्मको न्यासउक्तः स
सान्निध्यकृतविंबमूर्त्यादिषु स्यादिति शैवतत्त्वं तत्र ह्रौं नमः शिवाय शान्त्यतीतात्मनेनमः ह्रैं शिवाय
प्र.सा. शान्त्यात्मनेनमः ह्रूं नमः शिवाय विद्यातत्त्वात्मनेनमः गें ह्रीं नमः शिवाय प्रतिष्ठात्मनेनमः ह्रां न
स. मः शिवाय निवृत्यात्मनेनमः स्थानानि तु वै सवतत्त्ववत् गाणपत्येप्येतदेवतत्त्वं दौर्गं तु षौं नमः परा
३२ परमेष्ठि- य श्रेष्ठाशक्त्यात्मनेनमः यौं नमः पराय पौरुषीशक्त्यात्मनेनमः रौं नमः पराय विश्वरूपाशक्त्यात्मनेन
मः वौं नमः पराय निवृत्तिरूपाशक्त्यात्मनेनमः लौं नमः पराय सर्वरूपाशक्त्यात्मनेनमः इति पुनरपि
तन्मूलमंत्रोक्तान्तरन्यासपदन्यासादीश्च कृत्वा पुनस्तत्तद्विधानोक्तपंचांगं वा षडंगन्यासं वा दशांगं वा
31 न्यसेत् दशांगन्यासप्रकारस्तूच्यते तत्र गोपालकदशाक्षरीमंत्रेण कुर्यात् गों हृत् पीं शिरः जं शिखा
नें कवचं वं नेत्रं लं अस्त्रं भां पार्श्वाभ्यां नमः यं कटिभ्यां नमः स्वां पृष्ठाय नमः हां मूर्ध्ने नमः इति तदु
क्तं च क्रमदीपिकायां मंत्रार्णैर्दशभिर्न्यसेत् चंद्रलं द्वैरंगानां दशाक्रमदीरितं नमोंतं हृच्छीर्षत दनु शिखा
तनुत्रनेत्रास्त्रं पार्श्वद्वयकटिश्च पृष्ठमूर्ध्युक्तं इति पुनः ऋषिछंदोदेवताः कृत्वा उपचारान् दद्यात् तत्र षो
डशोपचारो दशोपचारः पंचोपचारश्चेति त्रिविधाः पूजोपचाराः तान् क्रमेण वक्ष्ये आसनस्वागते सा
र्घ्यपाद्ये साचमनीयके मधुपर्काचमनस्नानवसनाभरणानि च सुगंधसुमनोधूपदीपनैवेद्यवंदनान् राम
प्रयोजयेदर्चनायामुपचारांस्तु षोडश कालिकापुराणे आसनं पाद्यमर्घ्यं च तत्राचमनीयकं मधुप ३२

र्कंच सत्तोऽहं दधिप्रोक्तमनीषिभिः शुद्धाभिरद्भिर्विहितं पुनराचमनीयकम् चंदनागुरुकर्पूरचोरकुंकुमरोचना।
जटामांसीकपिपुर्कशकेर्गंधाष्टकं विदुः चंदनागुरुह्रीबेरकुष्ठकुंकुमसेव्यकाः जटामांसीमुरामिति विष्णोर्गं
धाष्टकं स्मृतं चंदनागुरुकर्पूरतमालजलकुंकुमं कुशीतलाष्टकमसंक्तं शैवं गंधाष्टकं स्मृतं चंदनागुरु।
कर्पूरपंकं गंधमिहोच्यते द्रव्यालाभे प्रदातव्यास्त्वक्षालितास्तंडुलाः शुभाः तंडुलान्प्रक्षिपेत्तेषु द्रव्यालाभे तु
तत्स्मरन् इति च तुलसीपंकजेजात्योकेतकीकरवीरकैः शस्तानि दशपुष्पाणि तथा रक्तोत्पलानि।
च नीलानि कल्हारकुसुमानि च मालतीकुंदमंदारनंद्यावर्त्तादिकानि च सुगंधीनि मनःप्राणि स्वागमोक्ता।
नियानि च मृकुलैः पतितैर्म्लानैर्जीर्णैर्वा जंतुदूषितैः आघ्रातैरंगसंस्पृष्टैः पर्युषितैश्च नार्चयेत् सगु
ग्गुल्वगुरुश्रीरसिताज्यमधुचंदनैः सारांगारविनिक्षिप्तैर्मंत्रेणानीचैः प्रधूपयेत् नीचैरिति देवतापाश्र्वधः
प्रदेशः स्पर्शः गोसर्पिषा वा तैलेन वर्त्त्या चलबुगर्भया दीपितं सुरभिं शुद्धं दीपमुच्चैः प्रकल्पयेत् उच्चैरिति दे
श्री वतापाउच्चप्रदेशः स्पर्शः सुसीतेन सगुडेन पायसेन च सर्पिषा सितोपदंशकदलीदध्याद्यैश्च निवेदयेत्॥
एतैर्द्रव्यैर्यथाशक्त्या देयो दातव्याः तत्रार्घ्यं च शिरसि मधुपर्कं मुखे एवमुपचारान् उक्तैर्द्रव्यैः साकं सम[illegible] ते
देवतत्तद्देवताचतुर्थ्यंतनमोंतपूर्वकं विलवेनमः आसनं समर्पयामीत्यादिप्रकारेण दत्वा पुनर्गंधपुष्पं च
रा न् सत्वरूपेणोर्वद्यात् तत्प्रकार उच्यते प्रथमं मूलमंत्रेण जलैस्त्रिवारं मूलदेवतां समभ्यर्च्य किरीटं गाजटा
दि भूषणानपुथांगमंत्रवर्णान् समभ्यर्च्य पुनरावृत्तिमंत्रैस्ततदावृत्तिदेवतामेकैकवारं जलेन समभ्यर्च्य पु
गं धैश्चाप्येवमेव मूलदेवतां समर्चनात्रिवारपूर्वकमावृत्तिश्च समर्चयेत् पुनः पुष्पैश्चाप्येवमेव समभ्यर्च्य पु
मूलमंत्रे प्रास्सांगावृत्तिमंत्रान् सर्वान् जपन्वाधरमीत्यादिवक्ष्यमाणमंत्रं जपन् वा गंधादिभिः समर्चितव्यं।

टांवामकरेणवादयन् धूपंप्रदर्शयेत् पुनस्तथैवसर्वान्मंत्रानुजप्त्वावक्ष्यमाणंदीपमंत्रंजपन्वाघंटां
चवादयन्दीपंचप्रदर्शयेत् तत्रधूपदीपप्रदर्शनानंतरमेवतुलसीमेकैकवारंजलं दत्वाप्रार्थितेचपटले
प्रागुक्तमानसश्लोकप्रकारेणधूपमुद्रांदीपमुद्रांचतत्तन्मंत्रेणॐधूपंकल्पयामीति ॐदीपंकल्पया
प्रसा॰ मीत्यतिदर्शयेत् ॥ अथक्रमदीपिकोक्तप्रकारेणापिधूपदीपप्रदर्शनप्रकारउच्यते ॥ सांगागां
सं॰ दे॰ धूतविलुलिते - - रैसंविकीर्णेगत्वायैर्घ्नपरिमलधूपमापायमंत्री दद्यान्नीचैर्दहनमथप्न
३२ यापरेणाग्यदोलावंटांगंधाक्ततउमसमकैरर्चितांवादयानः तद्वद्दीपंसुरभिघृतसंससिक्तकर्पूरवर्त्ती
दी दीप्तंस्पष्टाप्त्यतिविशदधीःपद्मपर्यंतमुच्चैः दत्वापुष्पांजलिमपिविधायार्घ्यपित्वाचपाद्यंसामान्यं का
ल्पयंतप्रविमलविपुलस्वर्णपात्रेनिवेद्यमिति एवंधूपदीपौप्रदर्श्यपुनर्नैवेद्यंसमर्पयेत् अथसक
लदेवतानिवेद्यविधिःक्रमदीपिकोक्तप्रकारेणवक्ष्यते दत्वापुष्पांजलिमपिविधायार्घ्यमथित्वाचपाद्यंसाचा
मंकल्पयंतप्रविमलविपुलस्वर्णपात्रेनिवेद्य सुरभितरेणदुग्धहविषासुसितेनसतासमुपदंशाके
रुचिरहृद्यविचित्ररसैः दधिनवनीततक्रतनसितोपलशष्कुलिकाघृतगुडनारिकेलकदलीफलपु
ष्परसैः शष्कुलिकाद्यपूपम् अन्योदितंतदरिमुद्रिकयाभिरक्ष्यवायव्यतोषपरिशोषितमग्निदो
ग्धा संदह्यवामकरसौधरसाभिषिक्तंमंत्रामृतीकृतमथाभिमृशन्नुप्रजप्यात् मन्त्रमष्टशःसुरभिमु
द्रिकयापरिपूर्णमर्चयेत् गंधमुखैः हरिमर्चयेदथकृतप्रसवांजलिराप्यताविसर्जेद्ब्रमहः वीतिहो
त्रदयितांतमुच्चरन्मूलमंत्रमथनिःक्षिपेज्जलं अर्चयेत्तदमृतात्मकंहविर्दोर्भ्युतासकृदमुंसमुद्धरेत् निवे राम
दयामिभवतेजुषाणेदंहविर्हरे। निवेद्यार्घ्यणमंत्रेयंसर्वाचाराहनिजाख्ययाग्रासमुद्रांवामदोलाविकचो ३२

सतत

32

त्रिमम् प्रदर्शयन् दक्षिणेन प्राणादीनां प्रदर्शयेत् स्पृशेत्कनिष्ठिकानिष्ठिके हे स्वांगुष्ठमूर्ध्नि प्रथमे हृ।
मुद्रा तथापरा तर्जनीमध्यमे स्यादनामिकामध्यमिके च मध्या अनामिकातर्जनीमध्यमे स्यात्तद्वच्च तुर्या सक
निष्ठिकास्ताः स्यात्पंचमी तद्वदिति प्रतिष्ठाः प्राणादिमुद्रा निजमंत्रयुक्ताः प्राणापानोदानव्यानौ समानाः क्र
कुलसाधनमनो माच्चतुर्थ्यायुक्ताः ताराद्यैरप्यपि विद्धांताः कुलसाधनरूपा ते मनवः ततो निवेद्यमुद्रिका प्रधानपाकाद्वये स्पृ
व हः॥ शेत्कनिष्ठकनिष्ठिके हे स्वांगुष्ठमुर्ध्नि प्रथमे हृन्मुद्रा तथापरा तर्जनीमध्यमे स्यादनामिकामध्यमिके च मध्या
अनामिकातर्जनीमध्यमे स्यात्तद्वच्च तुर्यी सकनिष्ठिकास्ताः स्यात्पंचमी तद्वदिति प्रतिष्ठाः प्राणादिमुद्रा निज।
मंत्रयुक्ताः प्राणापानव्यानोदानसमानाः क्रमाच्चतुर्थ्यायुक्ताः ताराद्यास्त्वपि विद्धांताः कुलसाधनरूपा ते मनु।
ततो निवेद्यमुद्रिकां प्रधानपाकाद्वये स्पृशत्यनामिकां निजं मनुं जपन् प्रदर्शयेदिति दत्वा पुष्पांजलिं
मित्यादिनिवेद्यविधिं ग्रंथानामयमर्थः तत्र पुष्पाक्षमिति मधुस्वर्णपात्रे दुग्धपहविषा युक्तं द्रव्यं निधाय तत्सुद
र्शनमंत्रेणानलेन संप्रोक्ष्य तत्सुदर्शनमुद्रया ग्रामिते च पटले उपरि न्यासविधानेव त्समाणाया अभिमंत्र्य तामृमितिवा
युवीजयुक्तेन तोयेन प्रोक्ष्य तदन्नं परिशोध्य पुनरग्निबीजेन रमित्यनेन युक्तेन दोषान्संदह्य वंवमिति सुधाबीजयु पु
क्तेन वामदोस्पृष्टाज्ञाय पुनर्मंत्रेणाप्लाव्य दक्षिणेन स्पृष्ट्वा पुनः सुरभिमुद्रां प्रदर्शयेत् सुरभिमुद्रा प्रक।
ट उच्यते करयोरंगुलीः संमुखे अन्योन्यसंलग्नाः कृत्वा वामतर्जनीं संप्रदक्षिणमध्यमाग्रेणावलितमभिमुखं
संयोज्य दक्षिणतर्जन्या वाममध्यमामूलाग्रं संमुखं संयोज्य वामानामिकाग्रेणावलितं दक्षिणकनिष्ठिका।
ग्रमभिमुखं संयोज्य दक्षिणानामिकया वामकनिष्ठिकामूलाग्रमभिमुखं संयोजयेत् एषा सुरभिमुद्रा अ
मृते अमृतोद्भवे अमृतेश्वरि अमृतवर्षिणि अमृतं स्रावय स्वाहा इत्यनेन मंत्रेण सुरभिमुद्रां प्रदर्श्य तन्निवे
द्यं परिष्कृत्य पुनस्तन्निवेद्यमर्चयेत् गंधसपुष्पाद्यैः पुनर्हरिमपि पुष्पैः समभ्यर्च्य हरं वा तत्तद्विषयान्॥

सारेण पुनरुद्धृतपुष्पैर्हस्तः मूलमंत्रं स्वाहांतमुच्चरन् तस्य देवस्य ग्रासमात्रं जलमानीय निवेदयेन्निवि
वेद्य पुनर्जलं दत्वा तदमृतात्मकं हविरर्च्चयेत् पुनर्जलं दत्वा तदमृतात्मकं हविरर्च्चयेत् पुनर्दो
र्ग्रासं गंधात्ततः ऊर्ध्वममुद्धरन् इमं मंत्रं जपन् निवेदयामि भवते जुषाणेदं हविर्हरे इति जपन् पुष्पेणा
राध्य पश्चान्निवेदयेत् जुषाणेदं हविर्हरे इमं तत्तद्देवताख्यायायोजयेत् पुनर्वामदोर्मूले ग्रासमुद्रां वि
कचोत्पलसन्निभां प्रदर्शयेत् दक्षिणहस्तेन प्राणाहुतिमुद्राः प्रदर्शयेत् तत्प्रकारस्त्वत्र प्रथमं स्वांगु
ष्ठाग्रेण कनिष्ठिकानामिकाद्वयाग्रसंस्पृशेत् प्राणाहुतिमुद्रा पुनरंगुष्ठाग्रेण तर्जनीमध्यमामद्वयं संस्पृ
द्वितीया मुद्रा पुनरंगुष्ठाग्रेणानामिकामध्यमाग्रद्वयं संस्पृशेत् तृतीया मुद्रा। पुनरनामिकामध्यमात
र्जनीत्रयं अंगुष्ठेन संस्पृशेत् चतुर्थी मुद्रा। पुनरंगुष्ठाग्रेण कनिष्ठिकाद्यखिलांगुलीस्पृष्टाभिः संस्पृशेत् पं
चमुद्राभिः प्रणवपूर्वकैः स्वाहांतैः प्राणापानादिभिश्चतुर्थ्यंतैः ॐ प्राणाय स्वाहा इत्येवंप्रकारैर्युक्ता।
भिः निवेद्यं कृत्वा पुनर्निवेद्यमुद्रां च अंगुष्ठद्वयाग्रेणानामिकाद्वयमध्यदेशं स्पृशन् निवेद्यं समर्पयामीत्य
नेन मंत्रेण निवेद्यं समर्पयेत् एवं क्रमदीपिकोक्तनिवेद्यविधिः सकलदेवतानिवेद्यसाधारणोयं तत्राद्यमं
त्रमूलमंत्रादि सर्वं तत्तद्देवतानुसारेण योजनीयं इति विशेषः एवं निवेद्यं कृत्वा पुनर्दक्षिणभागेग्निसमा
रोप्य यत्संस्कारपूर्वमग्निमलंकृत्वा तस्मिन्नग्नौ साध्यदेवतां समावाह्य सिताज्यतामिलितेन पयोन्नेन अष्टोत्त
रसहस्रं तत्तन्मूलमंत्रेण प्रणवव्याहृतिपूर्वकं व्याहृतिप्रणवोत्तरं च वैश्वदेवहोमं कृत्वा वह्निस्थदेवतां पीठस्थ
देवतायां संयोज्य समाप्य तद्धोमं वहिर्बलिं दत्वा पुनरागतपानीयमिदं समर्पयामीति पानीयाचमनैः दत्वा पुनः श्री
वैमुखादानीतं ततः जलं अत्रानमवियोजयेत् पुनरपि जलं दत्वा निर्माल्यपुष्पैर्विष्वक्सेनाय निवेद्यशेषं समर्पयेत्
गंडूषमिदं समर्पयामि दंतधावनमिदं समर्पयामि जिह्वानिर्लेखनमिदं समर्पयामि गंडूषमिदं हस्तमार्जनं।

म. मा. सं. ३२ पर्वप्राणादिमुद्राः

राम ३२

मनीयम् पुनरास्यमुद्धार्य मेलापमुद्रीजीरकादिभस्मरूपं सुवेवाम्नाय्वेन मामादत्वा पुनः प्रसन्नपूजां के
वलमूलमंत्रैरेवयानन्तद्विधानो केरावरणमंत्रैः सर्वैरेव पुनरपि जलगन्धपुष्पधूपदीपैः कुर्यात् तत्र केवल
मूलमंत्रैः प्रसन्नपूजा पदे सर्वं निवेद्यविधेः प्रागेव लिङ्गस्थितस्य तत्तस्थानस्य द्वाराम्भःप्रभृत्यावरणदेवताः समभ्यर्च्य
नरणदेवताः सर्वाः प्रधानदेवतायां योजयेदिति विशेषः पुनाराजोपचारान्समर्पयेत् तत्कथं ताम्बूलकञ्चुकक
र्पूरचूर्णच्छत्रचामरदर्पणतत्सागीतवाद्यादीन्यत्र मामसर्वकं समर्पयेत् तत्प्रसन्नपूजायाः प्रागेव राजोपचा
रान्कुर्यादिति पक्षविशेषः एतत्सर्वं क्रमदीपिकायामुक्तं स्याद् अथ संस्कृते दृतवदेः मलयीरमिवाद्यसम्यग
भिषस्यहरिं जकुर्यात् सिताचूतयुतेन पयः परिसाधितेनमितदीधितिना अहोतरं समरु संसमाप्य होमं
पुनर्बलिं दद्यात् तथिष्ठ ऽयनाद्येभ्यो नक्षत्रेभ्यस्तत्स्वकरणेभ्यः संपादयानीयसुधांसमर्प्यदत्वाम्भ उद्वा
समुखोर्चितस्य नैवेद्यमुद्वास्य निवेद्य विष्वक्सेनाय तच्छीमपतिप्यभूपः गन्धपुष्पदं तपाक्वनाचमनास्य हस्तमुख
जलेपमुवेलासकमाल्याभूषाः ताम्बूलमप्यभिसमर्प्य सवाद्यनृत्यगीतैः स्तत्प्रणमितिसजयतायुरेव गं पाहिहिंः
सपरिवारमप्यार्घ्यमस्मै दत्वा विधायकसुमाञ्जलिमारेलेति तत्र राजोपचारान्सर्वान्विपि कृतालाभे जलेनैव
समर्पयेत् तत्र द्रव्यालाभे तु तेन तेन द्रव्येणैव समर्पयेत् तत्र धूपदीपछत्रचामरादिमंत्राः सर्वदेवतादिषु विधि
य समानाः रत्नदीपपंचस्यालीदीपादयस्तत्रैव विधेयाः एव तत्र अथ मधुपमदर्शनमंत्र उच्यते इरसिधूर्वध वन्न
भित्यादिनामधुपं प्रदर्शयेत् उद्दीप्यस्व जातवेदः इत्यादि श्रियामा दरिपातये स्वंतं प्रदीपप्रदर्शनमंत्रः अर्चितप्रा
त इत्या विश्वक्रिणीयमानर इस्वंतं रथदीपप्रदर्शनमंत्रः ईशानः सर्वविद्यानामित्यादि पंचमंत्रैः पंचवक्त्रं पुष्पं चदी
पा प्रदर्शयेत् पुनरेनेरेवेशानादिभिः पंचपात्रिदीपान्प्रदर्शयेत् हिरण्यपात्रं मधोः सर्वं हिदत्तीत्यादिनामहता,

अस्य दीपं प्रदर्शयेत् ऋषभेण यजामहे इत्यादि जपन् महीत्वं ते ऋषभ मदीप मंत्रः ॐ नमोस्तु सर्वेभ्य इत्येवा सर्पदी
पं प्रदर्शयेत् हरमस्मक्षत्रवो यांत भीतार इत्यादि अभयं नो अस्तितं तं लक्ष्म प्रदर्शन मंत्रः राजाधिराज इत्यादि म्नराज
प्र. त्था. से. ३८ जाय नमस्तेतं चामरमंत्रः ता प्रत्वा मनसेरं सकृत्यजन मंत्रः मूर्धानं दिवो अरतिं मित्ति दर्पण मंत्रः त्र्यंबकमित्सकेमसमना
प्यापक मंत्रः इदं त्वामद्रिविनस्तक मसमायारण मंत्रः तम भेकुद्रो असुरो महो दिव इत्यादि सक्रो सुयोहे वानामित्य
त्यौरि सक्रो सुमंत्र पुष्पं दद्यात् ईश्वरी विषपश्चून्तदेवीवा च मजन यतं देवा इत्यादि सक्रो मंत्र पुष्पं दद्यात् विसृ विसये
वे तं चरणं प विवेवि नतं प्रणाम मित्यादि सक्रो मंत्र पुष्पं दद्यात् पुनः किरीट मंत्रेण चवं च पुष्पांजलि मंत्रेण च तन्म
न्मूल मंत्रेण च पुष्पांजलिं दद्यात् ते किरीटादि मंत्राः क्रमेणालिख्यन्ते ॐ नमो भगवते वासुदेवाय किरीटकेयूर
34 हारमकरकुंडल त्वंकटकशंखचक्रगदाअद्र हस्तपीताम्बरधरश्रीवत्साङ्कित वक्षःस्थल श्रीभूमि सहित स्वा
त्मज्योतिर्द्वयदीप्तिकराय सहस्रादित्यतेजसे परमात्मने नमः इति किरीटमंत्रः अथ पुष्पांजलिमंत्रः ॐ
अं ईशो रूपोधाय ये सकलविराट्शरीराय विश्वैश्वानरात्मने सर्वजगत्स्रष्टे ब्रह्मणे सरस्वती सहिता
य सर्वज्ञाय सदात्मने । संगाया वेण्डा द्वयापरोक्ष संविदे नमो नारायणाय नमः शिवाय परमात्मने
नमः ॐ ओं उं साक्षात्पाधये सूक्ष्म हिरण्यगर्भशरीराय तैजसस्वात्मने सर्वजगत्पालकाय विष्णवे लक्ष्मी स
हिताय सर्वज्ञाय चिदात्मने । संगावेण्डा द्वयापरोक्ष संविदे नमो नारायणाय नमः शिवाय परमात्मने नमः ॐ
ओं अं गुणत्रयोपाधये अव्याकृतशरीराय स्वप्न प्राज्ञात्मने सर्वोत्पत्तिस्थिति संहारकर्त्रे सर्वेश्वराय मूल
प्रकृतिमायासहिताय सर्वज्ञाय सच्चिदानन्दात्मने । संगावेण्डा द्वयापरोक्ष संविदे नमो नारायणाय नमः शिवाय प ३४
रमात्मने नमः ॐ निरवद्य निर्गुणशीर्ष शरीराय असंगप्रत्यगद्वयाय स्वभाव भासित तु त्वाया ।

संगबोधायसच्चिदानंदात्मनेऽसंगाखंडाद्वयायापरोक्षसंविदेस्वबोधधूताखिलार्थप्रज्ञानायनिरालंबनविंबाया १
हीनमहोदयायनमोनारायणायनमः शिवायपरमात्मनेनमः इत्येवंपंचपुष्पांजलिमंत्राः अथपंचीकरणा
पुष्पांजलिमंत्राःकथ्यंते ॐ पंचीकृतपंचमहाभूतानितत्कार्यंस्थूलविराट्शरीरंतदभिमानिनंविश्ववैश्वान
रात्मानंचजलोपहाररूपेणअकारवाच्येब्रह्मण्युपसंहृत्यतमपितत्रैवपरब्रह्मणोर्पितंतस्मैनारायणायपरमात्म
नेनमः ॐ अपंचीकृतपंचमहाभूतानितत्कार्यंसमस्तंहिरण्यगर्भशरीरंतदभिमानिनंतैजसमात्मानंचगंधो
पहाररूपेणउकारवाच्येविष्णावुपसंहृत्यतमपीत्यादिनमस्त्यंतं ॐभगवन्पुष्पोपहाररूपेणमकारवाच्येरु
द्रेउपसंहृत्यतमपीत्यादिनमस्त्यंतं भगवन्धूपोपहाररूपेणबिंदुवाच्येईश्वरेउपसंहृत्यतमपीत्यादिनमः।
रा० त्यंतं ॐभगवन्दीपोपहारात्मनास्फुरत्तउच्छ्रतं तत्सर्वंदीपोपहाररूपेणनादवाच्येसदाशिवेउपसंहृत्यमपी
त्यादिनमस्त्यंतं ॐनैवेद्योपहारात्मनास्फुरत्तउच्छ्रतंसर्वंनैवेद्योपहाररूपेणनादवाच्येसदाशिवेउपसंहृतम रे०
पीत्यादिनमस्त्यंतं तमप्यखंडानंदेपरमेश्वरेउपसंहृत्यतमपितत्त्वेपरब्रह्मणि ॐतत्सत्नारायणाय वे०
परमात्मनेनमः एवंसप्तभिःपंचीकरणमंत्रैःपुष्पांजलिंअर्पयेत् अथपुष्पांजलिमंत्रप्रसंगात्पुष्पांजलार्थं।
शालग्राममंत्रोपिलिख्यते साध्यनारायणऋषिः अनुष्टुप्छंदः लक्ष्मीनारायणोदेवता श्रीबीजं ह्रीं श
क्तिः सौकीलकं ममसर्वाभीष्टसिद्ध्यर्थेविनियोगः ॐनमोभगवतेहृत् विष्णवेशिरः शालिग्रामनिवासि
नेशिखा सर्वाभीष्टफलप्रदायकवचं सकलदुरितनिवारिणेनेत्रं शालग्रामायस्वाहाअस्त्रम् ध्यानम् त
तु ल्यत्रभंतपनकोटिभिरब्जचक्रकौमोदकीदरविराजितपाणिपद्मं लक्ष्मीमहीसहितमात्तविचित्रभूषंनारा
यणंकपिशवाससमाश्रयामि ॐनमोभगवतेविष्णवेश्रीशालिग्रामनिवासिनेसर्वाभीष्टफलप्रदायसकल
दुरितनिवारिणेशालिग्रामायस्वाहा इतिमंत्रः अनेनापिशालग्राममंत्रेणसर्वत्रैवजपध्यानादिषुपुष्पांजलिं।

स्वदक्षिणांशं जपश्च कर्तव्यः तत्तन्मंत्रसान्निध्यार्थं एवमुक्तैर्मंत्रैः पुष्पांजलिं कृत्वा स्तुत्वा प्रागुपदेशा
विधानेन प्रकारेण अष्टांगादिनमस्कारं कृत्वा प्रसन्नार्घ्यमिदं समर्पयामीति प्रसन्नार्घ्यं दत्वा पुनश्चु
लकोदकेन स्वात्मानमर्पयेत् तत्र वाराणां ब्रह्मले चुलुकोदकमंत्रस्तु इतः पूर्वं प्राणबुद्धिदेहधर्माधि
कारतः जाग्रत्स्वप्नसुषुप्त्यवस्थासु मनसा वाचा कर्मणा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना यत्स्मृतं यदुक्तं
प्र·सा· तं यत्कृतं तत्सर्वं ब्रह्मार्पणं भवतु स्वाहा मां मदीयं च सकलं श्रीसमस्तस्वामिने हरये सम्यगर्पये ओं तत्सदिति
सं· तत्र हरये इत्यत्र तत्तद्देवतानुसारेण योजनीयं एवं चुलुकोदकं दत्वा अग्निर्मनुष्यस्य चायत्तेनयत्तामित्यत्वा
२५ चमसजलं शंखेनीराज्य तत्तलेन शंखमध्यस्थितं तोयं भ्रामितं केशवोपरि अंगलग्नं मनुष्याणां ब्रह्महत्यादि
तं दहेत् इति मंत्रेण आत्मानं संप्रोक्ष्य अकालमृत्युहरणं सर्वव्याधिविनाशनं सर्वपापक्षयकरं विष्णुपादो
दकं शुभं इति तीर्थं स्वीकृत्य विभूतितिलकमादिप्रसादं स्वीकृत्य अवशिष्टनीयार्घ्यं समर्पयामीत्यवसानार्घ्यं दत्वा
पुनर्देवतायां लयांगोपांगावरणादि कृत्वा पुनः पुनः सगंधपुष्पहस्तः पूर्वोक्तावाहनमंत्रमुक्त्वा तदंते भ
गवन्नुत्तमसत्तमस्व ओंभगवंतमुद्वासयामीति स्वात्मन्युद्वास्य स्वस्यांगावरणादिकं च सहैव एवं पूजासा
मान्यक्रमः ॥ अथ मातृकामंत्रस्य प्रयोगविधिं वक्ष्ये ॥ वर्गस्वरयाद्यंशाः क्रमेण कलधौतरजतता
म्रांशुः इति रचितकवचकामिदं साधकसर्वार्थदायि सततं स्यात् अस्यार्थः ॥ वर्गस्वरयाद्यंशा इ
ति वर्गांशा स्वरांशा याद्यंशा इति एतदुक्तं भवति वर्गांशा इत्यनेन कादिवर्गस्य सूर्यात्मकत्वात् द्वादित्यां
शत्वमर्थः तेन द्वादशकलात्मकत्वात् सूर्यस्य द्वादशांशं सूर्यात्मकं हिरण्मयमुक्तम् स्वरांशः स्वरांशस्य चांद्रम
सत्वात् चांद्रमसः षोडशकलात्मकत्वात् षोडशांशं चंद्रात्मकं रजतमुक्तं यादिवर्गस्य वह्न्यात्मकत्वा राम
त् वह्नेर्दशकलात्मकत्वात् दशांशं वह्न्यात्मकं ताम्रमुक्तं तत्र पदस्य षोडशांशमेव शास्त्रमुच्यते ० २५

वेहादशांशं हिरण्यं षोडशांशं राजतं दशांशं ताम्रं चैकीकृत्य रचितमंगुलीयकमभिषेककलशोपरि निधाय अंगु
लीभूषारत्नं वांछितफलदायीति । तंत्रसारे तु स्वराः षोडश विख्याताः स्पर्शास्ते पंचविंशतिः । व्यापकादयस्तोकाः यथ
द्यामंप्रदायिनः । अभिषिंचनस्य मंत्रजपस्य सह्यान्यानकृत्या गतः । तस्या संपातयन्मंत्री समभिषिंचेत् संख्यया एवं संख्ययाष्टो
त्तरसंख्येयोऽर्थः । निःक्षिप्य कुंभे तां मुद्रामभिषेको कवचवर्मणा आवाह्य मजये हेवी उपचारैः समादिनः अभिषिंच्य
विनीलाय दद्यात्तां मुद्रिकां गुरुः । प्रयोगान्तरम् । त्रिवारं मंत्रः परिजप्य मे तथा पिबेदि नारायणपि विद्यया तथाः अनेन
मूकोऽपि कवित्वं विलिः परां च कीर्तिं लभतेऽष्टमासतः इति । एतया मातृकयैतदर्थः । स्वस्यशोधनेन स्वदेवता
वियहोऽत्र त्वा लिपिविद्य जलमादाय ऐं क्लीं सौः वद वद वाग्वादिनि स्वाहा ऐं क्लीं सौः तां पिबेत् एवमेकैकवर्णं हकारा
काराद्यक्षकारांतं सबिंदुकं जपित्वा तु काराद्यकारांतं विसर्गांतं जप्त्वा सबिंदुविसर्गमादिदांतं जपित्वा पिब
न वडवाकारकृत्वा वषट्दलपद्मेषु वर्णानां दीपशिखावह्निं ध्यायेत् त्रिवारं दिनशः संवत्सरपूर्यंतं पिबेदित्यर्थः ।
प्रयोगान्तरं कमलोद्भवो विधिरसेवचसा पयसा च पक्वं मधु सर्पिरिति अभिजप्य मनुना दिनशो लिहन्नाक ।
विभविति वत्सरतः कमलोद्भवो घृधिब्राह्मी अस्यार्थः ब्राह्मीरसेन समानं तीरं सर्पिश्च सचलपर्यापागुवचां च निक्षिप्य
त्रिभिर्दिनैः कृत्यनपाकृतिं हुंस विरचया मातृकयाष्टोत्तरसंख्येमभिजप्य प्रतिदिनं मात्रया लिहन्तां संवत्सरात्
वसिद्धिः प्रयोगान्तरं वचौषधप्राप्ताभिः कलशममलं पीरं क्रियमाणं रचयित्वा प्रानस्तं नामभिषिंचेत् सुमात परिज
पवाप्यमासं सस्याजेयेन्द्रिरायुः प्रथमकवियाशोविश्वसंवादद्युतोनारीवश्यापिनाना गुणगणानित्यं पुत्रव
प्रकृते अस्यार्थः अष्टैव वस्यमानाभिः पंचाशद्वर्णौषधीभिः कल्पितकषायजलेन वा केवलं निक्षिप्य गन्धसेनवाकः
मातृकार्यमातृकाविधानेन संसज्य सहस्रसंख्यं मातृकाजप्तेन कलशेन दिनशो मासपर्यंतं यं कंचिदेहसमभिषिंचे

त्तत्र कफलवान्स्यात् नारीचेत्ताम्रकफलवती स्यात् अन्यत्तु मंत्रवर्णौषधिनिर्मित मंत्रवर्णसमसंख्यगुलिकानां
धारणं विलेपनं नाभिः पूजाक्वाथजलैः स्नानं तद्भस्मधारणं कुर्यात् मंत्रविधानेन सिद्धिर्भवति अथ वर्णौषधी
नां नामान्युच्यन्ते तानि विलिखिन्नेवशात्स्त्रप्राकृतीयपटले उक्तानि योगपतावशात् हेत्रे बालकृष्णलिख्यन्ते चन्दन
कुंकुमचन्दनागुरुकर्पूरोशीररोगजलतुलस्यः कक्कोलजातिमांसीमुरचोरग्रन्थिरोचनापत्रा पिप्पलविल्व
प्र॰ सा॰ गुडूहा हरणारणाकलस्त्वक कृमिवन्दिन्यः सोडुम्बरीका भ्रमरीका स्थिराजदरवृश्चिकामयूरशिखा हलना...
सं॰ श्रिमयूरसिंहीकृष्णाक्रूरदर्भाग्रुक्तसारदरं भृङ्गीरोहिणसंत्वकहरतीपारलिचित्रातुलसापामार्गः पानमस्थलताहि
२६ रेफो विष्णुक्रान्ती भूतलयपर्णजलिनी दूर्वाग्र्यादेतिसदेतद्येवलक्ष्मीसदाभद्रोआदीनामिति कथितावलीनां क्रमव
शाद्धेतोषधयः गुलिकाक्वाथभस्मितप्रभेदतोखिलसिद्धिदायिन्यः पतासामोषधीनां नामानि तत्र देश
36 भाषया गुरुमुखादेव ज्ञातव्यानि तथाप्यत्राप्यताप्रसिद्धानां नामानि लोकप्रसिद्धपर्यायनाम्नोच्यन्ते तत्र कुचन्द
नरक्तचंदनं रोगः कुष्ठं उशीरं प्रसारिणी जलं ह्रीबेरं तुलसी कुंकुमं ग्रन्थीतिग्रन्थिपर्णी रोचनेतिगोरोचनं पत्रीति
तमालपत्रं पिप्पलोश्वत्थः रोहितोवटः चित्रइतिवह्निः कोकुवेलिः द्विरेफः भृङ्गराजमधुपाख्यः मुस्त
लीनि तारासी नीलपानाख्यः हिंसिरुकंटकारिका तत्र आदीनामिति अकारादीनामित्यर्थः तत्र ककार
बकारयोः आगे वकपित्तौ षध्यन्तरतकारेण प्रयन्नागीकृतः पतदुक्तं भवति उपर्यासिंत्त्वेत्ये येमत्राउपदिष्टा
नि मंत्रान्तर्गतौषधानि तत्र दत्तरसंख्यामानेन संग्रह्य गुटिकाकषायभस्मितभेदेन विकथारणादीनि कुर्यात्
अथैतासामेव वर्णौषधीनां नामानि स्वरूपेण विलिख्यन्ते चंदनमिति नलचंदनं कुचंदनमितिशेषमरम् २६
अगुरुइति अकिल्ल कर्पूरमितितदेव उशीरमिति तिलांविचां रोगाउदिशांकंदनीरकोष्ठम् जल

मितिवेदिवेरुः घुसृणमितिकुंकुमं ककोलमितिककोलयिदिला तामिरितिलातिककायिः मांसीति
जटामांसी मुरमितिमुरकं तांडुमुरमितिमुरमेतनमेववा चोरइतिकस्तूरी मंजलग्रंथीतिपिप्पलीमूलं रो
चनेतिगोरोचनम् पत्रेतिपत्रिलैः पिप्पलमितिअश्वत्थ बिल्वमितितत्संज्ञमेव गुहाहृणेश्तिहृषाहृपिशिन्
तृणमितिकावद पुललवंकामिति श्लवृंठांकुंभिवंदिनीइतिग्रानांवणाक्षि सोडुंबरेति ग्रतिकाश्मीरि।
सिरुकमूलसिरा कुमिति ग्रोरितलनामरेः दरपुष्पीतिशंकंकुष्मिमयराशीखेतितत्संज्ञकमूलकवि।
शेषः लताइतिश्वेत ग्रग्निमंथेतिमुन्नर सिंहीतिकंदं कर्त्तरिकुशेतिकुशपुल दर्भेतिनालाल कुसदर
पुष्पीतिकरपुष्प करवीरोहिणमिति ग्रालंकुंकुमिति वाव्हतीतिकत्तारि पाटलीपातरि चित्रेतिको
डुंवेलि ग्रथवाएरंडपत्रं तुलसीतिप्रसिद्धं तुलसी ग्रपामार्गमितिनागुरिवि शतमखलतेतिमुडकनान्
हिरफेरिकाशांस्कानि विष्णुक्रांतीतितत्संज्ञमेव मुसलीतिनिलपर्णे ग्रजलिनीतिवनलचुंडिल हूर्वे
तिग्रनकंपुल श्रीदेवीति श्रीदेवीयवादेनीरामहरति एलिडुताणि घृंडलत्मीतिनलत्तालिसदाभद्रे
ति शिरुपहो ग्रथमातृकायाः प्रयोगांतरम् ग्राधारोयच्छक्तिविंदुस्थिता यावक्रोम डैंडुग्रसंत्याः प्रभायाः
त्वायांतारणानुपातयेद्धक्रिसोमप्रोतान्मंत्रीमुच्यतेरोगजातैः ग्रस्यार्थः मूलाधारेजपाकुसुमसंकाशं।
स्फुरत्ताराकारंह्रींकारंविचिंत्यतस्मात्कंठनादसमसुचरघोतनान्नादमुत्याप्यसौ सुषुम्नेनवर्त्मनासूक्ष्मविस
र्नेनतुनिभस्थलककंतेनादंद्वादशांतेनीत्वा तत्प्रभावेशात् द्रुतवहलसुधासारमयंतकारान्तविंबमध्यग
तमाग्रेयेनमंडलेनापिवाह्यतोवेष्टितंनिष्कलंमुक्ताफलसदृशंशाक्तेयतेजसामूर्च्छेवमध्यतः स्रोतंमंदं।
निष्यंदमानंमूलाधारेशाक्तेयविंदुसंहृष्टंसंस्याप्यपुनस्तद्वत् लकारंचहकारायकारांतानामपिसर्वान्

क्रमेण मौक्तिकमालामिवाक्षरमयीं मालामवस्थाप्य क्रमेण पुनरकारादीन् क्षकारान्तान् वर्णा।
नुच्चार्यमाणान् संचिंत्य मातृकां जपेत् एवं प्रतिलोमानुलोमजपतः मंत्रं संप्राप्यमानं निजशरीरं वा
ह्यतश्चाग्निनावेष्टितं चमृताब्धिमध्यस्थं ध्यायेत् इति प्रयोगांतरम् कलाः कलानादभवा वदंत्य।
जाः कचादिवर्णान्नुभवाश्च तादिकान् यथादिकान् मातृरजाश्च विंदुजाः क्रमादनंतावधिकास्तथा।
दिकान् अर्थात्कलाभिरामिमैत्रीदिनशास्तनौ तथान्यासं सान्निध्यकृत्समर्त्यः प्रतिमाकलशादिषु
प्रसा· प्रविविचेयः अनेन श्लोकद्वयेन प्रणवकलान्यास उक्तः तत्र कलाः कलाः इत्यत्र प्रथमकलाशब्देन अ।
सं· कारादिषोडशस्वरकला उक्ताः द्वितीयकलाशब्देन वर्णशक्तिभूताः प्रणवस्य नादकलाः षोडश उ।
१२ क्ताः अनादीत्यनेन प्रणवस्य अकारकला दश उक्ताः उभवा इत्यनेन प्रणवस्य उकारकला दश उक्ताः मा
तृरजा इत्यनेन प्रणवस्य मकारकला दश उक्ताः विंदुजा इत्यनेन प्रणवस्य विंदुकलाश्चतस्र उक्ताः अ
57 नंतावधिका इत्यनेन प्रणवस्य नादकलायाः षोडशसंख्योकायाः अंत्यां कलां अनंतायै नमः इत्येतां
कलां पुनरप्यंत्यवर्णानत्तकारेण सह योजयेदित्यर्थः अस्यायमुपदेशः प्रथमं सविंदुकं षोडशस्वरव
र्णैकैकशः एवं कं नादकलाभिः षोडशभिः प्राक्प्रोक्तमातृकान्यासस्थानेषु न्यस्त्वा पुनः कवर्गचव।
र्गवर्णैकैकशः एवं कं प्रणवस्य अकारकलादश मातृकान्यासोक्तस्थानेषु न्यस्त्वा पुनः टवर्गतवर्ग
वर्णशः एवं कं प्रणवस्य उकारकलादश पुनः पवर्गयादि पंचवर्णैः एवं कं प्रणवस्य मकारकला पुनः षा।
दिवर्णचतुष्टयः एवं कं प्रणवस्य विंदुकलाश्चतस्रः पुनः अंत्यवर्णैः एवं कं अनंतायै नम इति इमां क। ई
लां च न्यसेत् एवं मातृकान्यासोक्तस्थानेषु न्यसेदिति अथ प्रणवकला उच्यंते सृष्ट्यै ऋद्ध्यै स्मृत्यै म १२

ये कान्त्यै लक्ष्म्यै धृत्यै स्थिरायै स्थित्यै सिद्ध्यै इमा अकारोत्पन्ना दशकलाः जरायै पालिन्यै शान्त्यै ऐश्वर्यै रत्यै
कामिकायै वरदायै आह्लादिन्यै दीर्घायै इमा उकारजाः कला दश । तीक्ष्णायै रौद्र्यै भयायै निद्रायै तन्द्र्यै क्षु
धायै क्रोधिन्यै क्रियायै उत्कार्यै मृत्यवे इमा मकारजा दशकलाः । पीतायै श्वेतायै अरुणायै असितायै
इमा बिन्दुकलाश्चतस्रः । निवृत्त्यै प्रतिष्ठायै विद्यायै शान्त्यै इन्धिकायै दीपिकायै रेचिकायै मोचिकायै प
रायै सूक्ष्मायै सूक्ष्मामृतायै ज्ञानामृतायै आप्यायिन्यै व्यापिन्यै व्योमरूपायै अनन्तायै इमा नादजाः षोडश
कलाः । इत्यप्रणवकलाः एताभिर्मातृकावर्णपूर्विकाभिः क्रमेण न्यसेत् पुनरपि न्यासविशेषः श्रीकं
ठादिमातृकान्यासस्य संवरीक्ष ऋषिः अनुष्टुप् छन्दः अर्धनारीश्वरो देवता हलो बीजानि स्वराः शक्तयः स
मस्तकामार्थे विनियोगः ॐ ऐं ह्रीं श्रीं अं कं खं गं घं ङं आं श्रीं ह्रीं ऐं अंगुष्ठाभ्यां नमः ॐ ऐं ह्रीं श्रीं इं चं छं जं
झं ञं ईं श्रीं ह्रीं ऐं तर्जनीभ्यां (स्वाहा) नमः ॐ ऐं ह्रीं श्रीं उं टं ठं डं ढं णं ऊं श्रीं ह्रीं ऐं मध्यमाभ्यां वषट् ॐ ऐं ह्रीं श्रीं
एं तं थं दं धं नं ऐं श्रीं ह्रीं ऐं अनामिकाभ्यां हुम् ॐ ऐं ह्रीं श्रीं ओं पं फं बं भं मं औं श्रीं ह्रीं ऐं कनिष्ठिकाभ्यां वौषट्
ॐ ऐं ह्रीं श्रीं अं यं रं लं वं शं षं सं हं ळं क्षं अः श्रीं ह्रीं ऐं करतलकरपृष्ठाभ्यां फट् अथ ध्यानम् सिन्दूरकाञ्चन
समोभयभागमर्धनारीश्वरं गिरिसुताहरभूषचिह्नम् पाशाभयाक्षवलयेष्टदहस्तमेनं ध्या
यसेत् सकलवाञ्छितवस्तुसिद्ध्यै एवं ध्यात्वा श्रीकण्ठादिभिर्नामभिः सर्णोन्दुयोः दिशक्तिसहितैः न
स बिन्दुकमातृकावर्णैः कैकसर्वकैश्च अं श्रीकण्ठाय पूर्णोदर्यै नमः इत्येवमादिभिर्मातृकास्थानेषु
न्यसेत् अथवा ऐं ह्रीं श्रीं श्रीकण्ठेशाय क्रमोदरीभ्यां नमः इत्यादि न्यसेत् तत्र श्रीकण्ठादयश्च पू
र्णोदर्यादिशक्तयश्च वक्ष्यन्ते श्रीकण्ठाय अनन्ताय सूक्ष्माय त्रिमूर्त्तये अमरेश्वराय

प्र॰सा॰
सं॰
३८

38

अर्धीशाय भारभूतये अतिथये स्थाणवे हराय झिंटीशाय भौतिकाय सद्योजाताय अनुग्रहेश्वराय अक्रूराय
महासेनाय क्रोधेशाय चंडीशाय पञ्चान्तकाय शिवोत्तमाय एकरुद्राय कूर्माय एकनेत्राय चतुराननाय अजेशाय शर्वा
य सोमेश्वराय लांगलिने दारुकाय अर्धनारीश्वराय उमाकान्ताय आषाढिने दंडिने अत्रये मीनाय मेषाय लोहिताय
शिखिने छगलंडाय द्विरंडकाय महाकालाय पालिने भुजंगेशाय पिनाकिने खड्गीशाय बकाय श्वेताय भृगवे नकु
लीशाय शिवाय संवर्तकाय इत्यष्टौ श्रीकंठाद्या मूर्तयः अथ पूर्णोदर्यादयः शक्तयः उच्यन्ते पूर्णोदर्यै विरजायै शाल्मल्यै
लोलाक्ष्यै वर्तुलाक्ष्यै दीर्घघोणायै सुदीर्घमुख्यै गोमुख्यै दीर्घजिह्विकायै कुंडोदर्यै ऊर्ध्वकेश्यै विकृतमुख्यै ज्वालामुख्यै
उल्कामुख्यै श्रीमुख्यै विद्यामुख्यै महाकाल्यै सरस्वत्यै सर्वसिद्ध्यै गौर्यै त्रैलोक्यविद्यायै मन्त्रात्मशक्तिकायै भूतमातृ
लम्बोदर्यै द्राविण्यै नागर्यै खेचर्यै मंजर्यै रूपिण्यै वीरिण्यै कोटर्यै पूतनायै भद्रकाल्यै योगिन्यै शंखिन्यै ग
र्जिन्यै कालरात्र्यै कुर्दिन्यै कपर्दिन्यै वज्रायै जयायै सुमुखेश्वर्यै रेवत्यै माधव्यै वारुण्यै वा
यव्यै रक्षोविदारिण्यै सहजायै लक्ष्म्यै व्यापिन्यै मायायै इत्यष्ट पूर्णोदर्यादयः शक्तयः एवं सबिन्दु
कमातृकावर्णैकैकसर्वकैः श्रीकण्ठादिभिर्नामभिः पूर्णोदर्यादिशक्तिभिः केवलैर्वा क्रमेण मातृकास्थानेषु
न्यसेत् वा पुनरप्यत्र बीजादियोजनाविषये पद्धतिरियं उक्ता: श्रीकण्ठादौ विद्यान्वर्णान् वाग्बीजसंपुटितान्वापि
त्रपाश्रियाद्यान्मातृकावर्णान् बीजसहितान्वा तद्रहितान्वा ॥ दौ योजयेदिति विशेषः अत्र बीजमिति बिन्दुः अ
थवा श्रीकंठादौ विद्यान्वर्णान् नित्यनेन वर्णपदाद्वेनाऽकारादयो वर्णा उद्दिष्टाः ते तु वर्णाः वाग्बीजसंयुतान् नित्यनेन
हल्लेखा श्रीबीज कामबीजपूर्वकान् तद्रहितान्वा न्यस्तुमारभ्य इमे विशेषास्तत्र तत्र वक्ष्यमाणदशदिग्मातृका ३८
न्यासप्रकरणेपि समानाः एव उनरप्यत्रैवोक्तं हे द्वादीन्याप्ति पुटान्न्यसेद्वा वाङ्गांस्त्विगादिस्थाने पुटानिति अस्यार्थः श्री

कंठादिर्न्यसेन्मातृकावर्णयोजनसमये यकारमारभ्य लकारांतं यं त्वगात्मने रं असृगात्मने लं मांसात्मने वं मेदा-
त्मने · शं अस्थ्यात्मने षं मज्जात्मने सं शुक्रात्मने हं प्राणात्मने लं शक्त्यात्मने क्षं क्रोधात्मने इत्येवं प्रकारेण य-
कारादिवर्णानंतरं त्वगादीन् संयोज्य पश्चात् तत्तन्मूर्त्तिशक्त्यादीन् संयोज्य न्यस्तव्या इति तत्रक्रमदीपिकायां ॥
क्रोधमप्यात्मनोंतादीन् उक्त्वादात्मने इत्यत्र क्रोधात्मने इत्यात्मपदस्य पूर्वं क्रोधपदं योजयेद्वा इमं त्वगादियो-
जनाप्राकृत्तौ तीयपटले केशवादीनामुक्तौ सधातुप्राणशक्त्यात्मानो यादिषु मूर्त्तयः इति श्रीकंठादीनां तु नो-
क्ता अत्र सप्तमपटले श्रीकंठादीनामेवोक्ता केशवादीनां तु नोक्ता तेन उत्तरत्रास्मिन्पटले वक्ष्यमाणा दशविधा
मातृकान्यासप्रकरणे केशवादीनामेव यादिषु त्वगादियोजना कर्त्तव्या इति संप्रदायः ततोत्तरत्र मातृकादश-
विधप्रकरणे वक्ष्यमाणा श्रीकंठादिकेशवादिन्यासयोरुभयोरपि श्रीबीजादियोजनादिविकल्पः समानः पु-
नरत्र शक्तिमूर्त्तियोजनाविषये पि पक्षविशेषोक्ति अं श्रीकंठाय पूर्णोदर्य्यै नमः इत्येकः पक्षः अं श्रीकंठाय पू-
र्णोदर्यात्मने नमः इत्यपरः पक्षः अं श्रीकंठपूर्णोदरीभ्यां नमः इत्यन्यः पक्षः तत्रक्रमदीपिकायां तु वर्णानुक्त्वा माई
चंद्रान्नपुरस्तान्मूर्त्तिः शक्तिं ङें वसानानतिस्त्रेति मूर्त्तिशक्त्यौ एष कुचतुर्थ्यैकवचनेनेवोक्ते तत्र निष्प्रपकारेणा
ङें वसानेति चतुर्थ्यैकवचनसत्त्वे अस्मिन्पक्षे यादिषु त्वगादियोजनाविषये यं त्वगात्मने वालिनेशमुखेश्वर्यै नम
इत्यादिक्रमेण योजयेत् द्विवचनपक्षे तु यं त्वगात्मभ्यां वालिमुखेश्वरीभ्यां नमः इत्यादिप्रकारेण योजयेत् एते
सर्वेपि पक्षाः उत्तरत्रास्मिन्पटले वक्ष्यमाणदशविधमातृकान्यासप्रकरणे वक्ष्यमाणा श्रीकंठादीनामपि समा-
ना एव तस्मादुक्तेषु पक्षेषु एकेन पक्षेण श्रीकंठादीन्न्यस्त्वा पुनः केशवाद्यान्तमूर्त्तिमर्कौ घामभित्यादि एकोनविंश-
तिपटले वक्ष्यमाणप्रकारेण ध्यात्वा तन्मंत्रवर्णान्न्यसेत् तत्प्रकारस्तस्मिन्नेव पटले टीकाव्याख्यानोक्तप्रकारे-
णाततन्त्राकृष्यात्रैव योग्यतावशात् लिख्यते आधारे हृद्वदनदोःपदमूलनाभौ कंठे समन्नाभि हृदयस्तनपार्श्वपृ-

ष्ठ कासेत्तणाश्रवणांगंधवहेषु दोः पत्संध्यंगुलीषु हृदि धातुषु असानिलेषु मूर्द्धतालुणासहृदयोदरसोरूजं
घापादद्वयेषु लिपिश्चोन्यसेत्क्रमेण गंडांसकोरूवरणेषु ह्यथांगशांवश्रीमद्गुदां वृजपदेषु समाहितात्मा
यति तत्रास्य न्यासश्लोकार्थस्य विभाग उच्यते आधारादिनाभ्यंतमेको न्यासः पुनः शृङ्गांतमपरो न्यासः
तत्र शृङ्गं प्रोक्तं नाभिस्थानं नाभ्या उपरि पद्माब्जोक्तोमध्य स्थानादिति विशेषः कासेत्यादि षोडशदलांतं तृ
तीयाद्व्यात्न्यासः गंधवहस्तिनासिका पुनः दोः पत्संध्यंगुलीषु च तुर्थो न्यासः अस्यपत्रोपदेशः ॥
प्रसा सं. एकस्मिन् हस्ते संधित्रये च पंचांगुलीषु च एको न्यासः तथैवेतरहस्ते च पदद्वये चरत्येवं च त्वारो न्यासः पुनः
२९ हृदि धातुषु असानिलेषु इति हृदयस्थानेषु धातुषु च प्राणे चेत्यर्थः धातवस्त्वगादिसप्तधातव इति पुनः
मूर्द्धतालुणा हृदयोदरसोरूजंघापादद्वयेषु च न्यसेदेको न्यासः पुनः गंडांसकोरूवरणेषु च तत्रो वर्णान्विन्यस
ह्यथांगशांवश्रीमद्गुदां वृजपदेषु शिष्टांश्च तत्रो वर्णानुसंयोज्यरथं दिग्द्वादशदर्शनपूर्वकं तत्तत्स्थानेषु न्यसेत
39 गं चक्रायनमः यं शंखायनमः गां गदायै नमः पं पद्मायनमः एवं प्रकारेण न्यसेदित्यर्थः एवं सबिंदुकात्र
मोतांश्च वर्णान्न्यसेत् सर्वत्र सबिंदुकानेव वर्णान्न्यसेत् तदुक्तं चक्रमदीपिकायां वर्णान्न्यस्त्वा सार्द्धचंद्रानुस्व
रानिति तत्रटीकोक्तप्रकारेण चक्रादिमुद्राप्रकारं वक्ष्ये प्रसृतांगुलिकरतले अन्योन्यव्यस्तलग्नसंमुखं सं
योज्य दक्षिणांगुष्ठाग्रेण वामांगुष्ठाग्रेण दक्षिणकनिष्ठिकाग्रं च संयोज्य दक्षिणांगुष्ठोपरि चक्रमुद्रां सादरं (
न्यसेत् दक्षिणांगुष्ठं वामकरांगुलीभिश्च तत्र संभिद्यदृढं गाढमुष्टिना गृहीत्वा उन्नजकृत्वा मांगुष्ठं सह दक्षि
णकरांगुलीभिर्दृढं संयोज्य वामांगुष्ठोपरिशिर्षं शंखमुद्रां सादरं विन्यसेत् उभयकरांगुलीरन्योन्यं संश्लिष्य राम
२९

व्यत्यस्तं पाणिद्वयं प्रतिष्ठाप्य तल्पस्याग्रमज्जलन्तं संश्लिष्टं प्रथमपर्वमांगुलिकं संयोज्य गदाम् मुद्रां वा मोहमूले
सान्तरं विन्यसेत् करतलतले संमुखे मणिबन्धसंश्लिष्टे प्रसारितांगुष्ठांगुलिके ऽन्तः प्रणामे संश्लिष्टे ऽगुष्ठे चक
र्णिकारूपेण कृत्वा पद्ममुद्रां दक्षिणोरुमूले सान्तरं विन्यसेत् तत्र सर्वत्र सान्तरादिति अष्टान्तरस्य पंचमादि
वर्णक्रमे लौकिके क्रमे कथा सर्वोऽप्रकारेण संयोज्य कुर्यादिति अत्रैव तथा कर्तव्या तत्रानुक्रमे सान्तरमष्टा
न्यासो नास्ति पुनरर्के वाभिमतान्नैव ध्यात्वा केशवादिभिर्मातृकावर्णैः कैः सर्वकैः कीर्त्यादिशक्तियुक्तैर्मा
तृकान्यासस्थाने न्यसेत् तत्प्रकारः कथ्यते अं केशवाय कीर्त्यै नमः आं नारायणाय कान्त्यै नमः इं माधवाय
तुष्ट्यै ईं गोविन्दाय पुष्ट्यै उं विष्णवे धृत्यै ऊं मधुसूदनाय शान्त्यै ऋं त्रिविक्रमाय क्रियायै ॠं वामनाय दयायै ऌं श्रीधराय मेधायै
ॡं हृषीकेशाय हर्षायै एं पद्मनाभाय श्रद्धायै ऐं दामोदराय लज्जायै ओं वासुदेवाय लक्ष्म्यै औं संकर्षणाय सरस्वत्यै अं प्रद्यु
म्नाय प्रीत्यै अः अनिरुद्धाय रत्यै कं चक्रिणे जयायै खं गदिने दुर्गायै गं शार्ङ्गिणे प्रभायै घं खड्गिने सत्यायै ङं शंखिने चण्डायै चं ह
लिने वाण्यै छं मुसलिने विलासिन्यै जं शूलिने विजयायै झं पाशिने विरजायै ञं अंकुशिने विश्वायै टं मुकुन्दाय विनदायै ठं नं
दजाय सुनन्दायै डं नन्दिने स्मृत्यै ढं नराय ऋद्ध्यै णं नरकजिते समृद्ध्यै तं हरये शुद्ध्यै थं कृष्णाय बुद्ध्यै दं सत्याय भुक्त्यै धं सात्वताय मत्यै नं शौरये
क्षमायै पं शूराय रमायै फं जनार्दनाय उमायै बं भूधराय क्लेदिन्यै भं विश्वमूर्तये क्लिन्नायै मं वैकुण्ठाय वसुधायै यं त्वगात्मने पुरु
षोत्तमाय वसुदायै रं असृगात्मने बलिने परायै लं मांसात्मने बलानुजाय परायणायै वं मेदात्मने बालाय सूक्ष्मायै
शं अस्थ्यात्मने विमलाय अमोघायै क्षं क्रोधात्मने नृसिंहाय विद्युतायै क्षं कोपात्मने नमः इति क्रमदीपिकाकारमतं
एवं सबिन्दुकमातृकावर्णैः कैः सर्वकैः केशवादिभिर्नामभिः कीर्त्यादिशक्तियुक्तैर्यो हि भूसधात्वादिभिर्मातृ

ढं नराय विद्यायै नमः
णं नरकजिते समृद्ध्यै
तं हरये सम्पत्त्यै =

वृषघ्नाय संध्यायै· षं मज्जात्मने वृषाय प्रज्ञायै· सं शुक्रात्मने हंसाय प्रभायै·
हं प्राणात्मने वराहाय निशायै· ळं जीवात्मने

क्रमस्थानेषु न्यसेत् अस्यापि प्रागुक्तश्रीकण्ठादिन्यासोक्तवन्मातृकावर्णानां बिन्दुसाहित्यविकल्पस्य मूर्तिसंयोग
विकल्पप्रकारस्य कामबीजशक्तिसंयोगप्रकारविकल्पस्य मातृकायाः प्राग्भुवनेश्वरीबीजयोग
रुनः विकल्पस्य एते विकल्पाः सर्वेपि समाना एव पुनरेतस्मिन्पटले दशविधमातृकान्यासप्रकरणो
प्रपं·म क्तस्य न्यासस्योक्ता विकल्पाः सर्वेपि समाना एव पुनर्यादिषु धातुनादयोस्य न्यासस्य तत्रापि सं
सं·न ति पुनरपि न्यासविशेषमाह शक्त्याशक्तिश्रीभ्यां शक्तिश्रीलक्ष्मीभिरन्वितैर्वर्णैः श्रीशक्त्य
४· नुगताद्यैरथवा विहितः समस्तयेन्यासः अस्यार्थः प्रथमं भुवनेशीवर्णादिसंयोज्य मातृ
कां न्यसेत् पुनर्भुवनेशीश्रीबीजोभयपूर्वकमातृकावर्णान्न्यसेत् पुनर्भुवनेशीश्रीबीजकाम
बीजत्रयपूर्वकमातृकावर्णान्न्यसेत् पुनः श्रीबीजभुवनेशीबीजकामबीजपूर्वकमातृकावर्णान्न्य
५० सेत् एषां चतुर्विधन्यासानां मध्ये तन्त्रराजे भिन्नबीजानामुपरिष्टात्पटले भुवनेशीपटले कामपटले च यथा
स्थानं वक्ष्यति तेनतेन ध्यानेन ध्यात्वा तत्तन्न्यासं कुर्यात् अथ प्रपञ्चयागविधिरुच्यते एष सर्वमन्त्राधिका
रसिद्ध्यर्थं न्यासमन्त्रहोमादिविधिस्वरूपः ब्रह्माक्षरैः परमगायत्रीछन्दः सकलपदार्थसातिपरंज्योतिर्देवता हा
हा हंसो हं शिरः हंसः शिखा ह्रींकवचं ओं नेत्रं हरिहरमस्त्रं ध्यानं सर्वत्राशेषलोकान्तवन्नियुक्तेज देवं ब्रह्माग्नौ
जुहुयात् तन्निम्नसदा सर्वं तत्वत्रिणीं ब्रह्मा समिर्महामन्त्रैर्ब्रह्मविद्भिः समाहितैः ब्रह्माग्नौ ब्रह्मणा हुतं ब्रह्मार्पणं ब्रह ४·
ह्म ओं ह्रीं नाराय णं ज्योतिरहं परंज्योतिर्जुहोमि हंसः सोहं स्वाहा इति प्रपञ्चयागमन्त्रः अथ प्रपञ्चयागप्रणालिं होत्रयो
र्मासादि विधि लिख्यते गवीरिव दन्तपूर्वकं भूतशुद्ध्यादि लिपिन्यासं सर्षिच्छन्दो देवतं

गणपतिबीजे चतुश्चत्वारिंशद्वारं गणानां त्वेत्यृचमेकवारं मालामंत्राख्यमहागणपतिमंत्रं चतुर्वारं ऊर्ध्वरे-
षोडशपटले चतुरावृत्तितर्पणविधौ वक्ष्यमाणविधिना तिमंत्रं जप्त्वा पुनरपि लिपिं त्रिवारं विन्यस्य प्राणाग्निहोत्रस-
द्रव्यं संपादयेत् अंगुष्ठाग्रेण मूलाधारमारभ्य सुषुम्णामार्गेण द्वादशांतपर्यंतं लं नमः इत्यादि अं नमः इति ।
पर्यंतं प्रतिलोमेन न्यस्य सं लं ळं हं सं षं मरकतवर्णाय केतवे भगवते नमः शं वं लं रं यं गोमेदकवर्णाय राहवे नमः
मं भं बं फं पं नीलवर्णाय शनैश्चराय नमः नं धं दं थं तं विद्रुमवर्णाय बृहस्पतये नमः णं ढं डं ठं टं कलिशवर्णा-
य बुधाय नमः ञं झं जं छं चं पुष्पवर्णाय शुक्राय नमः ङं घं गं खं कं वैडूर्यवर्णाय अंगारकाय नमः अः अं औं
ओं ऐं एं ॡं ॠं ऌं ऋं शुक्लवर्णाय सोमाय नमः ऊं उं ईं इं आं अं माणिक्यवर्णाय आदित्याय नमः मूलाधारलि-
गनाभिहृत्कंठलम्बिकाललाटभ्रूमध्यमूर्द्धसु विन्यस्य लं यं मं वह्निमंडलाय नमः मं कं भं सूर्यमंडलाय नमः अः
अं उं सोममंडलाय नमः इति पादादिकटितं तकटादिकंठांतं कंठादिमूर्द्धांतं व्यापकतया विन्यस्य लं उं
मः प्रकृत्यै नमः ॐ अहं पुरुषाय नमः पादादिहृदंतं हृदादिमूर्द्धांतं विन्यस्य लं श्रं सोहं परमात्मने नमः इति ।
पादादि प्रतिलोमतया व्याप्य एवं प्राणाग्निहोत्रद्रव्यं संपाद्य स्वपंचयागद्रव्यं संपादयेत् कां ननव जादि स्था-
नेषु लिपिं विन्यस्य पुनः स्वगनूक्तस्थाने मुखे विन्यस्य अं अः स्वराधिपतये अं आदित्याय नमः इति मुखे व्या-
प्य कवर्गं दक्षिणकरे न्यस्य कं ङं कवर्गाधिपतये अं अंगारकाय नमः इति दक्षिणकरे व्याप्य चवर्गं वामक-
रे न्यस्य चं ञं चवर्गाधिपतये शुं शुक्राय नमः इति वामकरे व्याप्य टवर्गं दक्षिणपादे न्यस्य टं णं टवर्गाधिपत-
ये बुं बुधाय नमः इतस्त्र व्याप्य तवर्गं वामपादे न्यस्य तं नं तवर्गाधिपतये बृं बृहस्पतये नमः इति तत्रैव व्याप्य
पवर्गं तत्स्थाने न्यस्य पं मं पवर्गाधिपतये शं शनैश्चराय नमः इति तत्रैव व्याप्य पवर्गं पादिस्थाने न्यस्य यं क्षं य-
वर्गाधिपतये सों सोमाय नमः इति सर्वांगे व्याप्य अं अः उं सोममंडलाय नमः इति कं मं अं सूर्यमंडलाय नमः

यं तं मं वह्निमंडलायनमः इतिमूर्द्धादिकंठांतं कंठादिकसांतं कसादिपादांतं व्यापकतयान्यस्य अं ठं हं
पुरुषायनमः ॐ लं सः प्रकृत्यैनमः मूर्द्धादिहृदयांतंहृदयादिपादांतंव्यापकतयाविन्यस्य अं ओं लं दं।
सोहंपरमात्मनेनम इतिदेहेशिरआदिपादांतंव्यापकतयाविन्यस्य अं ओं लं दं सोहंपरमात्मनेन।
मइति देहेशिरआदिपादांतंव्याप्य एवंप्रपंचयागद्वयमपिसंपाद्य हल्लेखागगनारक्ताकराली
कामहोत्कुष्मा मूर्द्धास्यहृदयगुह्यपादेषुन्यस्तव्याः गायत्रीसावित्रीसरस्वतीः कंठदक्षस्तनवा।
प्र॰ सा॰ मस्तनेषुन्यस्य ब्रह्मविष्णुरुद्रान् वामांसहृदयदक्षांसेषुविन्यस्य ब्रह्माण्यादिकमलिकादिषुवि
सं॰ न्यसेत् तत्रध्यानानि अलिकांसपार्श्वकृतिषुपार्श्वांसापरगलहृत्सुचक्रमशः ब्रह्माण्याद्या
४१ विधिवन्न्यस्तव्या॰ मातरोष्टमंत्रितमे ः पुनः ह्रामादिनांगंविधाय शक्तिऋषिः गायत्रीछंदः भुवने
श्वरीदेवता इतिध्यानेषुन्यस्यन्निरित्यतारिं अग्नयेजातवेदसेनमः धुंसिववेनाअग्नयेसप्तजिह्वा
41 यनमः श्वाविणीगांउं अग्नयेहव्यवाहनायनमः निदघरियनस्म अग्नयेअश्वोदरजायनमः
दर्वांतिहाहनि अग्नयेवैश्वानरायनमः तोयतीरा मम अग्नयेकौमारतेजसेनमः सोमवृान।
म अग्नयेविश्वमुखायनमः सेदवेदतमा अग्नयेदेवमुखायनमः इतिमूर्द्धवामांसपार्श्वक।
टिनाभिदक्षकटिपार्श्वांसेषुन्यस्यस्वाहा हृदयं हंसः शिरः सोहं शिखा ह्रींकवचं ॐनेत्रं ह
रिहरअस्त्रं परब्रह्मऋषिः परमगायत्रीछंदः परंज्योतिर्देवता इतिप्रपंचयागः ऋष्या
दीन्न्यस्य स्वाहाहृत् सोहंशिरः हंसः शिखा ह्रींकवचं ॐनेत्रम् हरिहरअस्त्रम् परब्रह्मऋ राम
षिः परमगायत्रीछंदः परंज्योतिर्देवता इतिप्रपंचयागः ऋष्यादीन्न्यस्य भुवनेश्वरीं ध्यात्वाभु ४१

वनेश्वरीमंत्रमष्टोत्तरशतं जप्त्वा प्राणाग्निहोत्रहोमं कुर्यात् पद्मासने उपविश्य ध्यायेत् प्राक्तेः सत्त्वनिबद्धम
ध्यामथ तन्मायारजोवेष्टितं प्राणतो तिलं हृद्गतानां त्रिजवंडं मध्ये चनाभेरधः मध्यप्राग्वहतोन्दु यामाल
।हितैः ऊं एं डे उबलं हृत्क्रि शिरः स्थाधारमनारतं समतत्वं योगी स्मरेत्सिद्धये मध्येन्दुवरुणशशिप्रिय महिज्वा
लानिक्रमेण ऊं डानि एवं ध्यात्वा स्वरेश परेर यरें वयरेणमिति पंच मंत्रैः पंच ॐ डा श्रीं त्र्यं ज्वालप्रणवेना
ग्निमुखे कृत्वा तिलपिष्टतिलोमे न पात्रादि सर्पिर्योतं त्वापक त्वाप्राशि रं मेहत्य संद्रूपात्मकलत्रभाप्रमल्कान्त्रलप्र
कृत्वा त्वनः कल्याको स्वतिलोमतो स्तमंडीतेची हृत्वाकुंधिया संस्टहा तरमालिकां तत्र कुर्यात्कुंडे ३ षुतेषु क्रमा
त्कल्पं तान्निशिखोस्फुरत्स्फुरत्केषास्त्राविता वर्णप्रा इति भावनां कृत्वा पंच कुण्डे प्रावसथ्यमध्यादिक्रमे
ण ॐ ह्रीं ह्रं परं ज्योतिषि जुहोमि सोहं हंसः स्वाहा २ त्याहि ॐ ह्रीं ह्रं परं ज्योतिषि जुहोमि सोहं हंसः स्वाहा
त्वं ते दशवर्णशो दशाहुतिहोमं कृत्वा पुनः प्रणवभवनेश्वरीभ्यां देह मुत्याद्यनुलिपिं न्यस्य तिलपिष्टति
लोमसंहारव्यापकेन पाणी रसं हत्वाभ्यन्तरहोमं कुर्यात् लं शं मं नं एां जं डं श्रीं पं ऊं हंस्त्राकाशाहतत्वा
त्रश्रोत्रवागात्मप्रशान्तनीतनाद तुर्यातीता गुप्रह सदाशिवे प्राणवास देवात्परं ज्योतिषि जुहोमि सोहं हं
सः स्वाहा हं लं वं दं डं जं गं ऐं लं ईं रं तेजोरूपतन्मात्र चक्षुःपादाहंकारविद्यामकार सुषुप्ति संहार रुद्रा
तोर प्रभुस्थात्परं ज्योतिषि जुहोमि सोहं हंसः स्वाहा सं रं फं यं वं छं खं ईं रं रं दं अं बुसतन्मात्ररसनं
प्रमनः प्रतिष्ठोर्करस्वप्नाश्रुस्थितिविष्णुवामदेवानिरुद्धात्परं ज्योतिषि जुहोमि सोहं हंसः स्वाहा
यं पं तं हं चं कं वें श्रं श्रां लं पृथिवीगन्धतन्मात्रघ्राणोपस्थबुद्धिनिष्ठाकार जाग्रन्सृष्टिब्रह्म

सद्योजातनारायणान्परं ज्योतिषि जुहोमि सोहं हंसः स्वाहा ३ त्यालस्याद्दिपंचकंडे छुऊ त्वाप्रणवभु
वनेश्वरी श्रीं शरीरमुत्पाद्य विन्दुलिपिं न्यस्य लयरों वयहों रयरों यघरों हयरों मितिपंचकंडाग्निर्दे
कीलस्य सर्ववह्निविप्रतिलोमेन शरीरं संहृत्य ओं ह्रीं श्रं परं ज्योतिषि जुहोमि सोहं हंसः स्वाहा ३ त्या ना
प्र. सा. ओं ह्रीं श्रं परं ज्योतिषि जुहोमि सोहं हंसः स्वाहा ३ त्यनं कृत्वा पूर्ववच्छरीरमुत्पाद्य विन्दुविसर्गलिपिं
सं. न्यस्य पूर्ववद्देहं संहृत्य ओं ह्रीं लं वं रं यं हं मरकतवर्णके तं परं ज्योतिषि जुहोमि सोहं हंसः स्वाहा ३ त्यादिहृ
८२ वैंकव ग्रवप्रकान् कृत्वा सर्ववदुत्पाद्य केशवादिमातृका विन्यस्य पूर्ववत्संहृत्य वं डं सः प्रकृतिं परं ज्यो
तिषि जुहोमि सोहं हंसः स्वाहा ३ अहं पुरुषं परं ज्योतिषि जुहोमि सोहं हंसः स्वाहा ३ तिप्रकृतिपुरुषहोमं
कृत्वा सर्ववदुत्पाद्य श्रीकण्ठादिलिपीर्न्यस्य संहृत्य देहं सोहं सर्ववच्छरीरं संहृत्य ओं ह्रीं श्रं नारायणं ज्योतिरहं
42 परं ज्योतिषि जुहोमि हंसः सोहं स्वाहा ह्रस्यादिसकारपर्यन्तं लिपिन्यासस्याने षुन्यासस्तत्वेन कृत्वा सर्ववदुत्पा
द्य शक्तिलिपिं न्यस्य संहृत्य स्वरान्भुवि न्यस्य ओं ह्रीं श्रं श्रां श्रः सुराधिपतिं श्रीं श्रादित्यं नारायणं ज्योतिरहं परं
ज्योतिषि जुहोमि हंसः सोहं हंसः स्वाहा ३ स्यादिसोमपर्यन्तं सप्तग्रहहोमान् सर्वैकृत्य सप्तग्रहस्याने
छुकृत्वा सर्ववत्पासरूपेणोच उत्पाद्य कमला लिपिं न्यस्य संहृत्य ओं ह्रीं श्रं श्रां श्रः उं सोममण्डलं नारा
यणं ज्योतिरहं परं ज्योतिषि जुहोमि हंसः सोहं स्वाहा ओं ह्रीं कं खं गं मं श्रं सूर्यमण्डलं नारायणं ज्योति
रहं परं ज्योतिषि जुहोमि हंसः सोहं स्वाहा ओं ह्रीं पं दं मं वह्निमण्डलं नारायणं ज्योतिरहं परं ज्योतिषि ८२
जुहोमि हंसः सोहं स्वाहा इति मण्डलत्रयं होमं कृत्वा उत्पाद्य मातृमातृका न्यस्य संहृत्य त्रं

ष्ठां रं वं हं पुरुषं नारायणं ज्योतिरहं परं ज्योतिर्विरजो होमि हंसः सोऽहं स्वाहा जं तं सः प्रकृतिं नारायणं ज्योति
रहं परं ज्योतिर्विरजो होमि हंसः सोऽहं स्वाहा इति पुरुषप्रकृतिहोमं कृत्वा सर्वं वं छं ईं रमणाय ॐ ह्रीं हंसः सो
ऽहं स्वाहा अग्नये नमः इत्यादितत्कामपर्यंतं ब्रह्मयागलिपिं न्यस्य ॐ ह्रीं अं आं लं लं सोऽहं परमात्मानं नारायणं।
ज्योतिरहं परं ज्योतिर्विरजो होमि हंसः सोऽहं स्वाहा इति व्यापकतत्परमात्महोमं कृत्वा मूलाधारं द्वादशां।
तं च स्पृष्ट्वा पृथग्द्वादशवारं प्रणवं संजप्य सहस्रार्चिषे हृदयम् स्वस्तिपूर्णाय शिरः उत्तिष्ठपुरुषाय शि
खा धूमव्यापिने कवचं सप्तजिह्वाय नेत्रं धनुर्द्धराय अस्त्रम् अपानेन षडंगं च यागमंत्रेण होमविधिः तदर्थं
प्राग्वक्रमात् कावत्तस्नानाविधिः अश्वत्थोदुंबराः प्लक्षन्यग्रोधसंभवाः समिधः तिलसर्षपदौग्ध्यघृता
न्यष्टद्रव्याणि मंत्रदिष्टानि एतैः क्रमेणानुकृत्या दद्यात् तत्तमेकं लक्षाद्युत्तसंख्यमथवापि तदर्धकं यः सर्वैर्हि
कीं सकलसिद्धिमवाप्य वाचामभयः पदं परतरं च परत्र याति समिधश्चिलतग्रोधोवटदौग्ध्य पायसं एतैः
द्रव्यैः रक्षाविषये प्रयोगांतरम् एकद्वित्रिकचतुष्कशताभिवृद्ध्यानां तां समीदृषविकृतिं प्रजुहोतु मं
त्री लुड्ग्रहादिविषमज्वरभूतपतालः पिशाचजनिते महति प्रकोपे अयमर्थः एवं क्तैरष्टद्रव्यैरेकैकैः
एकशतं वा द्विशतं वा त्रिशतं वा चतुःशतं वा तत्तदुपद्रवानुसारेणानुकुर्यात् लुड्गादिशांतिर्भवति प्रयोगां।
तरम् द्वादशसहस्रमथवा तद्विगुणं चतुर्गुणं वाप्यनुकुर्यात् लुड्ग्रहादिविषमज्वरभूतसंभवे कोपे अय
मर्थः एवं क्तैरष्टद्रव्यैरेवं द्वादशसहस्रादिसंख्यं कुर्वीत लुड्गादिशांतिर्भवति प्रयोगांतरम् अथ पाप्र
तिपत्तिमंत्रकाणां विहितं स्यादिह विस्मृतिर्नराणां संशमयेदचिरात्सहस्रवत्या मतिमानुवसुभि
रेव जुहुयात् अयमर्थः मंत्रजपादौ विहितप्रतिपत्यभावात् विस्मृतिर्भवेत् कर्तुः तस्मात्तत्परिहा
रार्थं एवं क्तैरष्टद्रव्यैरेकैकैः सहस्राहुत्या कुर्वीत प्रयोगांतरम् एतैः सहस्राद्वितयाभिवृद्ध्या जुहोति य

स्तत्क्रमप्रोयथावत् जपेत्तेनैवसावित्रस्मृतिं चमापस्मृतिं शापभवांश्च दोषान् अयमर्थः ऐर्वीकैर॰
ष्टद्व्यैरेकैकैर्ह्रिसहस्रंजप्त्कुर्यात् तेनविस्मृतिं अपस्मारंचशापदोषांश्च शमयेत् प्रयोगांतरम् म॰
धुत्रयावसितैरतैलंतज्जहोतिमंत्रीतस्यसुराधिपविभवोमहद्भ्यात्तेनलवायेतेनचिरात् एतैरिति
ऐर्वीतोरष्टद्व्यैरित्यर्थः एतैर्द्व्यैरेवप्रयोगांतरंलक्षनवर्धकंवामधुरत्रयसंयुतैस्तथाजुहुयात् अ॰
प्रसा॰ धूत्रयात्तथाखीकृत्रिभुवनमाखिलंवशीकुरुते प्रयोगांतरम् लक्षंतिलानांजुहुयाद्दक्षानांअ॰
म मेसिर्यर्थानलिनेश्वतावत् दोग्ध्रेनपुष्पैर्यशासेऽतेनवक्ष्पायनातीकृतस्मैश्चलोणैः शालीनं
४२ डुलचूर्णैकैस्त्रिमधुरैः सिक्तैः सुसाध्याकृतिंकृत्वाष्टोर्ध्वशतात्व्यमसस्थितधीः प्राणान् प्रतिष्ठा॰
पयेत् न्यासोक्तः क्रमतोनिशासुजुहुयात्तांसप्तरांत्रनरोनारीवावशामेति मंत्रविधिनातेनैवलो॰
43 णेनच पंचाशद्दोषधिविपाचितपंचगव्यजातेनचतेनशतवृत्तिकृनेतः वाराग्नौ तावत्तज्जप्यावि॰
धिनापिसमग्रसिद्धिंभस्मादतीवसकलाभ्युदयावहंतत् अनुदिनमनुलिंपेतेनकिंचित्समग्रा॰
त्तिलकमपिविदध्यांज्ञमांगेदिपिच अनंततंतुरितापस्मारभूतापमृत्युग्रहविषरहितः स्यात्सुतये
वध्वजाभिः अस्यार्थः दोग्ध्रंतीरपथसंज्ञातीकृतसंभवप्रेयोपापहंपुनः प्रागुक्तपंचायाद्रव्यौष॰
धिपुतंपंचगव्यंकथित्वातत्रजातेवयगौशतवारमनेनमंत्रेणाज्येनकृत्वातद्भस्मतावज्जत्वा
प्रतिदिनंहिदेहेच अनेनविलिपेच्चतिलकमपिकुर्यात् शिरसिदिपेच्च अनेनदुरितनाशयरक्षा राम
पुत्रावाप्त्यादिफलंभवति गुरुणादक्षिणनियमोमूलग्रंथेउक्तः अथदशाविधिलिपिन्यासउ॰ ४२

चाते वाग्भवाद्या नमो न्यासस्त्वथा मातृकान्तराः श्रीविद्याविषये मंत्री वाग्भवाद्यप्रसिद्धये बालाद्यामा
तृकान्यासमप्यतं गीविषये तथा बीजद्वयाद्या वाराह्याद्या वाराही मंत्रमभ्यसेत् मातृकान्तेवे वाग्भवाद्या त्रितारा
द्या श्रीबीजाद्या च विन्यसेत् श्रीविद्याक्रमसज्जायां विशेषादीरिते हि ते वाग्भवाद्या चाकृदा स्यात् त्रिताराद्या चका
मदा श्रीबीजाद्या महैश्वर्यदायिनी मातृकास्मृता रुद्रयामले अर्द्धं विन्दुयुते विसर्गसहिते ह्रद्धे त्वयाश्री
युते बाला संपुटिते तया च परया श्रीविद्यया लंकृते श्रीरोहादेवतेरस्तनश्च मततेन्या संपुनं हंसयोयोजना
ति परं ससर्वं जगतां सृष्टिस्थिति ध्वंसकृत अर्द्धश्चापि सविन्दुकस्य च कलाद्युक्कैश वाद्यन्त या श्रीकं कादिष्व
न्वष्टशक्तिकमलामाहैरस्त्येकैकशः न्यासमल्पेदशधा हृदयं निगदिता सैव ब्रह्मय्यामातृकाः सर्वे साधकसि
द्धिसाधनविधौ संकल्पकल्पद्रुमाः अथमन्त्रार्थः अथमं मातृकाविधानेक्तं गजराद्यादिके विन्यस्य पूर्वाशाह
तौम्यादिध्यानाश्च लिपिन्यासं कुर्यात तत्क्रमकानुक्रम्यते लीलयादिस्थानेषु अंनमः आंनमः इंनमः ईंनमः इत्या
दो विन्दुसहिततया न्यसेत् एवं प्रथमो न्यासः पुनर्द्वितीय उच्यते ब्रह्माऋषिः देवीगायत्रीछंदः मातृका सर
स्वतीदेवता हलो बीजानि स्वराः शक्तयः अभीष्टसिध्यर्थे विनियोगः कादिवर्गैः षड्भिः षडंगानि कुर्यात् सिंदू
रकांतिममिताभरणां त्रिनेत्रां विद्याक्षसूत्रमृगपोतवरान्दधाना पार्श्वस्थितां भगवतीमपि कांचनाभां ध्या
येत्कराब्जधृतपुस्तकसाक्षमालाम् एवं ध्यात्वा अंनमः आंनमः इंनमः ईंनमः इत्येवं रूपेण सविंदुकत
या न्यसेत् पुनस्तृतीय कलायुक्तविधानमुच्यते प्रणवकलामातृकायाः प्रजापतिऋषिः गायत्री
छंदः कलात्मवर्णाजननी शारदा मातृकासरस्वती देवता अं बीजं स्त्रौं शक्तिः सरस्वतीप्रीत्यर्थे विनि
योगः ॐ अं अथस्वाहा ॐ ऊर्ध्वशिरस्याद्यंगानि हस्तौः पश्यं भैरव्यां गणमयाहरित्तां पुस्तकं वर्तमानां टंकं

वं क्लीं श्रीः

राम
४५

ऋं कपालं दरममृतलसद्धेमकुंभं वहंतीम् मुक्ताविद्रुमपीतस्फटिकनवजपाबंधुरैः पंचवक्त्रैः स्वदेवै वीसोजनन्यां
सकलशशिनिभां भारतीं तां नमामि ॐ अं ॐ निवृत्तिकलायै नमः ॐ आं ॐ प्रतिष्ठाकलायै नमः ॐ इं ॐ विद्याक
लायै नमः ॐ ईं ॐ शांतिकलायै नमः ॐ उं ॐ इंधिकाकलायै नमः ॐ ऊं ॐ दीपिकाकलायै नमः ॐ ऋं ॐ रेचि
प्र॰ सा॰ काकलायै नमः ॐ ॠं ॐ मोचिकाकलायै नमः ॐ लृं ॐ पराकलायै नमः ॐ ॡं ॐ सूक्ष्माकलायै नमः ॐ एं ॐ
सं॰ सूक्ष्मामृताकलायै नमः ॐ ऐं ॐ ज्ञानामृताकलायै नमः ॐ ओं ॐ आप्यायिनीकलायै नमः ॐ औं ॐ व्यापिनी
५८ कलायै नमः ॐ अं ॐ व्योमरूपकलायै नमः ॐ अः ॐ अनंताकलायै नमः ॐ कं ॐ सृष्टिकलायै नमः ॐ खं ॐ
ऋद्धिकलायै नमः ॐ गं ॐ स्मृतिकलायै नमः ॐ घं ॐ मेधाकलायै नमः ॐ ङं ॐ कांतिकलायै नमः ॐ चं ॐ
लक्ष्मीकलायै नमः ॐ छं ॐ द्युतिकलायै नमः ॐ जं ॐ स्थिराकलायै नमः ॐ झं ॐ स्थितिकलायै नमः ॐ ञं ॐ सि
44 द्धिकलायै नमः ॐ टं ॐ जराकलायै नमः ॐ ठं ॐ पालिनीकलायै नमः ॐ डं ॐ शांतिकलायै नमः ॐ ढं ॐ ऐश्वर्य
कलायै नमः ॐ णं ॐ रतिकलायै नमः ॐ तं ॐ कामिकाकलायै नमः ॐ थं ॐ वरदाकलायै नमः ॐ दं ॐ आ
ह्लादिनीकलायै नमः ॐ धं ॐ प्रीतिकलायै नमः ॐ नं ॐ दीर्घाकलायै नमः ॐ पं ॐ तीक्ष्णाकलायै नमः
ॐ फं ॐ रौद्रीकलायै नमः ॐ बं ॐ भयाकलायै नमः ॐ भं ॐ निद्राकलायै नमः ॐ मं ॐ तंद्रीकलायै नमः
ॐ यं ॐ क्षुधाकलायै नमः ॐ रं ॐ क्रोधिनीकलायै नमः ॐ लं ॐ क्रियाकलायै नमः ॐ वं ॐ उत्कारीकलायै नमः
ॐ शं ॐ मृत्युकलायै नमः ॐ षं ॐ पीताकलायै नमः ॐ सं ॐ श्वेताकलायै नमः ॐ हं ॐ अरुणाकलायै नमः ॐ
ळं ॐ असिताकलायै नमः ॐ क्षं ॐ अनंताकलायै नमः एवं कलाभुक्तमातृकां विन्यस्य पुनश्च नधीकेशवादि ५८
युतमातृकां विन्यसेत् केशवादियुतमातृकाया रुद्रऋषिः गायत्री छंदः श्रीलक्ष्मीनारायणो देवता क्लीं बीजं ह

मोक्षार्थे विनियोगः ह्रां हृत् ह्रीं शिर इत्याद्यंगानि हस्तैर्बिभ्रत्सरसिजगदापाशं खचक्राणि विद्यापद्मादर्शौ
कनककलशमेव विद्युद्विलासं वामोत्संगस्तनमथ विलोलाकल्पमाशेषलोभादेकीभूतं वपुरवतु वः पुंडरी
थ देवतान्यासः ऐं ह्रीं श्रीं ह्स्रौं स्हौः अं आं सहस्रकोटियोगिनीकुलसेवितायै अरविंदरूपांबादेव्यै नमः इं
ईं सहस्रकोटियोगिनीकुलसेवितायै योगिप्रतिष्ठांबादेव्यै नमः उं ऊं सहस्रकोटियोगिनीकुलसेवितायै तपस्वि
73 विघ्नांबादेव्यै नमः ऋं ॠं सहस्रकोटियोगिनीकुलसेवितायै मुनिगणाराध्यांबादेव्यै नमः ऌं ॡं सहस्रकोटियोगि
तीमा ५ नीकुलसेवितायै गुणिगणांबादेव्यै नमः एं ऐं सहस्रकोटियोगिनीकुलसेवितायै देवहूतांबादेव्यै नमः
ओं औं सहस्रकोटियोगिनीकुलसेवितायै राक्षसगणांबादेव्यै नमः अं अः सहस्रकोटियोगिनीकुलसेवि
तायै विद्याधररूपांबादेव्यै नमः कं खं सहस्रकोटियोगिनीकुलसेवितायै महोकुष्मांबादेव्यै नमः घं गं सह सि॰ ७॰
स्रकोटियोगिनीकुलसेवितायै सारकरालिकांबादेव्यै नमः ङं चं सहस्रकोटियोगिनीकुलसेवितायै अप्रसरो
जपांबादेव्यै नमः छं जं सहस्रकोटियोगिनीकुलसेवितायै धर्मविजयांबादेव्यै नमः झं ञं सहस्रकोटियोगिनी ७२
कुलसेवितायै गुह्यकाजिनांबादेव्यै नमः टं ठं सहस्रकोटियोगिनीकुलसेवितायै यक्षपराजितांबादेव्यै।

नमः ॐ हं सहस्रकोटियोगिनीकुलसेविताये किन्नरवामांबादेव्यै नमः णं नं सहस्रकोटियोगिनीकुलसेविताये पन्न
गज्येष्ठांबादेव्यै नमः थं दं सहस्रकोटियोगिनीकुलसेविताये पितृरुद्रांबादेव्यै नमः धं नं सहस्रकोटियोगिनी(
कुलसेविताये गणेशमायांबादेव्यै नमः पं फं सहस्रकोटियोगिनीकुलसेविताये भैरवकुंडल्यंबादेव्यै नमः।
बं भं सहस्रकोटियोगिनीकुलसेविताये वड्ककाल्यंबादेव्यै नमः मं यं सहस्रकोटियोगिनीकुलसेविताये प्रथ
मभगवत्यंबादेव्यै नमः रं लं सहस्रकोटियोगिनीकुलसेविताये त्रैलोक्यकालरात्र्यंबादेव्यै नमः वं शं सहस्रकोटि
योगिनीकुलसेविताये ब्रह्मसर्वेश्वर्यंबादेव्यै नमः षं सं सहस्रकोटियोगिनीकुलसेविताये विष्णुसर्वेश्वर्यंबादे
व्यै नमः हं ळं सहस्रकोटियोगिनीकुलसेविताये रुद्रसर्वेश्वर्यंबादेव्यै नमः क्षं सहस्रकोटियोगिनीकुलसेविताये
चराचरमात्रंबादेव्यै नमः ऐं ह्रीं श्रीं ह्सौः स्हौः अं आं इत्यादि सकलमातृकाचक्रसकलदेवतात्मिकायै श्रीपरां
बादेव्यै नमः इति व्यापकं न्यसेत् सर्वमंत्राणां बीजपंचकं चक्रमातृकावर्णाद्यं सर्वकं न्यसेत् अथ न्यासस्थानानि।
पादद्वयगुल्फद्वयजंघाद्वयजानुद्वयोरुद्वयकटिरुद्वयपार्श्वद्वयस्तनद्वयकक्षद्वयांसद्वयकर्णद्वयनेत्रद्वयाक्षि
रोब्रह्मरंध्रेषु क्रमेण न्यसेत् ऐं ह्रीं श्रीं ह्सौः स्हौः कं कं गं डं अनंतकोटिभूचरीकुलसहिताये आं ळां मंगलांबादेव्यै नमः
आं ळां ब्रह्माण्यंबादेव्यै नमो अनंतकोटिभूतकुलसहिताय आं ळं मंगलानाथाय अं हं असितांगभैरवाय नमः चं
छं जं झं अनंतकोटिखेचरीकुलसहिताये इं लां चर्चिकांबादेव्यै इं लां माहेश्वर्यंबादेव्यै नमो अनंतकोटिवेतालकुल
सहिताय इं लं चर्चिकानाथाय इं लं रुरुभैरवाय नमः टं ठं डं ढं णं अनंतकोटिपातालचरकुलसहिताये उं हां योगे
श्वर्यंबादेव्यै उं हां कौमार्यंबादेव्यै नमो अनंतकोटिपिशाचकुलसहिताय उं हं योगीश्वरीनाथाय उं हं चण्ड(
भैरवाय नमः तं थं दं धं नं अनंतकोटिडाकिनीकुलसहिताये ऋं हं सां हरसिद्धांबादेव्यै ऋं हं सां वैष्ण

अथमातृभैर
वन्यासः ८

हेत्रेशकाल
रात्र्य
प्रमथभगवत्यं ५

यंवाराह्यै नमोनंतकोटि श्मशानकुलसहिताय यक्षसंहारसिद्धनाथाय यक्षसंक्रोधभैरवाय नमः पंफंबंभंमं अनंतकोटि
महाचरीकुलसहिताय ऐं लं पां महालक्ष्म्यै वाराह्यै लं हं पां कालसंस्थविकाराह्यै नमोनंतकोटि त्रिपुरान्तकुलसहिताय लं षं भ
द्रासिकानाथाय लं धंकमंत्रभैरवाय नमः यं रं लं वं अनंतकोटि गिरिचरकुलसहिताय षं शं गिरिकलावाराह्यै षं
शं हंडा एं वाराह्यै नमोनंतकोटि चंडीकुलसहिताय षं शं गिरिकलानाथाय षं क्षं कपालिभैरवाय नमः शं षं सं हं
अनंतकोटि चराचरकुलसहिताय घंटाकालनाराह्यै वाराह्यै ओं चामुंडाह्यै नमोनंतकोटि प्रेतकुलसहिता
ये अः लां भीषण एं वाराह्यै अः लां महाकालम्बवाराह्यै नमोनंतकोटि शाकिनीकुलसहिताय अं लं भीषणनाथा
य अं लं संहारभैरवाय नमः मूलाधारस्वाधिष्ठानमणिपूरकानाहतविशुद्धाख्यललाटशिरःस्थक्रमेणान्यसे
त् बीजपंचकं मंत्राहो सर्वत्र योज्यम् एवमष्टमूलसहिताष्टभैरवन्यासः अस्य महाषोढान्यासस्य फलमाह
एवं न्यासे कृते देवि साक्षात्परशिवो भवेत् मंत्रौघे चात्र संदेहो निग्रहानुग्रहे क्षमः महाषोढाह्वयन्यासं यः कु
रोति दिने दिने देवाः सर्वे नमस्यंति नमामि वचनं संशयः महाषोढाह्वयन्यासं यः करोति हि पार्वति दिव्यं ते व
सगुहिष्टं समं नाहं पायोजनम् कृत्वा न्यासमिमं देवि यत्र गच्छति मानवः तत्र स्याद्विजयो लाभः सन्मानं चो
हवप्रिये महाषोढाकृतन्यासः नदंतं यदि वंदते मासान्मृत्युमवाप्नोति यदि ज्ञानाशिवः स्वयम् वज्र
पंजरनामानमेतन्न्यासं करोति यः दिव्यान्तरिक्षभूशैलजलारण्यनिवासिनः उग्रभूतवेतालदेवद
नाग्रहादयः भयत्रस्ता नमंत्रं साक्षान्नेत्रं कुलेश्वरि महाषोढाह्वयन्यासं ब्रह्मविष्णुशिवादयः दे
वाः सर्वेपि कुर्वंति ऋषियोगिमुनीश्वराः बहुनोक्तेन किं देवि न्यासमेतन्मम प्रियम् नाख्येयं यदुदेदे
विना शिष्याय प्रकाशयेत् आज्ञासिद्धिमवाप्नोति रहस्यं समाचरेत् अस्मात्परतरं नास्ति देव

म:सा
सं
७४
74
७४

नाभावसिद्धिरा लोके नास्ति न संदेहः सत्यं सत्यं वरानने ऊर्ध्वाम्नायप्रवेशाच्छ्रीपरामप्रसादवर्चिनम् महाषो-
ढापरिज्ञानं नान्यस्य तपसः फलम् महाषोढाह्वयन्यासं कृत्वा यो यत्र तिष्ठति तत्तेजोभिर्महाशैवं शतयोज-
नमायतनम् इति नैकधितं देवि ध्यानन्यासादिकं प्रिये समासेन कुलेशानि किं भूयः श्रोतुमिच्छसि इति महा-
षोढान्यासः समाप्तः ॥ अथ कामकलान्यासः ओंकारोर्द्ध्वगतं बिन्दुं देवि रूपस्यात्मनः वक्त्रं प्रकल्पयेत् ऐं ह्रीं श्रीम श्रीम
हात्रिपुरसुंदरी परारूप वक्त्राय नमः इति मुखे व्यापकं कृत्वा ततः सपरार्द्धकं बिंदुद्वयं स्तनयुग्मं ध्यात्वा ऐं ह्रीं
श्रीं श्रीमहात्रिपुरसुंदरि परापरात्मकबिन्दुद्वयाय नमः इति स्तनयोर्व्यापकं कृत्वा तदधो बिंदुमध्ये सपरार्द्ध-
सिबीजकरेखां योनिं प्रकल्प्य ऐं ह्रीं श्रीं श्रीमहात्रिपुरसुंदरि सपराधिमिश्रबीजकरेखात्मयोन्यै नमः इति करतलेन ना-
भेरधो ध्योमुखेन विन्यस्य ऊर्ध्वबिंदुरूपं वक्त्रं तद्गतं नासाललाटकर्णौ तदधो गजातं स्तनरूपबिंदुद्वयागतं
भुजचतुष्टयं योनिरूप सपरार्धगते पादद्वयं ध्यात्वा सर्वसमष्टिरूपं महाकामकलात्मकं कामेश्वरीनामरह-
स्यात्मकं देवीरूपमात्मविग्रहं ध्यात्वा ऐं ह्रीं श्रीं ऐं कएईलह्रीं सर्वज्ञायै श्रीमहात्रिपुरसुंदर्यै हृदय ऐं ह्रीं श्रीं
क्लीं हसकहलह्रीं नित्यतृप्तायै श्रीमहात्रिपुरसुंदर्यै शिरः ऐं ह्रीं श्रीं सौः सकलह्रीं अनादिबोधायै श्रीमहा-
त्रिपुरसुंदर्यै शिखा ऐं ह्रीं श्रीं ऐं कएईलह्रीं स्वतंत्रायै श्रीमहात्रिपुरसुंदर्यै अस्त्रम् ध्यानम् अरुणां
करुणातरंगिताक्षीं धृतपाशांकुशपुष्पबाणचापाम् अणिमादिभिरावृतां मयूखैरहमित्येव विभा-
वये भवानीम् ध्यायेत्परशिवाङ्कस्थां पाशांकुशधनुःशरैः भासमानां चतुर्बाहुं मरुणामरुणांशु-
काम् प्रकाशमानां प्रथमे प्रयाणे प्रतिप्रयाणेऽप्यमृतायमानाम् अन्तःपदव्यामनुसंचरंतीमानन्दरूपाम-
वलोकयाम इति ध्यात्वा अथांगुलिन्यासः अं अंगुष्ठाभ्यां आं तर्जनीभ्यां इं मध्यमाभ्यां नमः ईं अनामिकाभ्यां नमः

सौः कनिष्ठिकाभ्यां नमः ॥ सौः करतलकरपृष्ठाभ्यां नमः, इति प्रथमस्वरहृदयपराबीजानि क्रमेण संयोज्य मध्यमादि
कनिष्ठांतमंगुष्ठादितलांते च न्यसेत् अथ षडंगन्यासः करपादद्वयमूलमध्याग्रेषु मूलमंत्रं खंडत्रयेण व्यापकं
विन्यसेत् अथ पूर्णन्यासः । शिरस्यधोमुखे स्थितसहस्रदलकमलकर्णिकामध्यगतसकलशिशिरकरबिंबे
अकथाकगर्भत्रिकोणं शृंगाटमनुसरन् आधारचतुर्दलकमले सर्वतनुशृंगाटं विभाव्य हार्दकलारू
प्रप्र: सा: पवह्निकुंडलिनीलिंगाकारतया सुषुम्नामध्यषट्सरसिजग्रन्थिभेदक्रमेण योनिरूपामृतकुंडलिनीम-
सं: रूपे प्रवेशपापमृतानलकुंडलिन्यो मिथो मथनेन संभूतामृतधारेत्नदीयं स्मार्यं स्मारमात्मानं सिंचेत् त
७५ त्रिशृंगाटमिति त्रिकोणम् हार्दकलेति च त्रिकोणम् इति परान्यासः । अथ पश्यंतीन्यासः शिरः शिखाग्र
त्रिकोणप्रकाशात्मकं विभाव्य तस्य वामरेखायां ऐं ह्रीं श्रीं वामायै ऐं ह्रीं श्रीं ज्येष्ठायै ऐं ह्रीं श्रीं रौद्र्यै ।
इति न्यस्त्वा तस्य मध्यरेखायां ऐं ह्रीं श्रीं अंबिकायै ऐं ह्रीं श्रीं प्रकाशात्मिकायै ऐं ह्रीं श्रीं इच्छायै ज्ञानायै ।
क्रियायै नमः इति न्यस्त्वा तस्य दक्षिणरेखायां तेजस्कारात्मिकासविकल्पनादाय नमः अकारात्मने स्प
मनादाय नमः बिंदुद्वयात्मने स्पर्शनादाय नमः कायै । स्वरसात्मिकायै नमः इति न्यसेत् इति पश्यंतीन्यासः ।
अथ मध्यमान्यासः अकथात्मने षट्कोणनाथात्मने नादाय नमः अर्धचंद्रात्मने ध्वनिनादाय नमः ह
त्मने बिंदुनादाय नमः एकारात्मने शक्तिनादाय नमः बिंदुद्वयात्मने बीजनादाय नमः हंसरूपात्मने अक्ष
रनादाय नमः ब्रह्मरंध्रे ललाटे भ्रूमध्ये आस्ये कंठे हृदये नाभौ स्वाधिष्ठाने आधारे च यथाक्रमेण न्यसेत् तार
त्रयं मंत्रादौ सर्वत्र योज्यम् इति मध्यमान्यासः । अथ वैखरीन्यासः आधारकमलचतुर्दलेषु ऐं ह्रीं श्रीं व ७५
हसौंः शहसैं सहसैं इति न्यस्य स्वाधिष्ठानकमलषड्दलेषु बहसैं भहसैं महसैं यहसैं रहसैं लहसौः इति न्यस्त्वा

तारत्रयं सर्वत्र योज्यम् आधारस्वाधिष्ठानान्तरदेवतास्तपनभास्वरतन्तुलतावराभयकराध्येयाः अथमणि
पूरकमलदशदलेषु ऐं ह्रीं श्रीं डहसक्लीं· ढहसक्लीं· णहसक्लीं· तहसक्लीं· थहसक्लीं· दहसक्लीं· धहस
क्लीं· नहसक्लीं· पहसक्लीं· फहसक्लीं· इति न्यसेत् अनाहतकमलद्वादशदलेषु ऐं ह्रीं श्रीं कहसक्लीं· खह
सक्लीं· गहसक्लीं· घहसक्लीं· ङहसक्लीं· चहसक्लीं· छहसक्लीं· जहसक्लीं· झहसक्लीं· ञहसक्लीं· टह
सक्लीं· ठहसक्लीं· इति न्यसेत् तारत्रयं सर्वत्र योज्यम् मणिपूरकानाहतदेवता विलीनविद्रुमरसारुणाः
पुष्पपाशेक्षुशरासनांकुशा ध्यायेत् विशुद्धिकमलषोडशदलेषु ऐं ह्रीं श्रीं अहसौः आहसौः इहसौः ईहसौः
उहसौः ऊहसौः ऋहसौः ॠहसौः लृहसौः ॡहसौः एहसौः ऐहसौः ओहसौः औहसौः अंहसौः ऐं ह्रीं
श्रीं अः हसौः इति विन्यस्य आज्ञाकमलदलद्वये हहसौः क्षहसौः इति विन्यसेत् तारत्रयं सर्वत्र योज्यम् वि
शुद्ध्याज्ञादेवताः स्फटिकमयपांचालिकाः सन्निभाः पुष्पमयबाणगोरोचितरसालचापस्तीपाशांकुलितपा
णिपल्लवा ध्येयाः इति वैखरीन्यासः अथ कामकलास्वरूपमात्मानं विचिंतयेत् तद्यथा शिवशिवारूपकु
लाकुलकुंडलिनीमेलनोदितप्रथमबिंदुदेवीस्वस्यात्मनो मुखं परिकल्प्य ऐं ह्रीं श्रीं कएईलह्रीं श्रीमहात्रिपुरसुं
दरीपरारूपवक्त्रश्रीपादुकां पूजयामीति वक्त्रे व्यापकं विन्यस्य प्रथमबिंदुस्थानद्वयबिंदुद्वयं कुचयुगमनुस्म
र्य ऐं ह्रीं श्रीं हसकहलह्रीं श्रीमहात्रिपुरसुंदरीसपरार्धकलात्मकस्तनयुगलश्रीपादुकां पूजयामीति स्तन
योर्व्यापकं विन्यस्य हार्दकलायोनिं विचिंत्य ऐं ह्रीं श्रीं सकलह्रीं महात्रिपुरसुंदरीसपरार्धकलात्मजनक
रेखात्मकमस्तकयोनिश्रीपादुकां पूजयामीति नाभेरधोभागे व्यापकं तया विन्यस्य गुहदेवतामंत्रात्मनो मे कं परि
भाव्य पर्वतिर्विचितचक्रन्यासोक्तवाग्भवाद्यानिकरयोस्तत्तन्मंत्रसर्वकंमर्शयेत् तद्यथा दक्षिणकराङ्गु

लीषुवाणेन कनककर्पूर संध्यराग इंद्रनील मौक्तिकवर्णदेवताधिष्ठितान्विन्यस्य धनुर्वामाधःकरे सृणिं दक्षिणोर्ध्व
करे पाशं वामोर्ध्वकरे च प्रदर्शयेत् अथ नवयोनिन्यासः श्रोत्रयोश्चिबुके गंडयोरास्ये दृशोर्नासिकायां अंसयोः
हृदये कूर्परयोः उदरे जान्वोः पादयोः स्वाधिष्ठाने पार्श्वयोः हृदये स्तनयोः कंठे च मूलमंत्रखंडत्रयेण विन्य
सेत् अथ तुरीयन्यासः आधारहृदयभ्रूमध्येषु मूलमंत्रखंडत्रयं विन्यस्य ब्रह्मरंध्रे तुरीयखंडं विन्यसेत् तुरी
यखंडं चंद्रकलाखंडं श्रीवीजमित्यर्थः अथ देहन्यासः ऐं ह्रीं श्रीं कएईलह्रीं अग्निचक्रे कामगिर्यालये मित्रेशना
प्र॰ सा॰ थनवयोनिचक्रात्मक तत्त्वसृष्टिकृत्येच्छाशक्ति वाग्भवात्मक वागीश्वरीस्वरूप कामेश्वरीदेवी ब्रह्मात्मशक्ति
सं॰ श्रीपादुकां पूजयामीति कामेश्वरीमरुणां पाशांकुशाभय कपाल वराम चतुर्हस्तां चंद्रकलावतंसां त्रि
७६ नेत्रां ब्रह्मारूढां स्थां ध्यात्वा मूलाधार त्रिकोणाग्रकोणे विन्यसेत् ऐं ह्रीं श्रीं हसकहलह्रीं सूर्यचक्रे जाले
धरपीठे षष्ठीशनाथ द्वादशार हृदय चतुर्दशार चक्रे विद्यातत्त्वस्थितिकृत्य ज्ञानशक्ति कामराजात्मक कामकला
76 स्वरूप वज्रेश्वरीदेवी विष्णवात्मक शक्ति श्रीपादुकां पूजयामीति वज्रेश्वरीं प्रवालहरिं करधृक्षुवालंवित पाशांकु
सं शचापबाण कपालमातुलुंगां विशेषक वासिनीं ध्यात्वा मूलाधारत्रिकोण दक्षिणकोणे विन्यसेत् ऐं ह्रीं श्रीं स
कलह्रीं सोमचक्रे पूर्णगिरिगह्वरे उड्डीशनाथाष्टार षोडशार चतुरस्र चक्र शिवतत्त्व संहारकृत्य क्रियाशक्ति वी
जात्मक परापर शक्तिस्वरूप भगमालिनीदेवी रुद्रात्म शक्ति श्रीपादुकां पूजयामीति भगमालिनीं शरच्चंद्र
दा॰ चंद्रिकावर्तंसां पाशांकुशपुस्तकाद्य वलयविलसितबाहु चतुष्टयां त्रिलोचनां रुद्रोत्संगगतां ध्यात्वा ७६
मूलाधारत्रिकोण वामकोणे न्यसेत् ऐं ह्रीं श्रीं कएईलह्रीं हसकहलह्रीं सकलह्रीं इत्यंते श्रीमि
त्युच्चार्य परब्रह्मचक्रे महोड्याणपीठे चर्यानाथ समस्त शक्ति स्वरूप श्रीमहात्रिपुरसुंदरीदेवी परब्रह्मात्मः

श्रीं क्लीं श्रीपादुकां पूजयामीति मूलाधारत्रिकोणमध्ये विन्यसात् एवमेव कामेश्वर्यादिमंत्रचतुष्टयेप-
कैकेन पुनरपि मूलाधारहृदयभ्रूमध्यब्रह्मरंध्रेषु चक्रमेण न्यसेत् एवं श्रीविद्यान्यासं कृत्वा मूलसो-
गन्धपुष्पादीनि मानस्युपचारान् मानसराजोपचारान् तद्यथा रं नमस्कारः सुदीप्तवासनं ल्हं शेदयं लं मंगलानि
च मनोहृतिर्विविश्वाने स्मरणेन कल्पितानि ध्वनयोगीनरूपेण महावाद्यप्रभेदतः छत्राणि नवपद्मानि क-
ल्पितानि मयाप्रभो सुषुम्नाध्वजरूपेण शुण्णहास्यचामरात्मना अहंकारो गजत्वेन ल्हं प्रोहे होरघात्मना इं-
द्रियाणि स्वरूपेण पुष्पादिरथवल्मीना मनः प्रग्रहरूपेण बुद्धिः सारथिरूपतः सर्वमन्यन्मयाल्हंप्रेनवोपक-
रणात्मना इति राजोपचारान् दत्वा मूलमंत्रं जपेत् । इति श्रीविद्यान्यासविधिः । अथ श्रीविद्यासंध्या-
वन्दनविधिः अथ प्रातः स्नानं कृत्वा यथाशक्ति सन्ध्यां मुद्रया शिरसि स्वगुरुपादुकां त्रिवारं विन्यस्य नत-
तो गुरुमध्यमानामिकाभिः सहितां मृगीमुद्रां पुनः स्वनाम च समलं हृदि विन्यस्य पुनरपि स्वगुरुपादुकां त्रि-
वारं विन्यस्य पंचोपचारैः संपूज्य योनिमुद्रां बद्ध्वा मानसे मनसि संप्रदर्श्य सहस्रारे [illegible] को दिव्योमार्कसप्र-
भं सत्यानन्दनाननं मयं भुक्तिमुक्तिप्रदं भजेऽतितान् ध्यात्वा स्वगुरुपादुकां सप्तवारं संजप्य कामकलां चतुष्ट-
यं क्रमेण मारुतं पीत्वा हं सः [illegible] सूक्ष्मसुषुम्नापर्वभेदं कृत्वा तमेव गुरुं देवतारूपेण हृदये प्रविश्य ध्यात्वा
सकलं क्रमविलेपनाभिमिति ध्यात्वा मूलविद्यां सप्तवारं संजप्य पुनः पंचवारं जपेत् नादिल्यमार्गगतरजतसो-
पाने ब्रह्मसंचिंत्य सप्तशाकिनीनां सहस्रपिकानां रजतसोपानद्वारा निर्गमनसमीपप्राप्तिं वामभागे स्थितिं
तां विभाव्य पुनरेकैकवारं जपेत् तासां गणाधिपानां [illegible] पुनरेकवारं जपेत् नमो भगवत्याः गुरो वयस्या-
मे ध्यात्वा [illegible] सोऽहं शिवाय परसौं कपर्ल [illegible] हसकहलह्रीं सकलह्रीं ह्यस्यरलक्षसहपरसौं [illegible]

परिभाव्य प्रासीनाय शयानाय गच्छते तिष्ठते क्रियाः सर्वतोऽङ्कुशरूपाय पाशरूपेण ।
ह्रौं षौं सौं दौं इत्यनेन मंत्रेणांकुशं निर्गत्यावश्यादिकं निर्वर्त्य इदधुन जले स्थित्वा ह्रां हृदयाय नमः उत्तिष्ठ त्रिशत्य
मउत्तिष्ठकुलनमस्तास्त्ववारिं
हलातनरवत्पना णा कुशमद्रयामसविरमउला तीर्थमावाह्य गंगे च यमुने चैव गोदावरि सरस्वति न
र्मदे सिंधु कावेरि जलेस्मिन् सन्निधिं कुरु इति मंत्रेण सन्निधापनं कृत्वा तस्मिन् त्रिकोणं परिभाव्य मूलमंत्रेण सप्त
वारं जपेन्नाघमर्षणस्नानं कृत्वा स्नात्वोत्थाय त्रयस्त्रिंशत्पटले वक्ष्यमाणकलशमुद्रया मूलमुच्चरन् सप्तवा
म. सा. सं. ७७ रं शिरस्यभिषिंच्य तीरमागत्य वाससी परिधाय सौरिति वाक्तत्त्वचतुष्टयेन वक्ष्यमाणेनाचम्य दक्षिणकोष्ठे
लमादाय मूलेन सप्तवारं संजप्य तज्जलमिडयाकृष्य स्वतः क्षेभित निखिलकल्मषप्रक्षालनेन कृष्णरूपं
जलं पिंगलया विरेच्य वामे ज्वलितायां वज्रशिलायां प्रक्षेपेण प्रक्षिपेत् पुनरपि दक्षिणकरे जलमादाय मूले
सप्तवारमभिमंत्र्य मूलव्यस्तसमस्तबीजैः पादहृदयब्रह्मरंध्र सर्वगात्रेषु संप्रोक्ष्य ॐ ऐं ह्रीं श्रीं ह्रां ह्रीं
सः मार्तंडभैरवाय प्रकाशशक्तिसहिताय नमः ऐं ह्रीं श्रीं ऐं त्रिपुरादेवी विद्महे क्लीं कामेश्वरि धीमहि सौः
77 तन्नः क्लिन्ने प्रचोदयात् इत्याभ्यां मूलेन च त्रिवारमर्घ्यं दत्वा ततो जले श्रीचक्रं संचिंत्य मूलेन सप्तवारं संतर्प्य
देवेभ्यः स्वाहा ऋषिभ्यो नमः पितृभ्यः स्वधा सर्वेभ्यो भूतेभ्यो वौषट् सर्वभैरवास्तृप्यंतु सर्वक्षेत्रपालास्तृप्यं।
तु इत्येतैस्त्रिवारं परिकरान्संतर्प्य तत्त्वचतुष्टयेनाचम्य तीर्थं संहारमुद्रया त्रयस्त्रिंशत्पटले वक्ष्यमाणया स
वितर्युपसंहृत्य नियतवचनो निजपदमात्रावलोकनो बाह्यजनमस्पृशन् मनवलोकयन् श्रसंभाव राम
यन् देवार्चनाय समागच्छेत् सस्यद्मिति संध्यावंदनविधिः अथ तत्त्वचतुष्टयमंत्रप्रकारः ॐ प्रकृत्य ७७
हंकार बुद्धिर्मनस्त्वक् चक्षुः श्रोत्र जिह्वा घ्राण वाक् पाणि पाद पायूपस्थ शब्दस्पर्श रूप रस गंधाका

शवायुवह्निसलिलभूम्यात्मना अं आं इं ईं उं ऊं ऋं ॠं ऌं ॡं एं ऐं ओं औं अं अः एकपदे ऌं ह्रीं आत्मतत्त्वेन स्थू
लदेहं परिशोधयामि स्वाहा ॐ प्रकृत्यहंकारबुद्धिमनस्त्वक्चक्षुःश्रोत्रजिह्वाघ्राणवाक्पाणिपादपायू
पस्थशब्दस्पर्शरूपरसगन्धाकाशवायुवह्निसलिलभूम्यात्मना अं आं इं ईं उं ऊं ऋं ॠं ऌं ॡं एं ऐं ओं औं अं अः
एकपदे ऌं ह्रीं आत्मतत्त्वेन स्थूलदेहं परिशोधयामि स्वाहा ॐ मायाविद्याकलारागकालनियतिपुरुषात्म
ना कं खं गं घं ङं चं छं जं झं ञं टं ठं डं ढं णं तं थं दं धं नं पं फं बं भं मं क्लीं हसकहलह्रीं विद्यातत्त्वेन सूक्ष्मदेहं
परिशोधयामि स्वाहा ॐ शिवशक्तिसदाशिवेश्वरशुद्धविद्यात्मना यं रं लं वं शं षं सं हं ळं क्षं सौः सकल
ह्रीं शिवतत्त्वेन कारणदेहं परिशोधयामि स्वाहा ॐ प्रकृत्यहंकारबुद्धिमनस्त्वक्चक्षुःश्रोत्रजिह्वाघ्रा
णवाक्पाणिपादपायूपस्थशब्दस्पर्शरूपरसगंधाकाशवायुवह्निसलिलभूमिमायाकलारागकाल
नियतिपुरुषशिवशक्तिसदाशिवेश्वरशुद्धविद्यात्मना अं आं इं ईं उं ऊं ऋं ॠं ऌं ॡं एं ऐं ओं औं अं
अः कं खं गं घं ङं चं छं जं झं ञं टं ठं डं ढं णं तं थं दं धं नं पं फं बं भं मं यं रं लं वं शं षं सं हं ळं क्षं
कएईलह्रीं क्लीं हसकहलह्रीं सौः सकलह्रीं श्रीं षट्त्रिंशत्तत्त्वात्मक सर्वतत्त्वेन स्थूलसूक्ष्म
कारणात्मकसर्वदेहं परिशोधयामि स्वाहा । अथ कलास्त्रोक्तप्रकारेण श्रीविद्यायाः
प्रयोगविधिर्लिख्यते । यदि कामयमीप्सेतात्मीयं श्रीविद्यादेवतायै विज्ञाप्य संकल्पयेत्
तत्कर्मसिद्ध्यर्थमेतावतीराहुतीः करिष्यामीति तिलाज्यैः शान्त्यै अग्नेरत्राय अमृतासमि
द्भूतपत्रैर्वै ज्वरशमनाय दूर्वाभिरायुषे कृतमालैर्धनाय कृतमालकौशैः उन्मत्ते
मोगाय विल्वदलैराज्याय पद्मैः साम्राज्याय सुहलाजैः कन्यायै नंद्यावर्तैः कवि

नाय वंजुलैर्वश्यै मल्लिकाजातिपुन्नागैर्भाग्याय बन्धूकजपाकिंशुकबकुलमधूकैर्वश्या
य लवणैराकर्षणाय करवीरैः सर्ववश्याय मालतीकुन्दैर्धान्याय कुंकुमरोचनादिसुगं
धैः सौभाग्याय पलाशपुष्पैः कपिलाघृतैर्वा तेजसे धत्तूरकुसुमैरुन्मादनाय हयवृन्तनिम्बस्ने
षान्तकविभीतकसमिद्भिः शत्रुनाशाय निम्बतैलाक्तलवणैर्मारणाय काकोलूकपक्षैर्विद्वेष
प्र.सा. णाय तिलतैलाक्तमरिचैः कासश्वासशमनाय जुहुयात् बलिं प्रदाय तत्र व्याहृतिहोमान् ॐ
म भूरग्नये च पृथिव्यै च महते च स्वाहा ॐ भुवो वायवे चान्तरिक्षाय च महते च स्वाहा ॐ स्वरादित्या
७८ य च दिवे च महते च स्वाहा ॐ भूर्भुवः स्वश्चन्द्रमसे च नक्षत्रेभ्यश्च दिग्भ्यश्च महते च स्वाहा इति च
तुर्भिर्मन्त्रैर्महाव्याहृतिहोमं कुर्यात् । इति त्रिपुराहोमविधिः । अथ वा त्रिपुराविषये नव मुद्राः क्रमे
णालिख्यन्ते संक्षोभद्रावणाकर्षवश्योन्मादमहाङ्कुशाः खेचरी बीजयोन्याख्यो नव मुद्राः प्रकीर्तिताः क
78 निष्ठानामिके मध्ये योजिते पृष्ठपृष्ठके अङ्गुष्ठौ संमुखौ योज्यौ तर्जन्यौ दण्डवत्कृते एषा संक्षोभिणी
त्यन्या द्रावणी मध्यतर्जनी द्रावण्या मध्यतर्जन्यावग्रे अन्तराङ्कुशयेत्तु तैः सैषाकर्षणी प्रोक्ता वश्याख्या
त्वतः परा कनिष्ठानामिके मध्ये स्वपृष्ठविवरे क्षिपेत् तलाभ्यां पृष्ठतर्जन्यावग्रे अङ्गुष्ठाग्रे नियो
जयेत् अस्यास्तु ततः कनिष्ठे द्वे त्यक्त्वा कर्षयेत्तु तैः तेन मध्यमानामावेष्ट्य मध्याग्रे अङ्गुष्ठयो
गतः विरले सजपेत्तर्जन्यौ इत्युन्मादिनी मता अस्यास्त्वनामिकातर्जन्यग्रे संघृष्ट्वाङ्कुचनात्
तः एवं महाङ्कुशा मुद्रा खेचरी च ततः परा रज्वाकारौ करौ कृत्वा योनिमुद्राप्रदेशतः क ७८
निष्ठे तर्जन्यौ चतुर्भ्यां योजयेत्तु तैः कनिष्ठे तयोः पृष्ठे त्वनामिके अन्यमीबीज

मुद्रैषा नवमी योनिरीरिता ॥ मिथः कनिष्ठिके बध्वा तर्जनीभ्यामनामिके ॥ अनामिकोर्ध्वगश्लि
ष्टे ह्रीर्व मध्यमयोरधः ॥ अंगुष्ठाग्रद्वयं न्यस्येद्योनिमुद्रा समीरिता ॥ एवं नवमुद्रा जपकाले च दर्शये
त् ॥ अथ त्रिखण्डमुद्रालक्षणम् ॥ हस्तद्वयांगुलीर्योनिमुद्रावद्बध्वा करतलद्वयस्य पृष्ठभागे कनि
ष्ठिकाद्वयमध्ये कृत्वान्योन्यमामूलाग्रसंश्लेषयेत् पुनरंगुलीषट्कद्वयमपि स्वस्वतलोपरि कुब्जीकृत्वा
न्योन्यमामूलाग्रसंश्लेषयेत् ॥ एषा त्रिखण्डमुद्रा ॥ अनया त्रिपुरावाहने त्रिखण्डरूपांगुलीषु तिसृषु पिण्डत्रयं
निधाय विद्यात्रिखण्डस्य मध्ये एकैकखण्डं जपसर्वं कं एकैकखण्डस्य पुष्पं चक्रमध्ये विनिःक्षिपेत् ॥ एवमावा
हनविधिः ॥ अथ त्रिपुरसुन्दरीषोडशाक्षरीविधाने लिख्यते ॥ श्रीबीजं मायासमरयोनिशक्तिस्मारबीजद्वयमाल
विद्या शक्त्याद्यबीजानि विलोमितानि षोडशाक्षरी त्रिपुराम्बिकायाः ॥ अस्यार्थः श्रीबीजे लक्ष्मीबीजे मायेति भुवनेशी
स्मरः कामबीजे योनिरिति वाग्भवं शक्तिरिति पराबीजं तारं प्रणवः बीजद्वयं भुवनेशीकामबीजद्वयं अथाल
विधेति त्रिपुरसुन्दर्या वह्निसूर्यसोमात्मकत्रिखण्डं तत्र कादिर्वह्निखण्डः हादिः सौरखण्डः सादिः सोमखण्
डः एवं त्रिपुरायामन्त्रखण्डक्रमः शक्त्यादिबीजानि विलोमितानीति परावाग्भवकामभुवनेशीलक्ष्म्यादि
बीजानि क्रमेण एवं त्रिपुराषोडशाक्षरमन्त्रः अस्योद्धारमन्त्रस्वरूपं श्रीं ह्रीं क्लीं ऐं सौः ॐ ह्रीं श्रीं कएईलह्रीं ह
सकलह्रीं सकलह्रीं सौः ऐं क्लीं ह्रीं श्रीं इति त्रिपुराषोडशाक्षरीमन्त्रस्वरूपं अस्य ऋष्यादिकं न्यासमुद्रादिकं च त्रिपुर
सुन्दरीविधानवत् ऐश्वर्यफलप्रधानोऽयं मन्त्रः ॥ अथाक्षरन्यासः स्थितिन्यासं ततः ॐ श्रीं ह्रीं विद्याषोडशाक्षरैः
पंचांगुलीषु करयोर्ब्रह्मरन्ध्रे मुखे हृदि त्रयं विन्यस्य नाभ्यादिपादान्तं चैकमर्द्धिजे गलादिनाभिपर्यन्तमपरं हृत
तः परम् ब्रह्मरन्ध्रादिकं कण्ठान्तमेकं विन्यस्य पादद्वयोः अंगुलीषु च विन्यस्य न्यासोऽयं सिद्धिकारकः स्थि

न्यासेन तनुः ऋद्ध्यर्थी स्याद्यः सिद्धिप्रदायकम् ब्रह्मरंध्रे ललिके नेत्रे श्रुति घ्राणौ मुखे केषु च दन्ताधर हृदये देवि जि-
ह्वायां चोरुमूलके एवं हि सर्वांगहृदये त्वन्नं तु लिङ्गलिंगके श्रीविद्यार्णवे न्यसेद्देवि मंत्री सर्वसमृद्धये एतत्तु क्र-
मेण न्यसेद्यो हि कल्पे बालाख्या त्वं तथा यित्वा श्रीविद्याबीजपञ्चकः न संशयः परं नान्यः देवि नाशनाय मामुपायान न स्यात्
स्तनौ च मात्रेण भुक्तिमुक्तिः प्रजायते इति अथ श्रीविद्या त्रिपुरा षोडशी तत्र मंत्रप्रसंगात् श्रीविद्या पराषोडशाक्षरी वि-
प्र.सा. धानेन महालक्ष्मीरत्नकोशे पंचदशलत्नगर्थेशकोलि ब्येने लक्ष्मी परा मदनवाग्भवशक्तियुक्ता नान्यस्तेन भूति कमले क-
सं. थिता च विद्या शक्त्यादिकं तु विपरीततया प्रयुक्तं श्रीषोडशार्णा मिति स्मागमसंप्रसिद्धम् अस्यार्थः लक्ष्मी श्रीबी-
७५ जे परेति बाल्या तृतीयबीजं मदनइति कामबीजं वाग्भवइति बालाप्रथमबीजम् शक्तिरिति भुवनेशी नारसिं-
तिप्रणवः भूतिरिति भुवनेशी कमलेति श्रीबीजं कथिता च विद्येति श्रीविद्यायाः सोमसूर्यानलात्मकक्रमेण खं-
डत्रितयम् तत्र साध्यखंडः सोमात्मकः हादिखंडः सूर्यात्मकः कादिखंडो वह्न्यात्मकः एवं त्रिखंडस्य क्र-
79 मः शक्त्यादिकं तु विपरीततयेति भुवनेशी वाग्भव काम बीज श्रीबीजानीति एवं परा विद्या षोडशाक्षरीमं-
त्रः श्रीं सौः क्लीं ऐं ह्रीं ॐ ह्रीं श्रीं सकलह्रीं हसकहलह्रीं कएईलह्रीं ह्रीं ऐं क्लीं सौः श्रीं इति पराषोड-
शाक्षरीमंत्रः ऐश्वर्यफलप्रधानोयं मंत्रः अस्य मंत्रस्य श्री आदिरूपाय नारायण ऋषिः गायत्री छन्दः।
पराश्रीदेवता श्रीं बीजम् ह्रीं शक्तिः क्लीं कीलकम् श्रीं सर्वज्ञाये हृदयं श्रीं नित्यतृप्ताये शिरः श्रीं अनादिबोधा-
य शिखा श्रीं स्वतंत्राये कवचम् श्रीं अलुप्तशक्तये नेत्रम् ह्रः अनन्तशक्तये अस्त्रम् अथ ध्यानम् नासीरे हरिरिहस-
रोजके भाति या परमचित्स्वरूपिणी पद्मयुग्ममणिपात्रधारिणी भासतां हृदि सदा ममांबिका अन्तरालसेज ७५
पेन कमलैर्बिल्वसमिद्भिराज्यैर्दशांशं हवनं होमः अथ प्रजाविधिः यंत्रस्वोकः बिन्दुत्रिकोणकाष्ट।

भुवनारयुगलकपत्रवृत्तम् वसुदलवृत्तकुलादलवृत्तत्रिमहीगृहं भजे चक्रम् सर्वोऽपि चक्रलेखेन वदस्य चक्र
स्थलेखनप्रकारः अस्मिन्श्रीचक्रे सर्वोऽपि विपुलपीठवत् पीठं संस्थापयेत् तत्र विशेषः स्थापितवंमेचपफलपाक
घनमरमाटिशिवलिंगपदेषु त्रिविसुलिंगपदानि योजनीयानि अस्मिन्पीठे परां शक्तिं समावाह्यावरणैः
सह समर्चयेत् प्रथमं बिन्दुमध्ये नारायणाधिष्ठितं नारायणोरसि परां श्रियं समर्चयेत् नमस्कारः प्रथमं लिप
के स्वाहार्थं अनेन नारायणं मंत्रेण नारायणं समर्च्य तस्यस्कंधोपरि ॐ नमो नारायणाय अनेन मंत्रेण नारायणं सम
र्च्य तस्य वक्षःस्थले पद्मे लक्ष्मीमूलेन समर्चयेत् प्रथमं बिन्दौ परितः ॐ सर्वैश्वर्याय श्रीपादुकां पूजयामीति श्री
निलयत्तं वा· अं अनादिरूपां वा· ऐं स्वतंत्रशक्तिं वा· ॐ अस्वतंत्रशक्तिं वा· अः अनंतशक्तिं वा इत्यादि गणशक्ती
रभ्यर्च्य पुनरपि बिन्दोर्बहिः स्त्रिकोणान्तराले वक्ष्यमाणविद्याद्वारकमेणाऽष्टदश त्रिकोणानि संभावित
अष्टकोणसुपराषोडशान्तरी शक्तीः समर्चयेत् नमस्कारः श्रीं श्रियै नमः सौः परायै नमः क्लीं काममहा
यै नमः ऐं ऐं ह्रीं नमः ह्रीं भुवनाधिपायै नमः ऐं आनंदायै नमः त्रिभवभूतिदायै नमः श्रीं कमलायै न
मः सकलह्रीं कलायै नमः हसकहलह्रीं परमेश्वर्यै कएईलह्रीं सरस्वत्यै नमः ह्रीं मायायै नमः ऐं वागी
श्वर्यै नमः क्लीं महामोहिन्यै नमः सौः मनापरायै नमः इति पंचदश त्रिकोणेषु प्रागादिक्रमेण समभ्यर्च्य विं
द्वाख्यमध्यमखंडस्य बिन्दुमध्ये मूलमंत्रेण समस्तगुप्तार्य नरदेवपरात्रिये नमः निवर्त्यायै समभ्यर्च्य श्रीचक्रमध्य त्रिकोण
त्रिरेखासु श्रीमित्रेशानंदनाथश्रीपादुकां पूजयामि षष्ठीशानंदनाथ· उड्डीशानंदनाथ· चर्यानंदनाथ· लोपामुद्रा वा·
अगस्त्यानंदनाथ· कालतापनानंदनाथ· धर्माचार्यानंदनाथ· मुक्तकेशीश्वरानंदनाथ· दीपकलानंदनाथ·
विष्णुदेवानंदनाथ· प्रभाकरदेवानंदनाथ· तेजोदेवानंदनाथ· मनोजवदेवानंदनाथ· कल्याणदेवा

नंदनाथ॰ शक्तिदेवानंदनाथ॰ वासुदेवानंदनाथः श्रीरामानंदनाथ श्रीपादुकां पूजयामी ति त्रिरेखासु समभ्य-
र्च्य विष्णुमार्तण्डब्रह्ममयीं श्रीपादुकां पूजयामी ति मध्ये समर्चयेत् मंत्रज्ञो श्रीवीजं सर्वत्रयोजयेत् विंदौ पुरतः सर्वा-
नंदमय चक्रस्वामि महापरमशिवायै नमः परापररहस्ययोगिन्यै नमः महायोनिमुद्रायै नमः इति समभ्यर्च्य
महायोनिमुद्रां प्रदर्शयेत् एताः परापररहस्ययोगिन्यः सर्वानंदमये महाचक्रे वैन्दवे परब्रह्मस्वरूपिणि
पृ॰ला॰ परामृत॰ शक्तिस्वरूपिणी सर्वमंत्रेश्वरी सर्वयंत्रेश्वरी सर्वतंत्रेश्वरी सर्वचक्रेश्वरी सर्ववीजेश्वरी सर्वयोगेश्वरी सर्वचीवेश्वरी
म॰ सर्वतत्त्वेश्वरी सर्ववागीश्वरी सर्वजगदुत्पत्तिमातृका समुद्राः ससिद्धाः सशक्तयः सायुधाः सवाहनाः सपरिवा-
८॰ राश्चक्रेश्वरीकाः सर्वोपचारैः संपूजिताः संतु नमः इति पुष्पांजलिं समर्प्य त्रिकोणे कोणेषु सरस्वती चतुरान-
नाभ्यां नमः धां भवानी शंभुभ्यां नमः धरणी वराहाभ्यां नमः इति प्रागादिकोणेषु अभ्यर्च्य त्रिकोणस्य पुरतः सर्व-
80 सिद्धिप्रदायक चक्रस्वामि परांवायै नमः रहस्यतरयोगिन्यै नमः सर्ववीजमुद्रायै नमः इति समभ्यर्च्य वीजमुद्रां
प्रदर्श्य एताः रहस्यतरयोगिन्यः सर्वसिद्धिप्रदायके चक्रे समुद्राः स्यादि पुष्पांजलिं समर्पयेत् मूलमंत्रमुच्चा-
विंदुस्थां परांदेवीं समर्चयेत् श्रीवीजे मंत्रज्ञो सर्वत्रयोजयेत् अष्टकोणेषु त्रिपुरसुंदर्यैवा श्रीपादुकां पूजयामि।
सिद्धलक्ष्म्यैवा॰ मातंगीश्वर्यैवा॰ भुवनेश्वर्यैवा॰ वाराह्यैवा॰ श्रीचक्रराज्ञीवा॰ राजलक्ष्म्यैवा॰ पद्मावत्यैवा इति त्र
त्रिपुरादि सर्वादि कोणेषु वाराह्याद्यामेयादि कोणेषु अभ्यर्च्य अष्टकोणस्य पुरतः सर्वरोगहर चक्रस्वामि-
नि परसिद्धांवा॰ रहस्ययोगिन्यैवा॰ खेचरीमुद्रांवा॰ इति समभ्यर्च्य खेचरीमुद्रां प्रदर्श्य एताः रहस्ययोगिन्यः सर्वा
न्यः सर्वरोगहरे चक्रे समुद्राः स्यादि ना पुष्पांजलिं समर्पयेत् मूलमंत्रमुच्चार्य विंदुमध्ये परांदेवीं समर्चयेत् श्रीवीजे मं ८॰
त्रज्ञो सर्वत्रयोजयेत् अंतर्दशारे इति मन्वाद्याभ्यां नमः वसुधारां धाववेनिधिभ्यां नमः लक्ष्मीवासुदेवाभ्यां नमः

कमलवासिनीसंकर्षणाभ्यांनमः मोहनाप्रद्युम्नाभ्यांनमः वसुदानिरुद्धाभ्यांनमः स्वर्णलतास्वर्णाकर्ष
णभैरवाभ्यांनमः विभूतिमहागणपतिभ्यांनमः वसुमतीपद्मनिधिभ्यांनमः प्रीतिवसन्तचराभ्यांनमः
इतिसर्वादिक्कमेणसमभ्यर्च्य त्र्यस्रईशारस्यपुरतः सर्वरक्षाकरचक्रस्वामिनि परामालिन्यंवा निगर्भ
योगिन्यंवा सर्वमहांकुशामुद्रांवा इत्यभ्यर्च्य महांकुशांप्रदर्श्य एतानिगर्भयोगिन्यः सर्वरक्षाकरेचक्रेस
मुद्राःससिद्धयः सर्वेयसमभ्यर्च्य मूलमन्त्रमुक्ताविंदुमध्येपरांदेवींसमर्चयेत् श्रीबीजमंत्राद्यैः सर्वत्रयोदशम् व
हिर्दशारेवह्निवासिन्याभ्यांनमः ममहिनहरिभ्यांनमः कांतिसुदर्शनाभ्यांनमः मदनावमापडुदारणा
भ्यांनमः महद्रवामहाशास्तृभ्यांनमः द्राविणीकामराजाभ्यांनमः क्षोभिणीकंदर्पाभ्यांनमः वंधिनी
मन्मथाभ्यांनमः मोहिनीमकरध्वजाभ्यांनमः आकर्षणीमनोभवाभ्यांनमः इतिसर्वादिक्कमेणसम
भ्यर्च्य वहिर्दशारस्यपुरतः सर्वार्थसाधकचक्रस्वामिनि परापश्रियंवा कुलोत्तीर्णयोगिन्यंवा सर्वोन्मा
दनीमुद्रांवा इतिसमभ्यर्च्य उन्मादिनीमुद्रांप्रदर्श्य एताः कुलोत्तीर्णयोगिन्यः सर्वार्थसाधकेचक्रे समुद्रा
स्सासिद्धयः सर्वेयसमभ्यर्च्य मूलमंत्रमुक्ताविंदुमध्येपरांदेवींसमर्चयेत् श्रीबीजंमंत्राद्यैः सर्वत्रयोदशम् चा
न्तर्दशारे रेचकांवा दुर्गांवा भद्रकाल्यांवा वागीश्वर्यंवा नकुल्यंवा हसंत्यंवा वालिकांवा विमलां
वा कमलांवा वनमालिन्यंवा विभीषिकांवा मालिकांवा शांकर्यंवा नवमालिकांवा इ
तिसर्वादिक्कमेणसमभ्यर्च्य चतुर्दशारस्यपुरतः सर्वसौभाग्यदायकचक्रस्वामिनि त्रिपुरवासिन्यं
वा संप्रदाययोगिन्यंवा सर्ववशीकरणमुद्रांवा इतिसमभ्यर्च्य वशीकरणमुद्रांप्रदर्शयेत् एताः
संप्रदाययोगिन्यः सर्वसौभाग्यदायकेचक्रे समुद्राःससिद्धयः सर्वेयसमभ्यर्च्य मूलमंत्रमुक्ताविंदु

मध्ये परां देवीं समर्चयेत् श्रीबीजं मंत्रादौ सर्वत्र योज्यम् वसुदले ऽणिमासिद्धं वा· लघिमासिद्धं वा· ।
गरिमासिद्धं वा· महिमासिद्धं वा· ईशित्वसिद्धं वा· वशित्वसिद्धं वा· प्राप्तिसिद्धं वा· प्राकाम्यसिद्धं वा· इ
ति प्रागादिक्रमेण संसज्य वसुदलस्य पुरतः सर्वसंक्षोभणचक्रस्वामिनिं परमेश्वरीं वा· गुप्ततरयोगिन्यं वा·
आकर्षणीमुद्रां वा· इति समभ्यर्च्य आकर्षणीमुद्रां प्रदर्शयेत् एता गुप्ततरयोगिन्यः सर्वसंक्षोभणकारके
प्र·मा· चक्रे समुद्रास्तादिसर्ववत्समभ्यर्च्य मूलमंत्रमुच्चार्य बिंदुमध्ये परां देवीं समर्चयेत् श्रीबीजं मंत्रादौ सर्वत्रयो
सं· ज्यम् षोडशदले कामेश्वर्यं वा· भगमालिन्यं वा· नित्यक्लिन्नां वा· भेरुंडां वा· वह्निवासिन्यं वा· महावज्रे
८९ श्वर्यं वा· शिवदूत्यं वा· त्वरितां वा· कुलसुंदर्यं वा· नित्यां वा· नीलपताकां वा· विजयां वा· सर्वमं
गलां वा· ज्वालामालिन्यं वा· चित्रां वा· महानित्यां वा· इति प्रागादिक्रमेण समभ्यर्च्य षोडशदलस्य
पुरतः सर्वाशापरिपूरकचक्रस्वामिन्यं त्रिपुरेश्वर्यं वा· गुप्तयोगिन्यं वा· द्राविणीमुद्रां वा· समभ्यर्च्य द्राविणीं
81 मुद्रां प्रदर्श्य एता गुप्तयोगिन्यः सर्वाशापरिपूरके चक्रे समुद्रास्त्वादिसर्ववत्समभ्यर्च्य मूलमं
त्रमुच्चार्य बिन्दुमध्ये परां देवीं समर्चयेत् श्रीबीजं मंत्रादौ सर्वत्रयोज्यम् प्रथमचतुरस्रे श्रियै
नमः लक्ष्म्यै नमः· वरदायै· विष्णुपत्न्यै· वसुप्रदायै· हिरण्यवर्णायै· स्वर्णस्रग्मालि
न्यै· रजतस्रजायै· स्वर्णगर्भायै· स्वर्णप्राकारायै· पद्मनिवासिन्यै· पद्मप्रियायै· प
द्महस्तायै· मुक्तालंकारशोभितायै· चंद्रप्रियायै· बिल्वप्रियायै· भूत्यै· भूमत्यै· विभू
त्यै· ऋद्ध्यै· समृद्ध्यै· पुष्ट्यै· तुष्ट्यै· धनदायै· धनेश्वर्यै· श्रद्धायै· भोगिन्यै· भोगदायि ८९
न्यै· धात्र्यै· विधात्र्यै· सर्वेश्वर्यै· सर्वसौभाग्यदायिन्यै· द्वितीयचतुरस्रे· शांकर्यै· ईशान्यै·

इंदुशेखरशक्त्यै । जगत्कुटुंबिन्यै । अर्द्धनारीश्वरायै । अघोररूपिण्यै । हुतवहायै । अग्निन्यै । हालाहलधरायै ।
नृसिंहायै । शौर्यै । नारायण्यै । केशवायै । माधवायै । गोविन्दायै । वैष्णव्यै । त्रिविक्रमायै ।
वामनायै । श्रीधरायै । हृषीकेशायै । विश्वरंजिकायै । पद्मोदरायै । कमलनयनायै । च
तुर्मुख्यै । चतुराननशक्त्यै । चतुरस्रगेहिन्यै । चतुरस्रगायत्र्यै । चतुर्वर्गफलप्रदायै ।
त्रयीशक्त्यै । त्रिमुखायै । अस्त्रायै । त्रिरेखायै । तृतीयचतुरस्रे इंद्रादिलोकपालानर्चयेत्
चतुर्द्वारे मटुकाय । सलिलाय । गुग्गुलवे । जरंटकाय । इति संपूज्य । चतुरस्रपुरतः स्व॰
त्रैलोक्यमोहनचक्रस्वामिनि परांबा । प्रकटयोगिन्यंबा । सर्वसंक्षोभणमुद्रांबा । इति सम
भ्यर्च्य । सर्वसंक्षोभिणीमुद्रां प्रदर्शयेत् एताः प्रकटयोगिन्यः त्रैलोक्यमोहने चक्रे समुद्रा इत्या
दि पूर्ववत्समभ्यर्च्य मूलमंत्रमुक्त्वा बिंदुमध्यस्योपरि देवीं समर्चयेत् श्रीबीजमंत्राद्यैः सर्वत्रयोज्यं
एवं सृष्टिक्रमेण परां समर्च्य नेष्ट्वा पुनश्चतुरस्रमारभ्य संहारक्रमेण तत्तच्चक्रांतरालेषु परां समर्चये
त् तत्प्रकारः प्रथमचतुरस्रांतराले असितांगभैरवाय । रुरुभैरवाय । चंडभैरवाय । क्रोध
भैरवाय । उन्मत्तभैरवाय । कपालिभैरवाय । भीषणभैरवाय । संहारभैरवाय । इत्यसितांगा
द्यष्टभैरवान्समभ्यर्च्य श्रीबीजमंत्राद्यैः सर्वत्रयोज्यं द्वितीयचतुरस्रांतराले ब्राह्म्याद्यष्टशक्तीः समभ्य
र्चयेत् श्रीबीजमंत्राद्यैः सर्वत्रयोज्यं तृतीयचतुरस्रांतराले सर्वसंक्षोभिणीमुद्रांबा इत्यादिदशमुद्राः
पूर्वादिक्रमेण समभ्यर्च्य चतुरस्रपुरतः त्रैलोक्यमोहनचक्रांतरालचक्रस्वामिनि त्रिपुरांबा । प्रकटयो
गिन्यंबा । सर्वसंक्षोभिणीमुद्रांबा इत्यभ्यर्च्य संक्षोभिणीमुद्रां प्रदर्शयेत् षोडशमय विद्याधिष्ठानदेवता

यै · तारांवायै · इत्यभ्यर्चयेत् समुद्रा इत्यादि पूर्ववत् समभ्यर्च्य मूलमंत्रमुक्त्वा परां देवीं समर्चयेत् श्रीवीजं मंत्रादौ
सर्वत्रयोज्यम् षोडशदलान्तराले कामाकर्षण्यादि इत्यादि त्रिपुरापद्धतिवत् षोडशशक्तीः समर्चयेत् सर्वाशापरि
पूरकचक्रान्तराले चक्रस्वामिनि त्रिपुरेश्वर्यै वा · गुप्तयोगिन्यै वा · सर्वविद्राविणीमुद्रां वा · इत्यभ्यर्च्य द्राविणी
मुद्रां प्रदर्शयेत् वैद्यकसमयविद्याधिष्ठानदेवतायै · गायत्र्यै वा यै · इति समर्चयेत् समुद्रा इत्यादि पूर्व
प्र· सा· ला ८२ वत्समभ्यर्च्य मूलमंत्रमुक्त्वा परां देवतां समभ्यर्चयेत् श्रीवीजं मंत्रादौ सर्वत्रयोज्यं अष्टदलान्तराले पूर्वादि
चतुर्दिक्षु अनंगकुसुमादि आग्नेयादिकोणेषु अनंगरेखादि समर्चयेत् पुरतः संक्षोभणचक्रान्तराले चक्रस्वा
मिनि त्रिपुरसुंदर्यै वा · गुप्तयोगिन्यै वा · आकर्षिणीमुद्रां वा · इत्यर्चयेत् आकर्षिणीमुद्रां प्रदर्शयेत् पौ
वसमयविद्याधिष्ठानरूपाय शिवाय नम इत्यभ्यर्च्य समुद्रा इत्यादि पूर्ववत्समभ्यर्च्य मूलमंत्रमुक्त्वा परां
देवीं समर्चयेत् श्रीवीजं मंत्रादौ सर्वत्रयोज्यं मन्वस्रान्तराले सर्वसंक्षोभिण्यादि · द्विचतुर्दशशक्तीः पूर्वा
82 दिक्रमेण समभ्यर्च्य पुरतः सर्वसौभाग्यदायकचक्रान्तराले चक्रस्वामिनि त्रिपुरवासिन्यै वा · संप्रदाययो।
गिन्यै वा · सर्ववशीकरणीमुद्रां वा इत्यभ्यर्चयेत् वशीकरणीमुद्रां प्रदर्शयेत् सौरसमयविद्याधिष्ठा
नदेवतास्वरूपाय सूर्याय नमः समुद्रा इत्यादि पूर्ववत् समभ्यर्च्य मूलमंत्रमुक्त्वा परां देवीं समर्चयेत्
श्रीवीजं मंत्रादौ सर्वत्रयोज्यं बहिर्दशारचक्रान्तराले सर्वसिद्धिप्रदां वा द्विदशशक्तीः समभ्यर्च्य पुरतः
सर्वार्थसाधकचक्रान्तराले चक्रस्वामिनि त्रिपुराश्रियै वा कुलोत्तीर्णयोगिन्यै वा सर्वोन्मादिनीमुद्रां वा राम
इति समभ्यर्च्य उन्मादिनीमुद्रां प्रदर्शयेत् समुद्रा इत्यादि पूर्ववत्समभ्यर्च्य मूलमंत्रमुक्त्वा परां देवीं समर्चये ८२
त् अंतर्दशारचक्रान्तराले सर्वज्ञां वा द्विदशशक्तीः समभ्यर्च्य सर्वरक्षाकरचक्रान्तराले चक्रस्वामिनि।

मिनित्रिपुरामालिन्यंबा· त्रिगर्वेयोगिन्यंबा· सर्वसंक्षोभसमुद्रांबा इति समर्चयेत्सर्वसंक्षोभ
मुद्रां प्रदर्श्य वैसर्गवसमयविद्याधिष्ठानदेवतास्वरूपायनारायणाय नमः समुद्रामित्यादि सर्ववस्त्र
मभ्यर्च्य मूलमंत्रमुक्त्वा परांदेवीं समर्चयेत् श्रीबीजमेवाद्यो सर्वत्रयोज्य वसुकोणांतरालेवशिनी वाग्देवताः स
मभ्यर्च्य सर्वरोगहरचक्रान्तरालचक्रस्वामिनित्रिपुरावासिन्यंबा· रहस्ययोगिन्यंबा· खेचरीमुद्रांबा इति समभ्य
र्च्य खेचरीमुद्रां प्रदर्श्य गणसमयविद्याधिष्ठानदेवतायै बालाग्रतरस्वरूपिणी बालांबा· समुद्रामित्यादि सर्व
वस्त्रमभ्यर्च्य मूलमंत्रमुक्त्वा परांदेवीं समर्चयेत् श्रीबीजमेवाद्यो सर्वत्रयोज्य म त्रिकोणांतरालेमहाकामेश्वर्यंबा
दिशक्तित्रयेसमभ्यर्च्य सर्वसिद्धिप्रदायकचक्रांतरालचक्रस्वामिनित्रिपुरांबा· रहस्यतरयोगिन्यंबा· वीजमुद्रांबा·
इति समभ्यर्च्य वीजमुद्रां प्रदर्श्य समुद्रामित्यादि सर्ववस्त्रमभ्यर्च्य मूलमंत्रमुक्त्वा परांदेवीं समर्चयेत् श्रीबीजमे
वाद्ये सर्वत्रयोज्य विन्दुमध्ये महानाल्स्कंधारोह महाविस्तृवक्षःस्थलालंकृतसर्वानंदमयमहापरश्रीत्रि
ये नमः सर्वानंदमयचक्रस्वामिनि महापरात्रिपुरसुंदर्यंबा· महापरमशिवयंबा· गुरवः परापररहस्ययो
न्यंबा· महायोनिमुद्रांबा समभ्यर्च्य योनिमुद्रां प्रदर्शयेत् विंदुमध्ये महाराज्ञ्यंबा· महाशक्त्यंबा· महाम
हागुप्तांबा· महामहानंदांबा· महामहास्कंदांबा· महामायांबा· महाश्रीचक्रनगरसाम्राज्यमहापरमश्रीका
उकां पूजयामि इति मूलदेवीं समभ्यर्च्य धूपदीपनैवेद्यादीन् कृत्वा प्रसन्नपूजां चक्रत्वा पूजां समापयेत् एवं परा
श्रीपूजाक्रमः अथ श्रीचक्रत्रिकोणमध्ये विंद्वाद्द्वारप्रकारप्रतिपादकश्लोका निरूप्यतेऽथ गणितवेत्रोक्तादि
त्यंते श्रीचक्रमध्ये यत्र शंभोस्तिर्यग्रेखात्रयं लिखेत् आरभ्य कोणो रेखायास्तृतीयस्यास्तथाग्रतः त्रिकोणस्या
द्विरेखांते तस्याप्यत्रपार्श्वयोः तृतीयांशावशिष्टं तु विन्यासा हि लिखेत्सुधीः रेखाद्वयं तदंतेत्वग्रपामा।

ग्रोमन्त्रं योजयेत् मध्यमायास्तु रेखायाः कोणयोर्युगलं पुनः त्रिकोणस्याद्यरेखायामध्यभागे तु
योजयेत् एवं विलिखिते चक्रे भवेत् षोडशकोणकम् ऐं त्रिपुरादेवि विद्महे क्लीं कामेश्वरि च धीमहि
सौः तन्नः क्लिन्ने प्रचोदयात् इति त्रिपुरागायत्रीमंत्रः महादेव्यै च विद्महे विष्णुपत्न्यै च धीमहि तन्नो लक्ष्मीः प्र
चोदयात् इति परागायत्रीमंत्रः अथ प्रसिद्धश्रीविद्यापंचदशाक्षरीमंत्रस्य संगाड्युपासकभेदेन द्वादशविध
प्र: सा सं ८२ श्रीविद्यामंत्रस्य शास्त्रान्तरोक्तप्रकारेण लिख्यते प्रथमं तदुपासकानां नामानि लिख्यन्ते मनुश्चंद्रः कुबेरश्च
लोपामुद्रा च मन्मथः अगस्त्यो नन्दिकेशश्च सूर्यो विष्णुः षडाननः शिवो दुर्वाससंसाद्येः क्रमेणानेसमर्चये
न्द्रस्येते तदुपासकाः अथ क्रमेण तन्मंत्रोद्धारः क्रमेण लिख्यन्ते मदनोपि च शक्तिश्च विन्दुमालिनिसंस्थितं ऐं
द्रस्य भुवनेशी च वाग्भवं प्रथमं भवेत् महाबोधस्तु वीशक्ति विंदुमालिनिशाक्रदम् भुवनेशीयुतं विद्या द्वि
83 तीयं कामराजं भवेत् शांतान्तकामशक्तिश्च चतुर्थस्वरमेन्दुकम् भुवनेशीयुतं सोऽक्तं मंत्रविद्या च सुंदरी अस्यार्थः म
दनो ककारः विंदुमालिनि ईकारः शिवो हकारः शक्ति रेकारः ऐंद्रो लकारः भुवनेशी ह्रींकारः अयं वाग्भ
वः प्रथमखंडः महाबोधो हकारः सखी ककारः शक्ति रेकारः विंदुमालिनि ईकारः शक्रो लकारः भुव
नेशी ह्रींकारः द्वितीयः कामराजखंडः शांतान्तः सकारः कामः ककारः शक्ति रेकारः चतुर्थस्वर ईकारः
ऐंद्रो लकारः भुवनेशी ह्रींकारः इयं मनुनोपासिता विद्या कएईलह्रीं हकाराईलह्रीं सकारश्च
ईलह्रीं इत्यष्टादशाक्षरो मंत्रः शांतान्तं च महाबोधमादनं शक्तिसंयुतम् विंदुमालिनिशाक्रस्थं भु
वनेशीयुतं शिवे शक्तिः शिवं कामं महाबोधं शक्तिसंयुतं तथैव च विन्दुमालिनिशाक्रस्थं भुवनेशीम ८२
नोभवम् शिवशक्तिमदंशक्तिः चतुर्थस्वरमेन्दुकम् भुवनेशीयुतं विद्याद्वयं द्वैतपुरस्तस्यान्ते अस्या

र्थः शांतांतः सकारः महाघोषो हकारः मदनः ककारः शक्तिरीकारः विंदुमालिनी ईकारः शक्रोल
कारः भुवनेशी ह्रींकारः इति प्रथमखंडः । शक्तिर्हकारः शिवः सकारः कामः ककारः घोषो हकारः शक्ति
रेकारः विंदुमालिनि ईकारः शक्रोलकारः भुवनेशी ह्रींकारः इति द्वितीयखंडः । शिवो हकारः शक्तिः सकारः
मदनः ककारः शक्तिरेकारः चतुर्थस्वर ईकारः पैंद्रोलकारः भुवनेशी ह्रींकारः इति चंद्रोपासिता विद्या सह
कएईलह्रीं हसकहएईलह्रीं इति द्वाविंशदक्षरो मंत्रः महाघोषः शक्तियुक्तेन मदनेन शक्तिसंयुतं चतुर्थस्वर
शक्रस्य भुवनेशी च वाग्भवं शिवशक्तिं मादनं च शिवशक्तिं तथैव च महामायाशक्रयुतं भुवनेशी मनोभवं
शक्तिं शिवं काममशक्तिं महामायासमन्वितम् शक्रस्य भुवनेशी च कौबेरो मूलविद्यया अस्यार्थः महाघो
षो हकारः शक्तिः सकारः मदनः ककारः शक्तिरेकारः चतुर्थस्वर ईकारः शक्रोलकारः भुवनेशी ह्रींका
रः इति वाग्भवः प्रथमखंडः । शिवो हकारः शक्तिः सकारः मदनः ककारः शिवो हकारः शक्तिरेकारः मह
मायाईकारः शक्रोलकारः भुवनेशी ह्रींकारः इति द्वितीयो मनोभवखंडः । शक्तिः सकारः शिवो हकारः
कामः ककारः शक्तिरेकारः महामायाईकारः शक्रोलकारः भुवनेशी ह्रींकारः इति तृतीयः शक्तिखंडः ।
इयं कुबेरोपासिता विद्या हसकएईलह्रीं हसकहएईलह्रीं सहकएईलह्रीं इति द्वाविंशत्यक्षरो मंत्रः मदनेन शा
क्तियुक्तं च विंदुमालिनिशक्रदं भुवनेशीयुतं विद्या वाग्भवं प्रथमं भवेत् महाघोषं तथा शक्तिं मादनं शिवसंयुतं
शक्रस्य भुवनेशी च द्वितीयं कामसंभवं शक्तिः सर्वं महाघोषं शक्तिर्वै मादनं तथा पैंद्रस्तो भुवनेशी च लोपामुद्रा च
सुंदरि एवं त्रैपुरविद्यायाः सहवर्जितमस्यार्थः मदनः ककारः शक्तिरेकारः विंदुमालिनि ईकारः शक्रोलकारः भुव
नेशी ह्रींकारः इति वाग्भवखंडः महाघोषो हकारः शक्तिः सकारः मादनः ककारः शिवो हकारः शक्रोलकारः

प्रथमः

भुवनेशी ह्रींकारः इतिमन्मथखंडः । शक्तिः सकारः महाघोषो हकारः शक्तिः सकारः मदनः ककारः ऐं
द्रो लकारः भुवनेशी ह्रींकारः इतिलोपामुद्रोपासना विधिः एकपर्ख्ल ह्रीं हसकहलह्रीं महसकलह्रीं
इति समदणालोयं मंत्रः नत्र सहवर्जेन मान्मथमिन्मथाऽ न्मखंडे सकारहकारवर्जितो यमेव पंचदशाक्ष
रो मंत्रः इयेमन्मथोपासिताविद्या महाघोषं शक्तिं युक्तं मदनं शक्रसंयुतम् भुवनेशीयुतं विद्याप्रथमं वाग्भवं
भवेत् महाघोषं शक्तियुक्तं मादनं घोषशक्रदम् भुवनेशीयुतं विद्या द्वितीयं कामदं भवेत् शक्तिं मादनं शक्रस्थं
भुवनेशीयुतं परम् मुनिना साधिताविद्या महात्रिपुरसुंदरी अस्यार्थः महाघोषो हकारः शक्तिः सकारः मदनः क
कारः शक्रो लकारः भुवनेशी ह्रींकारः प्रथमो वाग्भवखंडः महाघोषो हकारः शक्तिः सकारः मदनः ककारः
घोषो हकारः शक्रो लकारः भुवनेशी ह्रींकारः इति द्वितीयो मान्मथखंडः शक्तिः सकारः मदनः ककारः शक्रो लका
रः भुवनेशी ह्रींकारः इयमगस्त्योपासिताविद्या हसकलह्रीं हसकहलह्रीं सकलह्रीं अयं पंचदशाक्षरो मंत्रः चांद्रेश
क्तिं समायाशक्रस्थं भुवनेश्वरीम् शिवकामं घोषकामं शक्रस्थं भुवनान्वितं शक्तिकामं शक्रयुतं भुवनेशी महा
मंत्रम् साधिता नंदिना विद्या श्रेष्ठं परिकीर्तितं अस्यार्थः चांद्रे सकारः शक्तिरेकारः महामाया ईकारः शक्रो लकारः
भुवनेशी ह्रींकारः शक्तिः सकारः कामः ककारः शक्रो लकारः भुवनेशी ह्रींकारः इयं नंदिकेश्वरोपासिता ८४
विद्या सएईलह्रीं हकएहलह्रीं सकलह्रीं पंचदशाक्षरो यं मंत्रः शिवं शक्तिं तथा कामं शक्रस्थं भुवनेश्वरीम्
शक्तिं च शिवकामस्थं शक्रदं भुवनेशिकं शक्तिकामं महाघोषं शक्तियुक्तमतः परम् भुवनेशीयुतं विद्यात
शिवो हकारः कामः ककारः घोषो हकारः कामः ककारः शक्रो लकारः भुवनेशी ह्रींकारः
सोरसाधितमुच्यते अस्यार्थः शिवो हकारः शक्तिः सकारः कामः ककारः शक्रो हकारः भुवनेशी ह्रींकारः

प्र. मा.
सं.
८४

84

लादशपंक्ति
शुद्धिः

शक्तिः सकारः शिवो हकारः कामः ककारः शक्रो लकारः भुवनेशी ह्रींकारः शक्तिरीकारः का
मः ककारः महाबोधो हकारः शक्तिः सकारः भुवनेशी ह्रींकारः इयं रुद्रोपासिता विद्या। हसक
लह्रीं सहकलह्रीं सहकलह्रीं इति पञ्चदशाक्षरो मंत्रः महाबोधं शक्तिकामं शक्रस्य भुवनाधिपम्। हकलह्रीं
शिवशक्तिकामबोधशक्रं भुवननायकं॥ शक्तिं शिवं कामं शिवशक्रं भुवननायकं चंद्रं काममथो तथा शक्रं भु
वनेशीं तथा परं॥ शक्तिं शिवं काममथो नेशक्रं भुवननायकं शक्तिं शिवं शक्तिकामं शक्रस्य भुवनेश्वरी एवं षट्कूट
विद्यायाश्चक्रपाणिस्तु साधकः अस्यार्थः महाबोधो हकारः शक्तिः सकारः कामः ककारः शक्रो लकारः
भुवनाधिपो ह्रींकारः शिवः सकारः शक्तिरेकारः कामः ककारः बोधो हकारः शक्रो लकारः भुवननायकं ह्रीं
कारः चंद्रः सकारः कामः ककारः शक्रो लकारः भुवनेशी ह्रींकारः शक्तिः सकारः शिवो हकारः कामः ककारः
शक्रो लकारः भुवननायकं ह्रींकारः शक्तिः सकारः शिवो हकारः कामः ककारः शक्रो लकारः भुवननायक शिवो हकारः
ह्रींकारः शक्तिः सकारः शिवो हकारः शक्तिरेकारः कामः ककारः शक्रो लकारः भुवनेशी ह्रींकारः इयं विष्णू
पासिता विद्या हसकलह्रीं सहकहलह्रीं सकलह्रीं सहकलह्रीं सहवाहलह्रीं सहकलह्रीं द्वात्रिंशदक्ष
रोयं मंत्रः। महाशक्तिं कामं शक्रं भुवननायकं आकाशशक्तिकामस्थं सकलं भुवनेश्वरी शक्तिं बोधमो बोधं
दबोधं शक्रस्य भुवनाधिपम् एवं त्रिपुरविद्यायाः स्कंदाद्वक्षानमेवं च अस्यार्थः महाबोधो हका
रः शक्तिः सकारः कामः ककारः शक्रो लकारः भुवननायकं ह्रींकारः आकाशो हकारः श
क्तिः सकारः कामः ककारः सकलं सकारः ककारश्च लकारश्च भुवनेशी ह्रींकारः शक्तिः
सकारः बोधो हकारः मोदः ककारः बोधो हकारः शक्रो लकारः भुवनेशी ह्रींकारः इति षोडशो

श्री सा सं० ८५
पासिता विद्या हसकलह्रीं हसकसकलह्रीं सहकहलह्रीं अष्टादशाक्षरो यं मंत्रः अष्टादशविद्यायाश्चक्रे त्रिपु
रसुंदरी अग्र्यान्यान्संप्रवक्ष्यामि वायैर्हि त्वदाज्ञिके २६ स्यानैः संकेतम् विद्यामम प्रिये एकामयार्चिता देवि
अस्याद्दुर्वासस्सार्चिता लोपामुद्रा शक्तिकामस्य शक्रो भुवननायकम् शिव शक्तिकाम शिवशक्रस्स्य भुवनेश्वरी ।
शक्तिं च कामशक्रस्य भुवनेशी ततः परम् लोपाशक्तिम रेशक्र लोपा शक्तिम दे शिव शक्र सकलसंयुक्तं भुवने
शी ततः परम् एवं तृतीय विद्यायास्त्रिपुरे निशिवार्चिता अस्यार्थः शिवो माति हकारः शक्तिः सकारः कामः क
कारः शक्रो लकारः भुवनेशी ह्रींकारः शिवो हकारः शक्तिः सकारः कामः ककारः शिवो हकारः शक्रो लकारः
भुवनेशी ह्रींकारः शक्तिः सकारः कामः ककारः शक्रो लकारः भुवनेशी ह्रींकारः लोपो हकारः शक्तिः सकारः
मदः ककारः शक्रो लकारः लोपो हकारः शक्तिः सकारः मदः ककारः शिवो हकारः शक्रो लकारः सक
लसंयुक्तं सकारस्य ककारस्य लकारस्य भुवनेशी ह्रींकारः इयं शिवोपासिता विद्या हसकलह्रीं हसकहल
ह्रीं हसकलह्रीं सकलह्रीं हसकलहसकहलसकलह्रीं अयं चतुः षोडशविंशाक्षरो यं मंत्रः मदनं शक्ति
युक्तं च तुरीयं लहरीयुतम् शिव मदन लोप च लहरीसंयुतात्मकम् चान्द्रं मादनं सं लोपं लहरीसंयुतं भवे
त् एवं मन्मथ मंत्र विद्या दुर्वासोत्र चिंतं भवेत् अस्यार्थः मदनः ककारः शक्तिरीकारः तुरीयं ईकारः लह
रीयुतं लकारः (शिवो हकारः) अग्नि ह्रींकारस्य शिवो हकारः मदनः ककारः लोपो हकारः लहरीसंयुता
त्मकम् लकारस्य ह्रींकारस्य चान्द्रः सकारः मदनः ककारः लोपो हकारः लहरीसंयुतं लका
रस्य ह्रींकारस्य इयं दुर्वाससोपासिता विद्या । कएईलह्रीं हकहलह्रीं सकहलईं पंचदशाक्षरो
यं मंत्रः १ इयं त्रिपुरा द्वादशभेदा । अथ श्रीविद्यायामन्तरस्तोत्रमपि प्रसंगात् लिख्यते । कल्याण
८५

85

वृष्टिभिरिवाम्लानहरितामिर्लक्ष्मीस्वयंवरणमंगलदीपिकाभिः सेवाभिरंब तव पादसरोजमूले नाकारि किं
मनसि भाग्यवतां जनानाम् १ एतावदेव जननि स्पृहणीयमास्ते त्वद्वन्दनेषु सलिलस्थगिते च नेत्रे सा
न्निध्यमुद्यदरुणायुतसोदरस्य त्वद्विग्रहस्य परया सुधयाप्लुतस्य २ ईशित्वभावकलुषाः कति नाम सन्ति
ब्रह्मादयः प्रतियुगं प्रलयाभिभूताः एकः स एव जननि स्थिरसिद्धिरास्ते यः पादयोस्तव सकृत्प्रणतिं करोति
३ लब्ध्वा सकृत्त्रिपुरसुन्दरि तावकीनं कारुण्यकंदलितकान्तिभरं कटाक्षम् कंदर्पभावसुभगाः खलु भक्तिभा
जः संमोहयन्ति तरुणीर्भुवनत्रयेपि ४ ह्रींकारमेव तव नाम गृणन्ति वेदा मातस्त्रिकोणनिलये त्रिपुरे त्रिने
त्रे यत्संस्मृतौ यमभटाभिभवं विहाय दीव्यन्ति नन्दनवने सह लोकपालैः ५ हन्तुः पुरामधिगलं परिपीयमा
नः क्रूरः कथं न भविता गरलस्य वेगः नाश्वासनाय यदि मातरिदं तवार्धं देहस्य शश्वदमृताप्लुतशीतलस्य
६ सर्वज्ञतां सदसि वाक्पटुतां प्रसूते देवि त्वदंघ्रिसरसीरुहयोः प्रणामः किं च स्फुरन्मुकुटमुज्ज्वलमातप
त्रं द्वे चामरे च महतीं वसुधां ददाति ७ कल्पद्रुमैरभिमतप्रतिपादनेषु कारुण्यवारिधिभिरम्ब भवत्कटाक्षैः
आलोकय त्रिपुरसुन्दरि मामनाथं त्वय्येव भक्तिभरितं त्वयि बद्धतृष्णम् ८ हन्तेतरेष्वपि मनांसि निधाय चा
न्ये भक्तिं वहन्ति किल पामरदैवतेषु त्वामेव देवि मनसा हमनुस्मरामि त्वामेव नौमि शरणं जननि त्वमेव ९
लक्ष्येषु सत्स्वपि कटाक्षनिरीक्षणानामालोकय त्रिपुरसुन्दरि मां कदाचित् नूनं मया तु सदृशः करुणैक
पात्रं जातो जनिष्यति जनो न च जायते वा १० ह्रीं ह्रीमिति प्रतिदिनं जपतां तवाख्यां किं नाम दुर्लभमिह त्रिपुरा
धिवासे मालाकिरीटमदवारणमाननीया तान्सेवते वसुमती स्वयमेव लक्ष्मीः ११ संपत्कराणि सकलेन्द्रिय

नेदनानि साम्राज्यदाननिरतानि सरोरुहाक्षि त्वद्वंद्विनानि दुरितापहरणोद्यतानि मामेव मातरनिशं कलयंतु ।
नान्यम् ११ कल्पोपसंहृतिषु कल्पिततांडवस्य देवस्य खंडपरशोः परभैरवस्य पाशांकुशैक्षवशरासनपुष्प
बाणासाक्षिणी विजयते तव मूर्तिरेका १२ लग्नं सदा भवतु मातरिदं तवार्द्धं तेजः परं बहुलकुंकुमपंकशो
णं भास्वत्किरीटममृतांशुकलावतंसं मध्ये त्रिकोणनियमं परमामृतार्द्रं १४ ह्रींकारमेव तव नाम तदेव रूपं
त्वन्नाम दुर्लभमिह त्रिपुरे गृणंति त्वत्तेजसा परिणतं वियदादिभूतं सौख्यं तनोति सरसीरुहसंभवाद्यैः १५
ह्रींकारत्रयसंपुटेन महता मंत्रेण संदीपितं स्तोत्रं यः प्रतिवासरं तव पुरो मातर्जपेन्मंत्रवित् तस्य क्षोणिभुजो भ
प्र॰ सा॰ वंति वशगा लक्ष्मीः स्थिरस्थायिनी वाणी निर्मलसूक्तिभारभरिता जागर्ति दीर्घं वयः १६ इति विरचितमेतत्
स॰ त्रैपुरस्तोत्रमात्रं प्रकटितपरमार्थं योगिभिर्योगगम्यम् सकलदुरितरोगध्वंसनानन्यकार्यैः प्रथितजन
८६ निधाने सेव्यतां भक्तियुक्तैः १७ वेधसा भांति नेत्रां शशिरुचिरकलाशेखरां रक्तवस्त्रामत्यन्तोत्तुंगपीनस्त
86 नभरनमितां यौवनारंभरूढाम् सर्वालंकारदीप्तां सरसिजनिलयां मंत्रसंक्रांतमूर्तिं देवीं पाशांकुशा
ढ्यामभयवरकरां विश्वयोनिं नमामि १८ अथ श्रीविद्यामंत्रप्रसंगाद्दशाक्षरसहितगोपालकमंत्रो लिख्यते श्री
नारद ऋषिर्गायत्री छंदः श्रीकृष्णो देवता श्रीं ह्रीं क्लीं हृत् कृष्णाय शिरः गोविंदाय शिखा गोपीजनकवचं वल्लभा
य नेत्रं स्वाहास्त्रं अथ विद्याक्षरषडादीनां सर्वाक्षवत्कला ध्यानं श्रीं ह्रीं शोणमध्यार्धमंत्रजनिभं वंदे ललाटे स्तनौ वक्षसि
कल्पितया विलासहसनं सौधं मयं वेश्मवम् हस्ते दहन् वेणुनादरसिकं सस्यां प्रान्ते वा पाशं गं व स्वत्वदु ८६
तमस्त्वमेह हरिसदा गोपालचूडामणिः ध्यानान्तरम् तीर्णाभोनिधिमध्यसंस्थितलसद्वीपस्य कल्पद्रुमो

गोपालमूर्तिं ध्यायेत् हृदि कृष्णपीतपटावृतम् दोर्दंडैरविलंवैर्वेणुपाशांकुशशंखचापाद्युपगान्वितं आलंकमलाम
हीविलसितं वं देवं गोपं गंधरविम् श्रीं ह्रीं क्लीं कपर्दिने क्लीं कृष्णाय ह्रसकह्रल ह्रीं गोविंदाय सकल ह्रीं गोपीजनवल्ल
भाय कपर्दिने क्लीं ह्रसकक ह्रल ह्रीं सकल ह्रीं स्वाहा इति मंत्रः ऐश्वर्यफलप्रधानोयं मंत्रः लक्षजपः आज्येन
पायसेन च दशांशं होमः सप्तदशपदलेवस्य मालागोपालकविंशाक्षरीविधानात्क्रमः सज्जाविधिः अथ यासस्यं
वं विंदु त्रिकोणं षट्कोणं वृत्तम् अष्टदलांबुजम् स्वरकेसरसंयुक्तं त्रिवृत्तं भूपुरद्वयम् चतुर्द्वारसमायुक्तं एवं यंत्राख्यक
विभूषितं विंदौ मायां लिखेद्धि त्रिकोणेषु रमां स्मरम् प्रणवं तत्कपोलेषु साध्याख्यकर्मगर्भितम् षट्कोणेषु
मायाद्यैर्लेख्य अष्टदलांबुजे गोपाला याष्टाक्षरं वै त्रिस्त्रिशो विलिखेद्दले द्वाः पंचदशार्णे तस्मिन्वर्णान्धा लि
खेत त्रिस्त्रिशो दलेष्वनुविलिखेच्च यथाक्रमम् मिलित्वा वा लिखेद्विंशमन्यमेतद्दले लिखेत केसरेषु स्वरा
लेख्याः प्रदक्षिणक्रमेण तु वृत्तत्रयस्य मध्ये तु मारमालामनुं लिखेत भूगृहद्वयसंपोतमारकामाक्षमालि
खेत लक्ष्मीमायां लिखेद्द्वारपार्श्वयोस्तु क्रमात्तु यः पाशांकुशो दिग्विदिक्षु विलिखेच्च क्रमात्ततः वाराहं नारसिं
हं च कपोलेषु समालिखेत एतद्विष्णुरहस्यं यंत्रं त्रैलोक्यमोहनम् सर्वसंपत्करं नृणां सद्यः सिद्धिकरं परम् ।
मापाल मिलितं देहे नमोपत्नीयं प्रयत्नतः राजसुदारा स्वकामानां वश्यं वश्यकामिनाम् सुतार्थिनां च सुतदं वे
गिणां रोगशांतिदम् दरिद्रो विधिना धृत्वा भवेद्यं श्रवणजनार्दन हाटके राजते पट्टे लिखित्वा संप्रपूज्य च प्रा
णस्थापनसर्वं तत्धारयेद्यंत्रमुत्तमम् सर्वकामानवाप्नोति चिरजीवति सत्ततेजनैः राज्ञानो वशगास्तस्य यांति नरा
नार्यस्तथोरगाः गंधर्वा यक्षरक्षांसि पिशाचा डाकिनीग्रहाः शाकिन्यानाकिनस्त्रैव दृष्ट्वा तं भैरवत्पुरः
यंत्रधारणमात्रेण नमस्कृत्वा वहूरतः दैर्घ्यं विसृज्य धावंति तं त्वनत्वा पुनः पुनः । अस्यार्थः ।

प्र॰ सा॰
सं॰
८

87

प्रथमं त्रिकोणं विलिख्य तन्मध्ये बिन्दुं विलिख्य तन्मध्ये भुवनेशीं विलिख्य त्रिषु कोणेषु श्रीबीजं
विलिख्य कोणकपोलेषु कामबीजं च प्रणवं च साध्यनामगर्भितं पार्श्वद्वयविभागेन विलिखेत् पुन
स्तद्बहिः षट्कोणं विलिख्य तस्य प्रागग्रकोणत्रितये रमाबीजं इतरत्रितये भुवनेशीं च विलिखेत् पुनस्त
द्बहिरष्टदलं पद्मं विलिख्य तत्केसरेषु स्वरद्वंद्वं विलिख्य पुनः षड्दलेषु कामबीजादिगोपालाष्टादश
वर्णान् त्रिशस्त्रिशो विलिखेत् अवशिष्टदलद्वये श्रीविद्यापंचदशार्णान् आदितश्चारभ्य सप्तवर्णान् त्रिशस्त्रि
शो विलिख्य अवशिष्टमेकमष्टमदले विलिखेत् इत्थं वर्णानां तेषु वा तन्त्रे न त्यान्न लेखनविधिः एतद्बहिः
अष्टदलमन्यद्वयं विलिख्य लिखेत् तत्प्रकारः श्रीबीजं भुवनेशीबीजद्वयं च श्रीविद्याया द्वितीयाद्विरिति च वि
द्यायसकलमन्त्रे कामबीजादित्रयस्त्रिंशद्वर्णान् दलेषु चतुरश्चतुरो विलिखेत् अवशिष्टमेकमष्टमदले वि
लिखेत् तद्बहिर्वृत्तत्रयं विलिख्य तद्वीथ्योः स्मरमालामन्त्रेण चतुःषष्ठ्यक्षरगायत्र्या च स्वयंवरविधानेन
वक्ष्यमाणया संवेष्टनेन तद्बहिश्चतुरस्रद्वयं विलिख्य तद्वीथ्यां मातृकावर्णैः संवेष्ट्य चतुरस्रस्य चतुर्दिक्षु पार्श्व
द्वये श्रीबीजं च भुवनेशीबीजं विलिख्य चतुरस्रस्य दिक्षु आमिति पाशाद्यं विदिक्षु क्रोमित्यंकुशाद्यं च विलि
ख्य चक्रस्य सर्वतो बहिः चतुरस्रकोणपार्श्वयोः ह्रमिति वाराहबीजं च क्ष्रौमिति नारसिंहं च
विलिखेत् चतुरस्ररेखासु वज्रायुधाष्टकं च विलिखेत् अथासनन्यासविधिः सव्यपादमु
पादाय दक्षिणोपरि विन्यसेत् तथैव दक्षिणं पादं सव्यस्योपरि विन्यसेत् विष्टभ्य कच्छुरोग्री राम
वा नासाग्रन्यस्तलोचनः पद्मासनं भवेदेतत्सर्वेषामपि पूजितं इति श्लोकोक्तपद्मासनेनो ८७
पविश्य गुरुगणपतिवंदनादीन् पूर्वं समस्तपटलोक्तेन प्रकारेण कृत्वा भूतशुद्धिं तत्रै

वोक्तप्रकारेण कृत्वा देवं हृत्सुच्चार्य मूलाधारस्थं जीवं सुषुम्नया द्वादशान्ते नयन् मूलेन व्याप्य अमिति षो
डशवारं दक्षिणनासिकया विरेच्य उमिति द्वादशवारं वामनासिकया पूरयित्वा मकारपूर्वकं विद्यासहितमंत्रा
णे द्वादशवारमावर्तयन् कुंभकं कुर्यात् एवं प्राणायामत्रयं कृत्वा वैष्णवपीठन्यासं सप्तदशपटले वक्ष्यमा।
णप्रकारेण कृत्वा मानसपूजां च साक्षात्कारविधानेन उक्तप्रकारेण कृत्वा मूलमंत्रं प्रतिलोमम् उच्चार्य ते
जोरूपतामापाद्य ततो जः करतले दक्षिणनासिकाश्वासमार्गेण निपात्य करन्यासं कुर्यात् तत्प्रकारश्चोपरि
ष्टाच्च सप्तदशपटले गोपालकाष्टादशाक्षरीविधाने वक्ष्यते अत्रत्वष्टादशाक्षरीवर्णैकैकेन सह विंशत्यक्षा
र्णः पूर्वोक्तवर्णैकैकं अपि क्रमेण पुरतो योजयेदिति विशेषः पुनरपि विंशत्यक्षरीमंत्रषडंगैरपि तंत्रे
वोक्तप्रकारेणैव करन्यासं कृत्वा पुनः श्रीविद्याषडंगैरपि प्रागुक्तैः करन्यासं कृत्वा वैष्णवषडंगन्या
सं कुर्यात् तत्प्रकारोपि लिख्यते स पुनः षड्विधः कलातत्वभुवनवर्णपदमंत्रभेदेन तत्र प्रथमं क
लान्यासो लिख्यते ह्रौं नमः पराय शान्त्यतीतकलात्मने नमः ह्रैं नमः पराय शान्तिकलात्मने नमः ह्रूं न
मः पराय विद्याकलात्मने नमः ह्रीं नमः पराय प्रतिष्ठाकलात्मने नमः ह्रां नमः पराय निवृत्तिक
लात्मने नमः मूर्धास्यहृदयगुह्यपादेषु न्यसेत् पुनस्तत्वन्यासः तत्प्रकारस्तु उपरिष्टात्
सप्तदशपटले वक्ष्यते पुनर्भुवनन्यासः ॐ भूर्लोकाय नमः ॐ भुवःलोकाय नमः ॐ स्वर्लोका
य नमः ॐ महर्लोकाय नमः ॐ जनलोकाय नमः ॐ तपोलोकाय नमः ॐ सत्यलोकाय नमः
एतेनाभुदरहृत्कंठाननभ्रूमध्यमूर्धसु न्यसेत् ॐ अतलाय नमः ॐ वितलाय नमः ॐ सुतलाय न
मः

प्र.सा.
सं.
८८

88

ॐ नितलाय नमः ॐ महातलाय नमः ॐ रसातलाय नमः ॐ पातालाय नमः एतैः कटिऊरुजानुजंघागु
ल्फपादतलेषु न्यस्य पुनर्वर्णन्यासं कुर्यात् स तु लिपिन्यासः कानने हृत्वेत्याद्युक्तप्रकारः पुनः पदन्या
सं कुर्यात् ॐ ह्रीं जाग्रत्पदात्मने नमः हंसः स्वप्नपदात्मने नमः सोऽहं सुषुप्तिपदात्मने नमः स्वाहा तुरी
यपदात्मने नमः कण्ठादिपादांते कंठादिकंठांते शिरआदिकंठांते शीर्षादिपादांते च व्याप्य पुनर्मंत्रन्या
सः स तु षडक्षरमंत्रन्यासः तत्प्रकार उच्यते वामांगाद्यंकरचरणजानूरुयुग्मेषु नाभौ हृत्कंठांसद्वितयव
दनास्यन्नमांगेषु मंत्री शक्तीत्येकमेवस्थानम् अयं तु संहारन्यासः एतद्विपरीतक्रमेण तु सृष्टिन्यासः पु
नर्नाभेरारभ्य वामकरांतं न्यस्य शिष्टाभिर्ऋग्भिः शिरआदिहृदंतं न्यसेत् एवं स्थितिन्यासः एवं ष
डंगन्यासं कृत्वा पुनः पंचतत्त्वन्यासं कुर्यात् ॐ नमः पराय परमेष्ठ्यात्मने वासुदेवाय नमः यं नमः परा
य पुरुषात्मने संकर्षणाय नमः रं नमः पराय विश्वात्मने प्रद्युम्नाय नमः वं नमः पराय निवृत्त्यात्मने
ऽनिरुद्धाय नमः लं नमः पराय सर्वात्मने नारायणाय नमः क्ष्रौं नमः पराय कोपतत्त्वात्मने नृसिं
हाय नमः एतैर्मूर्धास्यहृदयगुह्यपादेषु न्यस्य सर्वेण शिरआदिपादांतं न्यस्य पुनर्मूर्तिपंजरन्या
सं कुर्यात् तत्प्रकारस्तु परिशिष्टात्मप्रदेशोपटले वक्ष्यते पुनरीशानन्तन्यासं कुर्यात् तत्प्रकारस्तु तत्रै
र्जनिकान्विता अंगुष्ठसहिता मध्या तेनान्विताप कनिष्ठिकान्विता च वदने सर्वाः स्युर्यायसी हृदि तर्जनी प्रथम८ तन्त्रा.
तत्पुनाम मध्यानाभौ अंगुष्ठौ विहितौ ध्वजे तत एवांगुलयो जान्वोः साक्षाद्यास्तु पदद्वये इति अत्र दशाक्षरी विधाने नो
क्तानि स्थानानि तस्मादयमेवात्रापि न्यासांतरे उक्तेषु स्थानेषु न्यासः अत्रानुक्तस्थानेषु सर्वाभिरंगुलि८ राम
भिर्न्यासः कर्तव्यः एवमक्षरन्यासं कृत्वा पुनर्मूर्तिपंजरन्यासं प्रागष्टादशाक्षरीविधानोक्तप्रकारेण कृत्वा १७२
पुनः षडंगन्यासं कुर्यात. यथा ह्रीं श्रीं क्लीं हृत ॐ कृष्णाय नमः शिरः ॐ गोविंदाय नमः शिखायां गोपी

जनकवचं गोवल्लभायनेत्रं स्वाहा । अस्त्रं एवं षडङ्गन्यासं कृत्वा पुनः किरीटादिमुद्राः प्रदर्शयेत् तत्रप्र
कार उच्यते तत्र प्रथमं मुद्राणां क्रम उच्यते किरीटं बर्हापीडं कुण्डलहृदयचक्रशंखगदापद्मयोगवेणुवन।
मालाश्रीवत्सकौस्तुभबिल्वफलमुद्राः क्रमेण प्रदर्शयेत् प्रथमं दक्षिणवामकरयोर्मध्यमाङ्गुलिद्वयं प्रसा
र्य अन्योन्याग्रं संस्पृशेत् उभयोस्तर्जनीमनामिकां च किंचित्संकुच्य पृष्ठभागेन तर्जन्या तर्जनीमनामिकया अ।
नामिकां च संस्पृशेत् अङ्गुष्ठद्वयं तु प्रसार्य अग्रेणान्योन्यं संस्पृशेत् कनिष्ठिकाद्वयं च प्रसार्य अग्रेणान्यो
न्यं संस्पृशेत् एषा किरीटमुद्रा एतां शिरसि स्थितां मन्त्रेण किरीटाय नमः इत्यनेन प्रदर्शयेत् हस्तद्वयस्य मणिबं
धमन्योन्यं न्यासेन बध्वा अङ्गुलाग्रं प्रसार्य किंचिदाकुञ्च्य मस्तकोपरिभागे पराङ्मुखेन प्रदर्शयेत् एषा ब
र्हापीडमुद्रा पुनर्दक्षिणकरतलं अधोमुखेन वामकरतलमूर्ध्वमुखेन च प्रसार्य अन्यासेन संयोज्य दक्षिण।
कनिष्ठिकां वामतर्जन्या उपरि प्रसार्य संमुखेन संश्लेषयेत् दक्षिणतर्जनीं वामकनिष्ठिकाया उपरि प्रसार्य
संमुखेन संश्लेषयेत् दक्षिणानामिकामध्येन तु वामतर्जन्यां अधोभागेन नीत्वा वामाङ्गुष्ठोपरि संमुखेन सं
श्लेषयेत् वामानामिकामध्येन दक्षिणतर्जन्या उपरिमार्गेण नीत्वा दक्षिणाङ्गुष्ठस्याधस्तात् तेन संमुखं कृ।
त्वान्योन्यं संश्लेषयेत् इयं श्रीवत्समुद्रा एतां वक्षस्थले दक्षिणहस्तेनोपरिभागेन तन्मन्त्रेण प्रदर्शयेत्
दक्षिणकराङ्गुष्ठतर्जनीद्वयं संश्लिष्य इतराङ्गुलित्रयं प्रसार्य पुनर्वामकरतलमपि तथैव कृत्वा अपाङ्गला
दारभ्य नाभिपर्यन्तं प्रदर्शयेत् एषा वनमालामुद्रा एतां तन्मन्त्रेण प्रदर्शयेत् अथ वामकनिष्ठिकानामि
कामध्यमाः प्रसार्य तत्रानामिकामध्यमे ऊर्ध्वमुखे प्रसार्य पुनस्तिसृणामङ्गुलीनां मूलस्थलदेश उपरिभा
गे तिर्यग् दक्षिणमध्यमां नयेत् पुनस्तामानयेत् पुनस्तासामेव तिसृणामङ्गुलीनामधोभागे मूलप्रदेशे ति
र्यग् दक्षिणानामिकां नीत्वा वामतर्जन्याः उपरि मध्यदेशं संस्पृशेत् पुनर्दक्षिणकनिष्ठिकाग्रं वामकनिष्ठिकाग्रस

उपरिभागे संश्लेषयेत् पुनर्दक्षिणतर्जन्यग्रं च वामानामिकामध्यमांगुष्ठाग्राणि च ऊर्ध्वीकृत्य तोन्योन्याग्राणि संश्ले
षयेत् दक्षिणांगुष्ठं तु वामहस्ततलस्य पार्श्वे संबध्नात् एषा कौस्तुभमुद्रा एतां कंठदेशे तन्मंत्रेण प्रदर्शयेत् प्र
थमं दक्षिणांगुष्ठतर्जनीद्वयं किंचित्संकुच्यान्योन्याग्रेण संस्पृशेत् तद्रंध्रमार्गेण वामांगुष्ठं नीत्वा तर्जन्याग्रमपि त
चैव स्पृशेत् पुनरुभयोः करयोरितरेतरांगुलीः ऋजुकृत्वान्योन्यव्यत्यासीकृताः किंचित्संकुचिताग्राः कर्ण
योः प्रदर्शयेत् एतां मकरकुंडलमुद्रां तन्मंत्रेण ऊर्ध्वं वामकरांगुष्ठे लग्नतत्स्य कनिष्ठिका दक्षिणांगुष्ठसंस
प्रसासं॰ क्तात् कनिष्ठा प्रसारिता तर्जन्यो मध्यमानामाः किंचित्संकुच्य चालिताः वेणुमुद्रेह कथिता सगणाग्रे यथा श्री
१७२ हरेः एतां तन्मंत्रेण ओष्ठदेशे प्रदर्शयेत् उच्यते श्रुतमुद्राणां मुद्रा बिल्वफलाकृतिः अंगुष्ठं वाममं उत्थितमि
तरकरांगुष्ठेनाथ बध्नात् तस्याग्रे पीडयेत् त्वांगुलिभिरपि च तां वामहस्तांगुलीभिः बद्ध्वा वांछाहरिस्याप्यत।
विमलधीर्व्रीहरन्मारवीजं बिल्वाख्यामुद्रिकेषा स्फुटमिह कथिता गोपनीया विधिज्ञैः मनोवाणीदेहे
173 र्यदिह च मराचापि विहितं त्वमत्यामत्यावातदपि निखिलं उ कृतं च यं १ मीमुद्रा ज्ञातेदपयति नरस्तं स्मरगा।
णानमंत्तस्याधीनाभवति सततं सर्वजनता॥ एवं बिल्वमंत्रेण तन्मुद्रां तन्मंत्रेण प्रदर्शयेत् करेण परस्परं ह।
स्तौ प्रसारितांगुलिकौ विपर्यस्तमुखौ संयोज्य दक्षिणांगुष्ठाग्रेण सव्यकनिष्ठिकां संयोज्य सव्यांगु ग्रं ८
ष्ठाग्रेण दक्षिणकनिष्ठिकाग्रं संयोज्य दक्षिणभागे स्कंधादुपरि भ्रामयेत् एषा सुदर्शनमुद्रा एतां तन्मंत्रे
ण प्रदर्शयेत् दक्षिणांगुष्ठं सव्यांगुलिचतुष्कमुष्टिना गृहीत्वा सव्यांगुष्ठमूर्ध्वं प्रसार्य दक्षिणांगुलिभिश्च
तस्तभिः संहिताभिः संयोज्य वामपार्श्वे शिर उपरि प्रदर्शयेत् एषा शार्ङ्गमुद्रा एतां तन्मंत्रेण प्रदर्शयेत् ततो ह राम
स्तौ परस्परं संमुखौ संयोज्य परस्परमंगुलिविवरे घंगुलीविन्यस्य मध्ये छिद्रं कृत्वा मध्यमांगुलिके संमुखे संश्लि १७२
ष्टे ऊर्ध्वं प्रसार्य वामोरुमूलभागे तिर्यक् प्रदर्शयेत् एषा कौमोदकीमुद्रा एतां तन्मंत्रेण प्रदर्शयेत् मणिबंधोप

रस्यरं संमुखौ संयोज्याविकासितपद्मवदन्यांगुलीराकुंचिताग्राः समं ततो विरच्य यं गुष्ठौ पार्श्वयोः संयोज्य
मध्यतः कर्णिकावदीषदाकुंचयित्वा दक्षिणोरुमूलदेशे ऊर्द्ध्वं प्रदर्शयेत् एषा पद्ममुद्रा एतां तन्मंत्रेण
जपध्यायनमरमनेन प्रदर्शयेत् वामकरांगुष्ठतर्जन्यग्रमन्योन्यं संस्पृश्य नाभेरधस्तात् ऊर्द्ध्वमुखेन निधा
यतस्य करस्योपरि दक्षिणहस्तं च तथैव कृत्वा निधापयेत् एषा योगमुद्रा एतां तन्मंत्रेण प्रदर्शयेत् एवं
किरीटाद्या मुद्राः प्रदर्श्य ध्यायेत् द्वारवत्यां सहस्रार्कभास्वरे भवने उत्तमे अनल्पैः कल्पवृक्षैश्च परीतम
णिमंडपे ज्वलद्रत्नमयस्तंभे द्वारतोरणकुड्यके फुल्लस्रग्लसच्चित्रविताने विमोक्तिके पद्मरागस्थ
लीराजरत्नन्योऽन्यमध्यतः अनारतगलद्रत्नसंघस्य स्वस्तरोरधः रत्नप्रदीपावलिभिः प्रदीपितदिगं
तरे उद्यदादित्यसंकाशे मणिसिंहासनांबुजे समासीनोऽच्युतो ध्येयो द्रुतहाटकसन्निभः समानोदित
चंद्रार्कतडित्कोटिसमद्युतिः सर्वांगसुंदरः सौम्यः सर्वाभरणभूषितः पीतवासाश्चक्रशंखगदापद्मो
ज्ज्वलद्भुजः अनारतोज्ज्वलद्रत्नधाराम्भककलशं स्पृशन् वामपादांबुजाग्रेण मुष्ठतावलभद्भवि रुक्मिण
णीसत्यभामे स्वमूर्द्धि रत्नौघधारया सिंचित्यौ दक्षवामस्थे स्वदोःस्यकलशोत्थया नाग्नजिती सुनं
दा च दक्षिणेऽस्यौ कलशोत्थया ताभ्यां च दक्षवामस्थे मित्रविंदासुलक्ष्मणे रत्ननद्याः समुद्धृत्य रत्नपूर्णौ
घटौ तयोः जांबवती सुशीला च दक्षिणेऽस्यौ दक्षवामगे बहिः षोडशसहस्रसंख्याताः परितः स्त्रियः ध्येयाः
कनकरत्नौघधाराम्भकुम्भोज्ज्वलः तद्बहिश्चाष्टनिधयः पूरयंतोऽपनैर्धरा तद्बहिर्वृष्णयः सर्वे पुरो वक्षा
दुरादयः ध्यात्वैवं परमात्मानं विश्रामेणामनं जपेत् एवं ध्यात्वा कामामालामंत्रं कामगायत्रीं च तत्त्वावि
श्रामेणामनं प्रागुक्तं भुवनैश्वर्यादिलक्षं तल्लक्षं जपेत् आज्यैर्दशांशं ऊनेच कामामालामंत्रं मारगायत्रीमंत्रं
चोपरिष्टाद्वक्ष्यामः अथास्य मंत्रपूजाविधिः तदर्थं यंत्रं वक्ष्ये गोमयेनोपलिप्योर्वीं तत्र पीठं निधापये

त विलिख्य गंधपंकेन लिखेदष्टदलांबुजं कर्णिकायां तु षट्कोणं ससाध्यं तत्र मन्मथं। शिष्टैः सप्तद
शभिरक्षरैर्वेष्टयेत्स्मरम् प्राग्रतोऽनिलकोणेषु श्रियं शिष्टेषु संविदम् षट्कोणसंधिषु चके सरेषु त्रिशाखि
शः विलिखेत्स्मरगायत्रीमालामंत्रं दलाष्टके षट्पुरः संलिख्येत् द्वाह्ये वेष्टयेन्मातृकाक्षरैः भूविंबचूलि
खिद्वाःस्वश्रीमाये हिग्विदिक्ष्वपि एतद्यंत्रं हाटकादिपट्टे वा लिख्य पूर्ववत् साधितं धारयेद्यो वै सोऽप्यनं
प्र॰पं॰सा॰ सं॰ १७५ त्रिदशैरपि अस्यार्थः प्रथममष्टदलपद्मं विलिख्य तत्कर्णिकायां षट्कोणं विलिख्य तन्मध्ये क्लीमिति
मारबीजं विलिख्य तन्मध्ये साध्यनामादि यंत्रन्यायान्विलिखेत् पुनः कलायेत्यादिभिः शिष्टैः सप्तदशा।
भिरक्षरैस्तत्कामबीजं वेष्टयेत् पुनः षट्कोणेषु प्रागग्रतोऽनिलकोणेषु श्रीमिति बीजं विलिखेत् तदि
तरकोणेषु त्रिष्वपि भुवनेशीं विलिखेत् पुनः कोणसंधिषु षट्स्वपि क्लीं कलायनमः इति षडक्षराणि वि
लिखेत् पुनरष्टदलकोणेषु कामदेवाय विद्महे पुष्पबाणाय धीमहि तन्नोऽनंगः प्रचोदयात् अस्याः स्मर।
175 गायत्र्याः स्वीयाणि त्रीण्यक्षराणि विलिखेत् पुनर्दलमध्येषु नमः कामदेवाय सर्वजनप्रियाय सर्वजनसंमोह
नाय ज्वल ज्वल प्रज्वल प्रज्वल सर्वजनहृदयं मम वशं कुरु कुरु स्वाहा इत्यस्य मारमालामंत्रस्य षट् षट् वर्णा
न्विलिखेत् अयं मारमालामंत्रः सर्वगोपालकमंत्रजपादौ मारबीजायोजनत्वेन जगत्त्रयवशीकरणार्थं
इयं च कामगायत्री सर्वगोपालमंत्रजपादौ जनसभाजनरंजनार्थं पुनर्मातृकावर्णैर्बहिर्वेष्टयेत् पुनस्त
त्तद्बहिश्चतुरस्रमष्टशूलयुक्तं विलिख्य तत्प्रदिक्षु श्रीमिति विलिख्य कोणेषु भुवनेशीं विलिखेत् एवं
सुवर्णादिपट्टे विलिख्य धारितं उक्तफलं स्यादिति अस्मिन्यंत्रे वैष्णवपीठे संपूज्य तस्मिन्न्यासरूपी मूर्तिं संभा
व्य तत्राच्युतं समावाह्य पूजयेत् प्रथमं मूलदेवताविग्रहे पूर्वोक्तवर्णन्यासक्रमेण तैर्मूलमंत्रवर्णैः सृष्टिस्थि राम
तिक्रमेण समर्च्य षडंगमंत्रैर्हृदयादिस्थानेषु च समर्च्य किरीटकुंडलहृदयचक्रशंखगदापद्मवनमालाश्रीवत्स। १७५

कौस्तुभवैजयन्त्यादीनजतन्नाम्ना समर्च्य पुनर्मूलमंत्रेण त्रिवारं समर्च्य पुनरावरणदेवतापूजां कुर्यात् प्रथ-
मं षट्कोणस्याग्नेयादिकोणेष्वंगैः प्रथमावृतिः ॐ वासुदेवाय नमः ॐ संकर्षणाय नमः प्रद्युम्नाय नमः
अनिरुद्धाय नमः इत्यष्टदलपद्मस्याग्नेयादिदलमूलेषु पुनः ॐ शांत्यै नमः ॐ श्रियै नमः ॐ सरस्वत्यै नमः
ॐ रत्यै नमः इति पूर्वादिदिग्दलमूलेषु एवं द्वितीया पुनः ॐ रुक्मिण्यै नमः ॐ सत्यभामायै नमः इति द-
क्षिणसव्यपार्श्ववर्तिनाः पत्राग्रयोर्यजेत् ॐ नाग्निजित्यै नमः ॐ सुनंदायै नमः ॐ मित्रविंदायै नमः ॐ
सुलक्ष्मणायै नमः ॐ जांबवत्यै नमः ॐ सुशीलायै नमः इति पूर्वाद्यष्टदलाग्रेषु समर्चयेत् एवं तृ-
तीयावृतिः पुनः षोडशसहस्रमहिषीभ्यो नमः इति सकृदेव समर्चयेत् एवं चतुर्थी पुनरिंद्रनिधये नमः
नीलनिधये नमः ॐ मुकुंदनिधये नमः ॐ मकरनिधये नमः ॐ आनंदनिधये नमः ॐ कच्छपनिधये नमः ॐ
ॐ शंखनिधये नमः ॐ पद्मनिधये नमः इत्यष्टनिधयः एतैः पंचमावृतिः पुनरिंद्रादिभिः षष्ठी वज्रादि-
भिः सप्तमी एवं संपूज्य दधिखंडाज्यमिश्रान्नपयोऽन्नेन निवेद्यं कृत्वात्मगुह्यस्यात्मानं समर्च्य न्यस्त्वा जपेत्
तत्र फलमाह जपहोमार्चनध्यानैर्यो मंत्रं भजते मनुं तद्गृहं सर्पत्येते रत्नस्वर्णधान्यैरनारतं पृथ्वी पृथ्वी धनै
करे यस्य सर्वसस्यकुलाकुला पुत्रैर्मित्रैः समं पन्नः प्रयात्यंते परां गतिम् अथ प्रयोगविधिः बद्धाबध्यर्च्यो-
गोविंदं शुक्लपुष्पैः सतंडुलैः आज्याक्तैरयुतं हुत्वा भस्म तन्मूर्ध्नि धारयेत् तस्यान्नादिसमृद्धिः स्यात् तद्वशे
सर्वयोषितः शुक्लपुष्पं मंदारादिधवलपुष्पं प्रयोगांतरं आज्यैर्लक्षं हुनेद्रत्नपद्मैर्वा मधुराक्तैः श्रिया
तस्य सांद्रमैश्वर्यं तृणलेशायते ध्रुवम् मधुरं त्रिमधुरम् प्रयोगांतरम् शुक्लादिवस्त्रलाभाय शुक्लादिकु-
सुमैर्हुनेत् त्रिमधक्तैर्दशशतमाज्याक्तैः काष्ठैः संयुतम् अस्यार्थः मंदारादिशुक्लकुसुमैः शुक्लवस्त्रलाभाय
जपादिरक्तकुसुमैः रक्तवस्त्रलाभाय त्रिमधुरसिक्तैर्वा आज्यसिक्तैर्वा अष्टोत्तरसहस्रं हुनेत् प्रयोगांतरं तोऽ

सिक्तैः सितैः पुष्पैरष्टोत्तरसहस्रकं जुहुने त्रिसंपः समाप्य मधुरोधान्यते भवेत् दौर्हृद्मधु। सितपुष्पमं॰
दमादिं पुनः गोपालकदशाक्षरीविधाने प्यष्टादशाक्षरीविधानेपि पत्रपत्रयोयः प्रयोगउक्तः सोप्यनेन
नमंत्रेण कर्त्तव्यः अनेनापि योयः प्रयोगउक्तः सतावन्मपि कर्तुं शक्यः एवं क्रमदीपिकोक्तविंशा॰
त्यक्षरीविधिः अथ गोपालमंत्रप्रसंगात्तंत्रसारोक्तविंशत्यक्षरीयंत्रविधानं उच्यते षट्कोणकर्णिका
प्रसा सं द्वि २७५ मध्ये ससाध्यं मदनं लिखेत् षट्सु कोणेषु द्वे वर्णौ चतुर्वर्णौ वे तु दले दशपत्रे केसरी च दशार्णकैकव
र्णकं विंशत्यर्णमितं वर्णानुक्रमात् द्वौ द्वौ विलेख्य च मालामंत्रे मारस्य वाणैर्मी तत्केपापि चैव वेष्टितं॰ च^
भपुरा श्रिस्यशक्तिश्रीवसुधास्मर्यं विंशत्यर्णमनोर्यंत्रं प्रोक्तमेतद्यथा श्रुतं गोपनीयं प्रयत्नेन नरे॰
यंयस्यकस्यचित् धर्मार्थसुखमोक्षाप्तः पुत्रधान्यधराप्रदम् रत्नाकरं वश्यकरं कांतिसौभाग्यकी
र्तिदम् किमत्र बहुनोक्तेन कीर्तितार्थसुरद्रुमः अस्यार्थः प्रथमं षट्कोणं विलिख्य तन्मध्ये क्लीं
कामबीजं विलिखेत् तन्मध्ये साध्यनामादि यंत्रन्यासाश्चि लिखेत् तद्बहिश्च तद्दले तद्बहिर्द॰
शादले तद्बहिर्वृत्तत्रयं तद्बहिश्चतुरस्रं विलिख्य पुनः षट्सु कोणेषु क्लीं कृष्णाय नमः इत्यस्य मंत्र॰
स्यैकैकमक्षरं विलिखेत् पुनश्चतुर्दलेषु क्लीं कृष्ण लीमित्यस्यैकैकमक्षरं विलिखेत् पुनर्द॰
शादलमूलेषु गोपीजनवल्लभाय स्वाहा इत्यस्यैकैकमक्षरं विलिखेत् पुनर्दशादलमध्ये श्रीं ह्रीं क्लीं
कृष्णाय गोविंदाय गोपीजनवल्लभाय स्वाहा इत्यस्य वर्णान् द्वौ द्वौ विलिखेत् पुनः प्रथमवृत्ते नमः का
मदेवाय सर्वजनप्रियाय सर्वजनसंमोहनाय ज्वल ज्वल प्रज्वल सर्वजनस्य हृदयं मम वशं कुरु कुरु स्वा
हा इत्यनेन मारमालामंत्रेण वेष्टयेत् पुनर्द्वितीयवृत्ते ॐ ह्रां द्रां शोषणाय नमः ॐ द्रीं क्षोभणबाणाय नमः ॐ क्लीं॰ राम
वशीकरणबाणाय नमः ॐ ब्लूं आकर्षणबाणाय ॐ सः संमोहनबाणाय नमः इतिपंचबाणमंत्रैर्वेष्टयेत् पु २७५

वृत्तेतान्॰

175

नत्ततीयेवृत्ते मातृकावर्णैर्वेष्टयेत् पुनः चतुरस्रकोणेषु ह्रीं श्रीं क्लीं ग्लौं इत्यस्य केकमदनं लिखेत् अथ क
ल्पांतरोक्तविंशत्यक्षरीमंत्रांतरं साध्यगर्भे लिखेत् कामं वह्निगेहयुगोदरे षट्स्रकोणेषु यद्वर्णं चतुःपत्रा
वृत्ते ततः केसरोपचतुर्वर्णांद्वादशार्णमनोर्लिखेत् त्रीणि त्रीणि च वर्णानि प्रतिपत्रं ततो वहिः ॐ नमो भ
गवते वासुदेवायेति द्वादशाक्षरी पद्मे दिक्पत्रे केशजं दशार्णमनं केसरे दिक्पत्रे दशपत्रे विंशत्यर्णमनोव
र्णानु प्रतिपत्रे द्वि द्विशो लिखेत् वहिः षोडशपत्रेषु स्वरान् पत्रकेसरेषथ आगावो यस्य सकृत्स्य अर्धमर्धमचो क्रमात्
वहिः संवेष्टकाद्येश्वतुतो भूविंवमालिखेत् वराहवीजं तद्विभूवीजं कोणगं लिखेत् हकारषष्ठस्वरविंदुभिर्वी
वि॰ हंवीजं हमितिग्लौमितिभूवीजं गोपालयंत्रमेतद्विधिना स्थापितं गृहे तत्र गावः पयस्विन्यः संवृषाश्च निरामयाः पी
नोध्नो वक्रूपाश्च सुशीलाश्च भवंति हि धनधान्यधरारत्नशालिनी तस्य मंदिरे लक्ष्मी रतिस्थिरा भूत्वा वसेदाभू
तसंप्लवम् इति स्वविलिखितविंशत्यर्णयंत्रानुसारात्स्यार्थः स्पष्टः अथ गोसमृद्धिकरयंत्रप्रसंगादागावस्य सकृ द्वि॰
स्यापि यंत्रं गोसमृद्धिप्रदं लिख्यते मध्ये तारं ससाध्यं वसुदलविवरे गावस्सकृत्स्य चत्वर्णैकामे काकेमेण
प्रविलिखेत् वहिर्वेष्टितां मातृवर्णैः आगावः सकृ यंत्रं ऊरुग्रहगतमिदं स्थापितं मंदिरादौ दद्याद्गोरक्षिका
तृणकवृषमहिषैः संकुलामाशुलक्ष्मीं अयं स्पष्टार्थः अथ गोपालमंत्रप्रसंगाद्गोपालसंध्यावंदनप्रकारो २
लिख्यते प्रथमं वैदिकसंध्यावंदनं कृत्वा दक्षिणहस्ततलेन जलमादाय वामकरतले हृदयमंत्रेण तत्स
लिलं निधाय तदंगुष्ठविवरनिर्गतजलविंदुभिर्दक्षिणकरेणानेन मंत्रेण शिरसा दायादित्यमंडलगताय मार्गा
पश्चात्त्रिरंघ्री निवेद्य तदंगादीन्न्यसेत् रामक्रीडारतं कृष्णं गोपीमंडलमध्यगात् तावत्प्रिष्टमस्त्रमंत्रेण दक्षिण
करेणादाय धोनिदक्षिण्येषु नरभेवं च तु कृत्वोभयस्य दक्षिणकरेण हृदयमंत्रेण जलमादाय वामनासापुटे
नाघ्राणांतर्गतदोषं प्रक्षाल्य दक्षिणेन निःसार्य विसर्ज्यं जलिताजलं ध्यायन्तं मधुरं वेणुं ध्यात्वा तत्र रवि
म ध्ये

मंडलेन तदभिमन्त्र्योद्दिक्षु मंत्रजलज्ञायंत्रीयथाशक्तिजप्त्वा पुनः स्वमंत्रस्यांगन्यासादीन् कृत्वाग्रागुक्तवन्नीत्तर्प
णाद्यर्ककं तर्पणं कुर्यात् एवं गोपालसंध्यावंदनविधिः गोपीजनाय विद्महे गोपीवल्लभाय धीमहि तन्नो कृष्णः प्रचोद
यात् इति गोपालगायत्री अस्य मूलमंत्रवद्दृष्ट्यादि अथवा मारगायत्री कामदेवाय हृत् विद्महे शिरः पुष्पवाण
नेत्रम्, य शिखा वा धीमहि कवचं तन्नोऽनंग प्रचोदयात् अस्त्रं नारदगायत्री कृष्णाद्याद्याः शिरोललाटनेत्रहृदयद्याः यत्से
प्र.सा.सं ध्वजेषु वर्णान्न्यसेत् अंगमंत्र एव गायत्रीमंत्रः ॥ इति श्रीप्रपंचसारसंग्रहे गीर्वाणेन्द्रविरचिते सप्तदशः पटलः १७
प अस्य श्रीकृष्णमंत्रप्रसंगात् श्रीराममंत्रो लिख्यते ब्रह्मा ऋषिः गायत्री छंदः श्रीरामो देवता रां बीजं नमः शक्तिः
१७६ मम सर्वैश्वर्यसर्वसौभाग्यसिद्धौ भाग्ये सर्वलोकवश्यविद्याज्ञानसिद्ध्यर्थे विनियोगः रां हृत् रीं शिरः इत्याद्यं जपे
गानि अथवा मूलमंत्रपदैरेव षडंगानि एतैर्मंत्रैरेव करन्यासं च कुर्यात् अथान्तरन्यासः ब्रह्मरंध्रे भ्रुवोर्मध्ये
176 हृदि नाभौ च गुह्ये के पादयोश्च प्रविन्यस्य भावयेद्भावनां सुधीः ध्यानं आधारे भावयेच्छक्तिं चित्सदानंदरूपिणीं
उद्यदादित्यसंकाशामाधारं तत्प्रभामयम् विद्युत्कोटिप्रतीकाशं चंद्रकोटिसुशीतलं सुषुम्णामार्गमब्जमीलया प्रा
पयेत्परं पदं ततः ब्रह्माध्वनानयेदेतद्द्वारणान्तेन मंडलं प्रापय्य विधिनावृष्ट्यापाययेत्तत्सुधामृतं ततः परीगलत्
धा सुधाधाराभिराप्लुतम् निजदेहं जगत्सर्वमेकीभूतं विचिंतयेत् निष्प्रपंचं निराकारं निरवद्यं निरंजनम् अप्रमेयम
अरूपं परमं सत्सद्भावविवर्जितं अखंडानंदमात्मानं भावयेन्मुनिसत्तम इति ध्यानानंतरम् उपसंहृत्य तत्तेजो पद्म
हृदयपंकजे रामं ज्योतिर्मयं ध्यायेत्सर्वलोकैकसाक्षिणं जगदुत्पत्तिसंपत्तिविपरीतिकरं परं देवासुरमुनी
द्रयोगिवृंदैश्च सेवितं चतुर्भुजं शंखचक्रगदापंकजधारिणं किरीटहारकेयूररत्नकुंडलशोभितं एवं ध्या
ने त्वा जपेन्मंत्रं षट्सहस्रं दिने दिने सर्वेषामाश्रितिमूलानां नित्यनैमित्तिकात्मनां कर्मणामविरोधेषु कालेषु जपप राम
रायणः वाचः श्रियः पतिर्भूत्वा कविर्भवति वत्सरात् इति ध्यानांतरम् यद्वा कल्पतरोर्मूले सौवर्णमंडपमध्ये तन्मा १७८

ऽष्टदलंपद्मंचप्रत्यादित्यसंनिभं वीरासनेनतन्मध्येसमासीनंमहामुने। सम्यक्कृतज्ञानमयींमुद्रांदधानं।
दक्षिणकरे तेजःप्रकाशिनींवामजानुन्यर्थनिचापरम्। जानकीवल्लभंदेवंदूर्वानीलसमप्रभम्। व्याख्यानति
रतंदेवंवहिभुजंरघुनंदनम्। वामभागेसमासीनांसीतांकांचनसन्निभां भजतांकामदांनित्यंनीलोत्पलकरां
बुजं लक्ष्मणंपश्चिमेभागेधृतछत्रंसचामरं पार्श्वेभरतशत्रुघ्नौतालवृंतकरौवुभौ एवंध्यात्वाजपेन्मंत्रंध्यान
लक्ष्म्याश्रभाजनं चातुर्विधंकविलंचषण्मासाज्जायतेध्रुवम्। जपतांमंत्रिणामेवमंतर्यागेनधीमतां
पुरश्चरणकृत्यंतुविनाचफलदोमनुः ध्यानांतरम् कालांभोधरकांतिकांतमनिशंवीरासनाध्यासितंमुद्रांज्ञा
नमयींदधानमपरंहस्तांबुजंजानुनि सीतांपार्श्वगतांसरोरुहकरांविद्युन्निभांराघवं पश्यंतंमुकुटांगदादिवि
विधाकल्पोज्वलांगंभजे रांरामायनमः इतिमंत्रः अतःपरंप्रवक्ष्यामिपौरश्चरणिकंविधिं जितेंद्रियोहवि
ष्याशीशाकपावकभोजनः पश्चिमाभिमुखोदेवेवृषभस्थेपिवालये नद्यःसमुद्रगामिन्यास्तीरेगोष्ठेथ
वागृहे अश्वत्थविल्वयोर्मूले सिंधुतीरेजलाशये पर्वताग्रेथवामंत्रीस्थानेष्वन्यतमेजपेत् द्वादशलक्षंज
पेत् दशांशंतर्पयेत् तद्दशांशंविल्वशमिद्भिश्चतत्पत्रैश्चतत्फलैश्चतत्कुसुमैश्चत्रिमधुरसिक्तैर्जुहुनेत्तं पु
रश्चरणार्थम्। अथकल्पांतरोक्तन्यासविधिः अग्निमातृकाकेशवादिमातृकातत्वमूर्तिपंजरान् प्राग्गुणोपा
लकाविधानोक्तान्न्यसेत् अथपूजाविधिः तदर्थंयंत्रंवक्ष्ये अथोच्यतेमहायंत्रंरघुनंदनविग्रहं सौभाग्यदं
वश्यकरंरिपुनाशकारंपरं आयुरारोग्यपदंपुत्रसंग्रहज्वरनिवारणं यंत्रंमंत्रमयंप्रोक्तंमंत्रात्मादेवतेरिता
पुराभगवताप्युक्तंतंत्रेसंमोहनाह्वये देहात्मनोर्यथाभेदोमंत्रदेवतयोस्तथा तस्मात्पीठमहायंत्रंलिखि
त्वातत्रयजेयत् विनायंत्रेणचेत्पूजादेवतानप्रसीदति ततोवक्ष्यामियंत्रस्यस्वरूपंगुरुदर्शितं षट्कोणंपू
र्वमालिख्यतदग्रेवृत्तमालिखेत् वहिरष्टदलंपद्मंततःपार्थिवमंडलं एवंमंडलमालिख्यशोभनंव्यक्तमुज्व

त्वरगमितम् २४

ले षट्क्लेषट्कोणांतर्लिखेद्धीजंसाध्याख्याकर्मगर्वितं मान्मथेनैववीजेनतद्धीजंवेष्टयेद्वहिः अवशिष्टैर्मनो
वर्णैर्मान्मथंतच्चवेष्टयेत् दशाक्षरेणमंत्रेणसर्वतद्वेष्टयेत्पुनः अग्न्यादिकोणषट्कोणषडंगानिचविन्यसेत्
श्रींह्रींइतिलिखेत्पश्चात्षट्कोणस्यकपोलयोः कोणाग्रेषुचक्रंवीजंकेशेषुस्वरक्रमात् ततोमालामनो
प्रसाः वर्णान्पूर्वाद्यष्टदलेषुच तेषुसप्तसप्तमंत्रज्ञोविन्यसेद्दसंख्यया अवशिष्टंपंचवर्णांविन्यसेदष्टमेदले वृत्ताकारेण
८८ तत्सर्वंचवेष्टयेत्कादिवर्णकैः वीजद्वयंलिखेत्पश्चाद्भूगृहेदिग्विदिक्षुच नारसिंहंमहावीजंवाराहंचमनेक्रमा
त् अस्यार्थः प्रथमंषट्कोणंविलिख्यतन्मध्येमंत्रस्यप्रथमंवीजं रामइतिविलिख्य तन्मध्येसाध्यनामादीन्
विलिख्य पुनःकामवीजेनपूर्वलिखितंमंत्रप्रथमवीजंवेष्टयेत् पुनरवशिष्टेनमूलमंत्रवर्णपंचकेनतत्
कामवीजमपिवेष्टयेत् पुनर्वक्ष्यमाणेनरामदशाक्षरेणपूर्वलिखितंसर्वंवेष्टयेत् हुंजानकीवल्लभाय।
177 स्वाहा इतिरामदशाक्षरीमंत्रः पुनःषडंगानिषट्सुकोणेषुएकैकंविलिख्य षट्कोणकपोलद्वंद्वेश्रींह्रीं
मित्येकैकस्मिन्कपोले एवंसर्वकपोलेष्वपिविलिख्य पुनःषट्कोणाग्रेषुहकारमकारउकारविंदुकृतं।
हूंमितिरूपंविलिख्य पुनःवहिरष्टदलेपद्मंविलिख्य तत्केसरस्थानेषुषोडशस्वरान् द्वौद्वौ विलिखेत्।
पुनर्दलेषुमालामंत्रवर्णान्षट्षट्संख्ययासप्तस्वपिदलेषुविलिख्याष्टमेवशिष्टवर्णान्विलिखे।
त् तदुच्यते ॐनमोभगवतेरघुनंदनायरक्षोघ्नविशारदायमधुरप्रसन्नवदनायअमिततेजसेवलायरा।
मायविष्णवेनमः इतिमंत्रः एतेनसप्तचत्वारिंशद्वर्णवतामालामंत्रेणषट्संख्ययासप्तदलेषुवशि। अष्टसप्ताशैः
ष्टवर्णपंचकंअष्टमेचविलिख्य तद्वहिर्वृत्तंविलिख्य तस्मिन्ककारादिक्षांतैर्वेष्टयेत् तद्वहिश्चतुरस्रंसाष्टशू सहितम्=
लाग्रंविलिख्य तस्यदिक्षुनारसिंहवीजंविलिख्यकोणेषुक्ष्रौंमितिवाराहीवीजंविलिखेत् तथाचरेफ। राम
औकारविंदुनादैर्भूषितोमुनेनारसिंहोमहामंत्रोभजतांकल्पभूरुहः पंचमस्वरसंयुक्तोहकारोविंदु। ८८

भूषितः वारा हवीजमित्युक्तं लक्ष्मीधनधराप्रदं एतद्यंत्रं समालिख्य सौवर्णे राजते पटे भूर्जे वाससि गुटूप
गुलिकीकृत्य धारयेत् अपुत्रो लभते पुत्रं अधनो धनवान् भवेत् किमत्र बहुनोक्तेन सर्वसिद्धिप्रदं नृणां यंत्रमेत
त्समालिख्य धारणात्पातकापहम् इत्येवं यंत्रं विलिख्य तस्मिन् वैष्णवपीठं संपूज्य तदुपरि श्रीराममा
वाह्य उपचारैः समर्चयेत् पूर्वमंगैः षट्कोणेषु समर्चयेत् पुनर्वामभागे सीतां तन्मंत्रेणायजेत् तन्मं
त्रस्य जनक ऋषिः गायत्री छंदः सीताश्रीर्देवता श्रीसीतायै नमः इति मंत्रः इमं मंत्रं भार्यायुतो जपेत् तस्मा
दैश्वर्यसिद्धिर्भवति पुनः ॐ शार्ङ्गाय नमः इति देवस्य पुरतो यजेत् ॐ शरेभ्यो नमः इति देवस्य वामदक्षिणतो य
जेत् इत्येषा प्रथमावृतिः तद्बहिरष्टदले पूर्वाग्रदले हनुमते नमः आग्नेये ॐ सुग्रीवाय नमः ॐ भरताय नमः ॐ वि
भीषणाय नमः ॐ लक्ष्मणाय नमः ॐ अंगदाय नमः ॐ शत्रुघ्नाय नमः ॐ जांबवते नमः इत्यष्टदलेषु क्रमेण
सर्वे च प्रणवाद्याः समर्चनीयाः एवं द्वितीयावृतिः पुनरष्टदलेषु जयंताय नमः ॐ विजयाय नमः ॐ सुराष्ट्रा
य नमः ॐ राष्ट्रवर्द्धनाय नमः ॐ अकोपाय नमः ॐ धर्मपालाय नमः ॐ सुमंत्राय नमः एतैरष्टभिस्तृतीया
इंद्रादिभिश्चतुर्थी वज्रादिभिः पंचमी अथ प्रयोगविधिः मधुहोमेन जुहुयात्पायसेनैव वा पुनः कुबेरसदृशो
मंत्र लक्ष्म्या विद्यया धिषणायते अथ श्रीरामप्रसंगात् मंत्रदेवताप्रकाशकोक्तश्रीरामदशाक्षरी लिख्यते दशा
क्षरीमंत्रस्य वशिष्ठ ऋषिः विराट् छंदः सीतायाः पाणिग्रहसमर्थः श्रीरामो देवता क्लीं बीजं स्वाहा शक्तिः
क्लीमित्यादि षडंगानि राजायोध्यानगरीविलसन्मंडपे रत्नभित्तौ तत्र दिव्यास्थितसे सुमनसस्तोरणे दिव्यगं
धैर्नानादिग्भ्यो धनपतिधनैर्दिव्यसिंहासनस्थो दिव्याकारैरनुजनिवहैः सेवितः स्वर्णकुंडले दिव्यमाल्यार्दि
विचरततंतूयमानः सुरौघैः प्राप्तस्प्रांते दृढमुनिवरैर्वामदेवादिभिश्च राकाचंद्रोपमितसुखदः श्यामल
स्वारूढश्चाप्ययः सद्यो विरचितमहाराजराज्याभिषेकः ॐ क्लीं जानकीवल्लभाय स्वाहा अथात्मन्यासः मू

हो:

ह्रिं भाले भ्रुवोर्मध्ये आस्ये कंठे हृदि नाभौ गुह्ये जानुपादयोरक्षरन्यासः समस्तेन व्यापकन्यासः षडक्षरोक्तवि।
धिना पूजयेत् लक्षं पुरश्चरणं जपः अथ प्रयोगः जातीप्रसूनैर्जुहुयाच्चंदनांभःसमुक्षितैः जनवश्याय कमलैर्धन
धान्यादिसंपदे नीलोत्पलानां होमेन वशयेदखिलं जगत् बिल्वप्रसूनैर्जुहुयात् इंदिराप्राप्तये नरः दूर्वाहो
मेन दीर्घायुः भवेन्मंत्री निरामयः रक्तोत्पलैर्भवेन्मंत्री धनमाप्नोति वांछितम् मेधाकामेन होतव्यं पलाश
श्र·सा·सं· कुसुमैर्नवैः तज्जन्मभंभःप्रपिबेत्कविर्भवति वत्सरात् तन्मंत्रितान्नं भुंजीत महदारोग्यमाप्नुयात् अथ सी
१७८ ताराममंत्रः सप्तऋषिः जगतीछंदः सीतारामो देवता श्रींबीजं स्वाहाशक्तिः ॐ क्लीं हृत् श्रीं श्रीं शिरः रारा
मायनमः शिखा श्रीसीतायै स्वाहा कवचं श्रीं श्रीं नेत्राभ्यां क्लीं ईं अस्त्रं तप्ताष्टापदाभां विदेहतनयां रामां
कपीठस्थितां तदुत्कृतेक्षणतत्पररामनिमिषां हस्तास्थिताब्जोत्पलां रामं दाशरथिं रमाकुचलसत्कुलंतदास्ये
178 क्षणं कस्तूरीरचनस्वदक्षिणाकरं ध्यायेदभीष्टाप्तये प्रणवं मान्मथं बीजं लक्ष्मीबीजद्वयं तथा राममंत्रष
डर्णं च सीतामंत्रषडक्षरान् अग्निबीजं ततः पश्चाद्रमाबीजद्वयं तथा कामबीजं ततः पश्चात् प्रणवेन पुटं क्रमा
श्रीं त् सीताराममहामंत्रं जपेद्वांछितमाप्नुयात् ॐ क्लीं श्रीं रीं रामायनमः श्रीसीतायै स्वाहा रां श्रीं क्लीं ॐ इति मंत्रः
मुक्तिं एकविंशतिवर्णोयं भुक्तिमुक्तिप्रदो नृणां षडक्षरोक्तवत्पूजादिकं अथ यंत्रम् षट्कोणं पूर्वमालिख्य तदग्रे वृत्त
मालिखेत् वहिरष्टदलं पद्मं रमामालां लिखेत्क्रमात् पूर्वादिदलपर्यंतं अवसाने वर्गाष्टकं षोडशार्णान्ब।
हिर्लिखेत् तद्बहिः प्रणवं लिखेत् षट्कोणमध्ये श्रीरामं लक्ष्मीबीजेन वेष्टयेत् एवमुक्तप्रविधिं वं मुद्रावकं प्रपूज।
येत् गंधपुष्पादिधूपैश्च दीपै नैवेद्यमेव च एवं कुर्वीत मतिमान् रामसायुज्यमाप्नुयात् अथ सप्तार्णः प्रथमं।
षट्कोणं विलिख्य तन्मध्ये रामबीजं विलिख्य तानि बीजानि प्रत्येकं श्रीबीजेन वेष्टयेत् बहिरष्टदलं पद्मं वि राम
विलिख्य तस्मिन् ॐ नमः सीतापतये रामाय हन हन हुं फट् इति रामषोडशाक्षरी मंत्रेण वेष्टयेत् तद्बहिः प्रण। १७८

ज४

वेनवेष्टयेदिति अथ श्रीरामद्वादशाक्षरीमंत्रस्य अगस्त्यऋषिः गायत्रीछंदः रामचंद्रोदेवता रांबीजं श्रीं
शक्तिः ॐहृत् श्रीशिरः भरताग्रजरामशिखा क्लींकवचं स्वाहा अस्त्रं ध्यानंपूर्ववत् ॐश्रीभरताग्रजरामक्लीं
स्वाहा इतिमंत्रः श्रीरामषोडशाक्षरीमंत्रस्यागस्त्यऋषिः बृहतीछंदः श्रीरामोदेवता ह्रूंबीजं रांश
क्तिः मूलमंत्रपदैःषडंगानि ध्यानंपूर्ववत् ॐनमःसीतापतयेरामायहनहनहुंफट् इतिमंत्रः श्रीरामद्वा
त्रिंशदक्षरीमंत्रस्यागस्त्यऋषिः अनुष्टुप्छंदः श्रीरामोदेवता ॐबीजं श्रीशक्तिः मंत्रपादैर्मस्तैःसम
स्तैःपंचांगानि ध्यानार्चनादिपूर्ववत् ॐरामभद्रमहेष्वासरघुवीरनृपोत्तम दशास्यांतकमांरक्षश्रियंमेदे
हिदापय इतिमंत्रः अथद्वादशाक्षरीमंत्रांतरं शुकऋषिः अनुष्टुप्छंदः श्रीरामोदेवता रांबीजं आयेतिश
क्तिः पादचतुष्टयेनसमस्तेनचपंचांगानि ध्यानादिप्राग्वत् ॐनमोब्रह्मण्यदेवायरामायाकुंठतेजसे उत्तम
श्लोकधुर्यायहस्तदंडार्पितांघ्रये इतिमूलमंत्रः लक्षंजपःसाज्यपायसेनहोमोदशांशः अथमंत्रांतरं अगस्त्य
ऋषिः बृहतीछंदः श्रीरामोदेवता क्लींबीजं नमःशक्तिः ॐह्रींश्रींक्लींदाशरथायसीतावल्लभायत्रैलोक्यना
थायनमः त्रयोविंशत्यर्णाः ध्यानादिप्राग्वत् राममंत्रप्रसंगात्लक्ष्मणादिमंत्रा लिख्यंते लक्ष्मणमंत्रस्यागस्त्य
ऋषिः गायत्रीछंदः लक्ष्मणोदेवता लंबीजं नमःशक्तिः ममपुरुषार्थचतुष्टयेविनियोगः द्विभुजंस्वर्णा
रुचिरतनुंपद्मनिभेक्षणं धनुर्बाणधरंरामसेवासंसक्तमानसं लंलक्ष्मणायनमः इतिमंत्रः भरतशत्रु
घ्नमंत्रयोरपिऋष्यादिपूर्ववत् भरतशत्रुघ्नौदेवते ॐभंभरतायनमः शंशत्रुघ्नायनमः इतिमंत्रः हनुमन्मं
त्रस्यईश्वरऋषिः अनुष्टुप्छंदः हनुमान्देवता हौंबीजं नमःशक्तिः मंकीलकं ममहनुमत्प्रसादसि
द्ध्यर्थेजपेविनियोगः ॐनमोभगवतेआंजनेयायहृत् रुद्रमूर्तयेशिरः वायुसुतायशिखा अग्निग
र्भायकवचं रामदूतायनेत्रं ब्रह्मास्त्रनिवारणायअस्त्रम् एतैरेवकरन्यासः स्फटिकाभंस्वर्णकांतिंद्वि

भुजंच कृतांजलिं ॐ उलक्ष्यसंशोभिमुखं वो भो तं समरूर्भते गं ह्रीं नमो भगवन् प्रकट पराक्रम: आक्रांतदिग्मं
प्र सा सं १७८ 179 डलयशोवितानधवलीकृतजगत्रितयवज्रदेह रुद्रावतार लंकापुरीदहन उदधिबंधन दशग्रीवकृतांतक सी
ताश्वासन अंजनगर्भसंभूत रामलक्ष्मणानंदकर कपिसैन्यप्राकार सुग्रीवधारण पर्वतोत्पाटन बाल
ब्रह्मचारिन् गंभीरशब्द सर्वग्रहविनाशन सर्वज्वरोत्सादन डाकिनीविध्वंसन गं ह्रीं हां हां हां हं सण हि सर्व
विषहर २ परबलं क्षोभय २ मम सर्वकार्याणि साधय २ ॐ फट् स्वाहा इति हनूमन्मालामंत्र: एतानु
लक्ष्मणादिमंत्रानु राममंत्रांगत्वेन यथाशक्ति जपेत्. अथैतन्मंत्रसंध्यावंदनं लिख्यते अस्य श्रीराम
संध्यावंदनस्यास्य भगवान् ऋषि: गायत्री छंद: श्रीरघुनाथो देवता अस्य मंत्रेण जलं संशोध्य चक्रीकृत्य क
वचमंत्रेणावगुंठ्य पश्चाद् ब्रह्मांडोदरतीर्थानि करै: स्पृष्टानि ते रवे तेन सत्येन मे देव तीर्थं देहि दिवाकर इ
ति आदित्यात्तीर्थं प्रार्थ्य अंकुशमुद्रया मंडले विभिद्य करे तज्जलमादाय गंगे च यमुने चेति मंत्रेण तज्जलं ज
ले प्रतिष्ठाप्यावाहनादिषण्मुद्रा: प्रदर्शयेत् आवाहितो भव संस्थापितो भव सन्निहितो भव संपीडितो भ
व संमुखो भव अवगुंठितो भव इति पश्चात् गंधपुष्पधूपदीपनैवेद्यै: संपूज्य गं नमो भगवते रघुनंदनाय रक्षो
घ्नविशदाय मधुरप्रसन्नवदनायामिततेजसे बलाय रामाय विष्णवे नम: इति मालामंत्रेणांजलिना जलमा
दाय दक्षिणकरस्थं जलं वामकरे निक्षिप्य मालामंत्रेण नवधा विभज्य नवं प्रोक्षणं कुर्यात्. अवशिष्टं जलं
दक्षिणकरे गृहीत्वा ॐ जानकीवल्लभाय स्वाहेति पिबेत्. पश्चादर्घ्यं अस्य श्रीरामार्घ्यमंत्रस्य अगस्त्य ऋ
षि: गायत्री छंद: श्रीरामो देवता दाशरथाय अंगुष्ठाभ्यां नम: विद्महे तर्जनीभ्यां नम: सीतावल्लभा
य मध्यमाभ्यां नम: धीमहि अनामिकाभ्यां नम: तन्नो राम: कनिष्ठिकाभ्यां नम: प्रचोदयात् करतलकर
पृष्ठाभ्यां नम: इति करन्यासं कृत्वा तेनैव मंत्रेण हृदयादिषडंगं कुर्यात्. पश्चात्सूर्यमंडलमध्यस्थं रामं सीतासमन्वितं न राम १७८
नवधा भागं प्रकाश्य मंत्रस्य एकादश पदानि संतितत नमः ध्येनमः परद्वयमालि नन्नाध्यादेकं नमः पदं मा(
प्रथमीपदंभूतं तत्रणवांते देयं अंति मं नमः पदानि अष्टावपि यावत् कुर्यात्. इति नवभाग: ॥ ५ ॥


त्रिपुंडरीकाक्षमांजनेयगुरुंपरम् इतिश्लोकमंत्रेणसूर्य्यमंडलेरामंध्यात्वा दाशरथायविद्महेसीता
वल्लभायधीमहि तन्नोरामःप्रचोदयात् रविमंडलस्थरामायनमोर्घ्यंसमर्प्पयामीत्यर्घत्रयंसमर्प्यजलमादा
यतीरेगत्वाश्रीसीतायैस्वाहा इत्यात्मानंपरिषिंच्यआदित्याभिमुखोभूत्वाश्रीरामचंद्रोहमस्मीत्या
त्मानंभावयेत् ततोजलमाविश्यपरंमंत्रमरामायनमः रामंतर्पयामीत्येकविंशतिवारंसंतर्प्य पश्चात्सीतादी
परिवार॰ न्तत्तन्मंत्रनातर्पयेत् अवशिष्टरामंदेवतांसर्वांसमावाह्यश्रीरामांगदेवतास्तर्प्पयामीतितर्प्पयेत् ततःरां
रामायनमः इतिहस्तेजलमादायाभिमंत्र्यत्रिःपिवेत् ततआचम्यरामायनमः इतिअनुष्ठितंसर्वंरामायसम
र्प्पयेत् पश्चात् इतिरामसंध्यावंदनविधिः ॥ अथश्रीरामगायत्र्याः पूर्ववदेवऋष्यादिअंगन्यासः कृत्वा
सप्त्र सूर्य्यमंडलमध्यस्थं इत्यनेनध्यात्वा सूर्य्यमंडलस्थायरामायगंधादिपंचोपचारैःकृत्वादित्याभिमुखोभू
त्वाऽनामिकामूलेअंगुष्ठंनिधाय दाशरथायविद्महेइतिगायत्रींजपेत् ततःगुह्यातिगुह्यगोप्तात्वंगृहा
णास्मत्कृतंजपं सिद्धिर्भवतुमेदेवत्वामहंशरणंगत इतिगायत्रींरामायसमर्प्यांगन्यासंकृत्वोपतिष्ठेत
तत्रमंत्रः नमस्तेरामदेवायज्योतिषांपतयेनमः सात्विकसर्वभक्तानांआनंदमूर्त्तये १ रघुनाथाय
दिव्यायमहाकारुणिकायच नमोस्तुकौशिकानंददायिनेब्रह्मरूपिणे २ त्रिकालमेवंयःकुर्याद्रामए
वभवेत्स्वयं इतिसंध्यावंदनविधिःसमाप्ता ॥ हनुमन्मंत्रोपिलिख्यते ब्रह्माऋषिःगायत्रीछंदः हनुमा
न्देवता ह्रांबीजं ह्रींशक्तिः हनुमत्प्रसादार्थेविनियोगः ह्रांह्रींमित्याद्यंगानिध्यानं आंजनेयमतिपाट
लाननंकांचनाद्रिकमनीयविग्रहम् पारिजाततरुमूलवासिनंभावयामिपवमाननंदनं ॐनमोभगव
तेहनुमतेममम्रदनलोभंहर२आत्मतत्वंप्रकाशय२ हुंफट्स्वाहा इतिमंत्रोविद्याप्रदः हनुमत्मंत्रांतरमा
ह कपीद्रऋदिवरवर अंजनीवरपुत्रआवेशि२ ॐह्रांहनुमत्फट् पूर्वोक्तवदंगर्ष्यादिध्यानं अनेनपिशा

प्र॰सा॰स॰ १८०

180

चादिनिरवृत्तिः अथप्रसंगात्मंत्रसारोक्तहनुमत्मंत्रोप्ययोगपतावष्टा लिख्यते वशिष्टऋषिः अनुष्टुप्
छंदः हनुमान्देवता ॐनमोहनुमतेहुत् मममदनक्षोभंस्थिरः संहरसंहरश्रीवो आत्मतत्वकवचम्
प्रकाशायनेत्रम् हुंफट्स्वाहा अस्त्रं वामजानुनि वामबाहुमपरंहस्तानाल्मेमुद्राधृतंहृदयेशोकलयनुद्व
तोमुनिगणैरध्यात्मदत्तेक्षणं आसीनः कदलीवनेमणिमयेवालार्ककोटिप्रभोध्यायन् ब्रह्मपरंकरोतु
मनसः शुद्धिंहनूमान्मम ॐनमोभगवतेममदनक्षोभंसंहर२आत्मतत्वंप्रकाशाय२ हुंफट्स्वाहा म
दनक्षोभप्रशांतिविद्याप्रधानोयंमंत्रः शीर्षालिकश्रवणनेत्रकपोलनासादोःपादसंधिकटिनाभिसपा।
र्श्वहृत्कंठांसयुग्ममुखेमूर्ध्निचक्रमेणमंत्राक्षराण्यसत्यशुद्धमतिः स्वदेहे लक्षंजपेत् कदलीफलैर्वा
पनसफलैर्वास्वादुफलैर्दशांशांप्रपुरश्चरणेहोमः अथपूजानवशक्तिरहितेसामान्यपीठे आवाह्या
गैः प्रथमावृत्तिः ओंववतेनमः ओंविनतायनमः ओंनीलायनमः ओंपनसायनमः ओंगंधमादनायनमः
ओंसुषेणायनमः ओंमंदायनमः ओंद्विविदायनमः इतिद्वितीयावृत्तिः लोकेशोस्त्रतीया तदायुधैश्चतुर्थी
अस्ययंत्रकर्णिकायांलिखेत् तारंसाध्यगर्भंचतद्वहिः अष्टपत्रेकेसरोद्यत्स्वरं द्वंद्वमनोःक्रमात् आ
येसप्तद्वितीयेचचतुरोर्णान्लिखेत्तृतीयके सप्तचतुर्थेपंचमेचत्रीणित्रीण्यपरेष्वपि षट्सप्तमाष्टमपत्रेषुच
तुरश्चतुरोलिखेत् वृत्तोल्लसत्कादिवर्णैर्भूपुरास्त्रिस्फुरत्तारकम् हनूमतोयंत्रमेतद्धद्धितार्थप्र
दंपरम् इदमेवविलिख्यस्वर्णतालेपुयंत्रं नवनीतेप्रतिजप्यमंत्रमेनम् परिभक्षयतोमनंगपीडा
प्रशमंगच्छतिशुद्धिमेतिचेतः प्रयोगांतरम् आदायदोष्णासलिलंप्रसन्नं जप्यमंत्रंप्रविवे राम १८०
त्रिवारम् रागायदोषप्रशमायबुद्धेर्ज्ञानोदयायप्रशमायदत्तेः अथविद्याप्रदमंत्रप्रसंगाद्विद्यागोपा
लमंत्रोपिलिख्यते श्रीनारदऋषिः अनुष्टुप् श्रीकृष्णोदेवता मंत्रेणव्यस्तेनसमस्तेनचपंचांगानिध्याने ॥

दिव्योद्याने विवस्वत्प्रतिममणिमये मण्डपे योगपीठे मध्ये यः सर्ववेदान्तमयसुरतरोः सन्निषण्णो मुकुन्दः । वेदैः कल्प
द्रुरूपैः शिखरिशतसमालम्बिकोशैश्चतुर्भिर्न्यायैस्तर्कैः पुराणैस्स्मृतिभिरभिवृतस्तत्तादृशैश्चामराद्यैः दष्टा
द्दूलसत्काराद्यैररिदरमुरलीपुष्पबाणेषुचापान्नब्जस्रक्पूर्णकुम्भौ स्मरललिततनुर्दिव्यभूषाङ्गरागः । व्याख्यां
वाचे वितन्वन्नुरुस्फुटरुचिरपदां वेणुना विश्वमात्रे शब्दब्रह्मोद्भवेन श्रियमरुणरविर्वल्लवीवल्लभो नः । गोकु
लकुलमहाकुलसर्वज्ञ त्वं प्रसीद मे रमारमण विश्वेश विद्यामाशु प्रयच्छ मे इति मन्त्रः लक्षजपः ॥ अथ विद्या
गोपालमन्त्रान्तरं नारद ऋषिः गायत्री छन्दः श्रीकृष्णो देवता ऐं क्लीं कृष्णाय हृत् ह्रीं गोविन्दाय शिरः श्रीं गोपी
जनशिखा वल्लभाय कवचं स्वाहा सौः अस्त्रं ध्यानं वामोर्ध्वहस्ते दधतं विद्यासर्वस्वपुस्तकं अक्षमालां च द
क्षोर्ध्वे स्फाटिकीं मातृकामयीं शब्दब्रह्ममयं वेणुमधःपाणिद्वये स्थितम् गायन्तं पीतवसनं श्यामलं को
मलच्छविं बर्हिबर्हकृतोत्तंसं सर्वज्ञं सर्ववेदिभिः उपासितं मुनिगणैर्वेदनिष्ठैर्हरिं सदा ध्यात्वैवं प्रमदावेषवि
लासं भुवनेश्वरं चतुर्लक्षं जपेन्मन्त्रं मन्त्री संयतः ॐ ऐं क्लीं कृष्णाय ह्रीं गोविन्दाय श्रीं गोपीजनवल्लभा
य स्वाहा सौः इति मन्त्रः द्वाविंशदक्षरः विद्याप्रधानोऽयं मन्त्रः चतुर्लक्षं जपः त्रिमधुरसिक्तैः कुसुमैर्दशांशत
श्चरणं होमः विद्यादत्तरोक्तवत्पूजा अस्य मन्त्रस्य फलमाह योऽस्मिन्निष्णातधीर्मन्त्री वर्त्तते वक्त्रगह्वरात्
गद्यपद्यमयी वाणी तस्य गङ्गाप्रवाहवत् सर्ववेदेषु शास्त्रेषु संगीतेषु च पण्डितः संविन्निपरमां लक्ष्मीं चान्ते भ्या
त्परं पदं अथ सन्तानगोपालमन्त्रः नारद ऋषिः अनुष्टुप् छन्दः श्रीकृष्णो देवता ग्लौं बीजं नमः शक्तिः पुत्रार्थे वि
नियोगः देवकीसुत गोविन्देत्यादि चतुर्भिः पादैश्चतुर्ष्वङ्गानि ॐ नमः अथ ध्यानं वैकुण्ठादागतं कृष्णं रथस्थं
करुणानिधिं किरीटिसारथिं पुत्रानानयन्तं परात्परं आदाय तान्रथस्थांश्च गुरवे वैदिकाय च अर्पयन्तं म
हाभागं ध्यायेत्पुत्रार्थमच्युतं ॐ श्रीं ह्रीं क्लीं ग्लौं देवकीसुत गोविन्द वासुदेव जगत्पते देहि मे तनयं कृष्ण त्वामहं शरणं

रंगतः इति मंत्रः मंत्रांतरं ब्रह्मा ऋषिः गायत्री छंदः कृष्णो देवता क्लीं बीजं नमः शक्तिः पुत्रार्थे विनियोगः
क्लीमित्याद्यंगानि ध्यानं शंखचक्रगदापद्मान् दधानं सूतिकागृहे अंके शयानं देवक्यां कृष्णं वंदे विमुक्तये
ॐ नमो भगवते जगत्प्रसूतये नमः इति मंत्रः अथ संतानगोपालमंत्रः प्रसंगात्संतानकुमारीयोक्त संतानगोपा
लकमंत्रो लिख्यते श्रीनारद ऋषिः अनुष्टुप् छंदः श्रीकृष्णो देवता क्लीमित्याद्यंगानि अथ वा देवकीसुत
गोविंदेति मंत्रस्य पादैः समस्तेन चांगानि ध्यानं शंखचक्रगदापद्मान् धारयंतं जनार्दनम् अंके शयानं दे
वक्याः सूतिकामंदिरे शुभे एवं रूपं सदा कृष्णं सुतार्थी भावयेत्सुधीः ॐ देवकीसुत गोविंद वासुदेव जगत्पते
देहि मे तनयं कृष्ण त्वामहं शरणं गतः इति मंत्रः मंत्रद्वयस्यापि विहितजपः पुरश्चरणं अस्य मंत्रस्य पूजाविधि
र्लिख्यते वैष्णवे पीठे पूजयेत् अंगैः प्रथमावृत्तिः इंद्रादिभिर्द्वितीया वज्रादिभिस्तृतीया दशाक्षरपरा चैवस्य
कूपदेर्चयेद्धरिं पुत्रार्थे स्वस्तिके न्यस्य शरावं घृतसंयुतं कर्पूरवर्त्तीन्यस्यास्मिन् ज्वालयेद्दीपमुत्तमं प
द्ममष्टदलं कृत्वा तत्रस्थं कृष्णमर्चयेत् सर्वोपचारसंयुक्तं परिवारगणैः सह त्रिसंध्यमर्चयेद्देवमेकादशप्रज
नार्दनं क्षीरवृक्षकषायेन संपूर्य कलशद्वयं तत्रावाह्याच्युतं भक्त्या प्रोक्तवत्पूजयेत्पुनः संस्पृश्य कलशद्वंद्व
मष्टोत्तरसहस्रकम् अष्टोत्तरशतं वापि जपेन्मंत्रमनन्यधीः द्वादश्यामथ गोविंदं संपूज्य विधिपूर्वकम्

स्वस्तिकाचकमिदं
शाल्यन्नं पायसं स्वादु गोसर्पिर्गुडमिश्रितम् पक्वान्नं मोचाफलवत्सपूपापूपतंडुलम् स्वादूपदंशसंस्निग्धं
कापिलं दधि खंडवत् निवेदयेत्स्वर्णपात्रे पात्रे भक्ताय विष्णवे सुशीतं खंडकर्पूरैः पाटलैः सुरभीकृतम्
वस्त्रपूतं स्वच्छतरं पानीयं च निवेदयेत् स्ववित्तशक्त्या गोविंदतुष्ट्यै श्रद्धापवित्रया द्विजेभ्यो भोजनं दद्यात्
सर्वकामसमृद्धिमान् संस्कृते चाग्नौ विष्णुमावाह्यार्घ्यादिभिर्यजेत् हविषाष्टोत्तरशतं मष्टाविंशतिरेव वा हु
त्वाशिष्टं काचिद्द्रव्यं घृतेनाष्टशतं हुनेत् संपातं कलशद्वंद्वे निषिच्यामोचदंपती अभिषिंच्य पुनस्ताभ्यां

181

यंत्रे लोयमयं हरिं अष्टोत्तरशतं जप्त्वा हविः प्रोषं प्रदापयेत् कृष्णंध्यात्वा ततस्तत्रीनमादाय मत्त्वोस
ने आसीनो प्राङ्मुखो भूत्वा एनं विलिख्य भक्षयेत् सम्यक्का ब्राह्मणवरांस्तां कृतेर्मोदकादिभिः प्रत
र्थ्यार्थ्यन मस्कुर्यादिद्भु लुब्धा चैतान् द्विजान् ततस्ताभ्यामिष्टसिद्धिर्युवयोरस्त्विति द्विजाः इत्युक्तो चहरेत्
हृष्टोफलितं तेनोभिवांछितं इति स्मरंता वनयौभुंजीयतामनंतरम् एवं यः कुरुते विप्रो विनाशाठ्य विवर्जितः
विष्णुभक्त्याविप्रो सोप्यष्टाद्दर्शा स्मितपदके सोचिराल्लभते पुत्रमायुष्मंतमवर्चसं संततेश्चाधिककर्त्तारं विष्णु
भक्तिं महामतिं दरिद्रः कर्त्तुमेवं योन प्राप्नोति द्विजोत्तमः जपेद्धा तपयेद्धापि सोपि पुत्रमवाप्नुयात् अस्यैव
यंत्रलिख्यने कामं मध्ये स्वरयुगल सल्के सरे षट्पत्रेषा लिख्यैवं जलनिधिमितान्मंत्रवर्णाननुक्रमेण भूयो हुवि
परिवृतमिदं भूपुरस्थं तदेतद्यंत्रं सद्यो वितरति तनयं पुत्रपौत्रादिवृद्धिं। अस्यार्थः अथ ममष्टपत्रं पद्मं विलिख्य
तत्कर्णिकायां क्लीं निकामबीजं विलिख्य तन्मध्ये साध्यनामादि विलिख्याष्टपत्र केसरेषु स्वरद्वंद्वं दलमध्येषु
मंत्रवर्णश्चतुरश्चतुरो विलिखेत् तद्बहिर्वृत्तं विलिख्य तस्मिन्कादिभिर्वेष्टयेत् तद्बहिश्चतुरस्रं विलिखेच
एवं नवनीतेन स्वर्णादिपट्टे वा विलिख्य नारी उपभुंज्यात् तस्मात्पुत्रप्रसूते पुत्रप्रदं यंत्रसारोक्तं पुरुषसूक्तयंत्रमपि।
लिख्यते षट्कोणकर्णिकामध्ये तारं साध्यसमन्वितं मर्दरनषडर्णं च षट्सु कोणेषु संधिषु तदंगानि च तत्पत्र
केसरेषु क्रमेण च गोपालकचतुर्वर्णं मंत्रस्यैकैकमक्षरम् दले षोडशाष्टपत्राणि स्वचीणि त्रीण्यन्तरालानि च अष्टपत्र
केसरेषु द्वात्रिंशत्तु एकैकवर्णके नृसिंहानुष्टुभो वर्णाश्चतुरश्चतुरस्ततः मर्दनानुष्टुभवर्णकेसरे षोडशपत्रके अ
चीपुरुषसूक्तस्य क्रमात्षोडशकं बहिः मातृकार्णैर्लसद्वृत्तं भूपुराश्रिस्थतारकं यंत्रं पुरुषसूक्तस्य पुत्रायुः
कीर्त्तिकांतिदं सर्वपापहरं श्रीदं धर्मार्थ सर्वमोक्षदम् हैपंगवीने प्रविलिख्य यंत्रं त्रिवारमेनत् प्रतिजप्य सूक्तं
श्रात्रमम ध्यादनितां विदग्धं पुत्रं प्रसूते कमलानतांगं घोरे विषे घोरतरेऽभिचारे घोरे ज्वरे घोरतरे च शूले है

यङ्गवीनेप्रविलिख्येयंत्रं प्रभवत्येतत्सप्रमायन्त्वा कृष्णायोगेः कृष्णवत्सायाः विशेषतः पुंवत्सायाः
सद्योमथितनवनीतंकदलीपत्रे विलिख्य तस्मिन्नवनीते प्रथमं षट्कोणं विलिख्य तन्मध्ये प्रणवं च
विलिख्य तन्मध्ये साध्यनामादि विलिख्य पुनः सहस्राऽ हुं फडिति सुदर्शनषडर्णमनुं षट्कोणेषु
विलिख्य पुनः कोणद्वन्द्वान्तरालेषु ॐ आचक्राय स्वाहा हृदयाय नमः ॐ विचक्राय स्वाहा शिरसे स्वाहा
प्र॰ सा॰ सं॰ ॐ सुचक्राय स्वाहा शिखायै वषट् ॐ विचक्राय स्वाहा कवचाय हुं ॐ सुचक्राय स्वाहा नेत्रत्रयाय
१८२ वौषट् ॐ ज्वालाचक्राय स्वाहा अस्त्राय फट् एतानि चक्राङ्गानि विलिखेत् पुनस्तद्बहिरष्टदले
पद्मं विलिखेत् तत्केसरेषु क्लीं कृष्ण क्लीमिति च तत्र वर्णान् तद्दलेषु ॐ नमो भगवते वासुदेवाये
ति मंत्रस्य त्रीणि त्रीण्यक्षराणि तद्बहिर्द्वादशपत्रं विलिख्य तत्केसरेषु ॐ नमो नारायणायेत्यष्टाक्षर
182 स्यैकैकमक्षरं पुनस्तद्दलमध्ये उग्रं वीरं महाविष्णुं ज्वलन्तं सर्वतोमुखं नृसिंहं भीषणं भद्रं मृत्युमृ
त्युं नमाम्यहम् इति नृसिंहानुष्टुभमन्त्रस्याक्षराणि लिखेत् तद्बहिः षोडशपत्रं विलिख्य
तत्केसरेषु ॐ नमो भगवते महासुदर्शनाय हुं फडिति षोडशार्णस्यैकैकमक्षरं विलिखेत्।
पुनस्तद्दलमध्ये ऋग्वेदोक्त पुरुषसूक्तस्य षोडशर्चः क्रमेण षोडशदलेषु विलिखेत् तद्बहिर्वृत्तं
विलिख्य तस्मिन् मातृकावर्णैर्वेष्टयेत् तद्बहिश्चतुरस्रं विलिख्य तत्कोणेषु प्रणवं लिखेत् एवं न
वनीते विलिख्य षोडशसहस्रसंख्यसूक्तजप्तेन नवनीतं प्राशयेत् तस्मात्पुत्रप्रसूते अथवान्य
ग्रहग्रस्तमभिचारग्रस्तं वा विषग्रस्तं वा अपस्मारग्रस्तं व्याधिग्रस्तं वा एवं विलिख्य जप्त्वा प्राशयेत् तत्क्षणान्निर्विषो भव
ति अथ कल्पविधानोक्तप्रकारेण सूक्तेन संतानयागविधिर्लिख्यते सहस्रशीर्षेति षोडशर्चस्य नारायण ऋ राम
षिरनुष्टुप् छन्दः भगवान् पुरुषो देवता सहस्रशीर्षेति सूक्तं त्रिवारं च दिने दिने विष्ण्वादिसर्वदेवानां सर्वार्चनफ १८२
लमेतत्

त्रिवारं जपेदित्यर्थः शुक्लपक्षे शुभे वारे शुभनक्षत्रगोचरे ह्यादशं पुत्रकामस्तु चरुं ऊषीत वैष्णवं त्वाज
हे निर्वपामीत्यनेन प्रकारेणेत्यर्थः दंपत्योः पुष्पवासः स्यादेकादशं पुष्पशिवालये अग्निं षोडशभिः सम्य
गर्चयित्वा जनार्दनं दद्यात्पुरुषसूक्तेन यः पुष्पाणि पयस्तथा पूजितं स्याज्जगद्दिष्टं तेन सर्वं चराचरं चरुं पुरु
षसूक्तेन श्रपयेत पुत्रकामया प्राप्नुयाद्धि तं समनुमन्त्रितं तेन तिलं मे ह्यादशं पामस्य कायस्यानिर्वपेद्रुस
वे चरुं यः करोति सहस्रं वा याति विष्णोः परं पदं होममिति शेषः स्वयं होमः तेनानार्थं भवति पुनः हुत्वाग्नि
निभः विधिवद्दत्त्वा अग्निं षोडशभिर्बुधः कृतांजलिपुटो भूत्वा स्तुवन्ना प्रीयेतां जपेत अस्योपदेशः प्रथमं षो
डशभिः अग्निरात्मर्हुतिं हुत्वा पुनस्ताभिः पञ्चाहुतिं च हुत्वा पुनरष्टाहुतिं कुर्यादित्यर्थः समिधो ऽप्यत्यह
दस्यहुत्वा जपेज्जुहुयात्पुनः उपस्थाय हुत्वा शास्त्रं ध्यात्वा च मधुसूदनं हविर्होमेतनः कुर्यात्तस्यैव चेवाग्य
तः श्रुचिः सूक्तेन जुहुयाज्जंत्यहविः शेषं तु पूर्ववत् पूर्ववद्दद्यात्पिडं होमं कुर्यादित्यर्थः अस्योपदेशः
अश्वत्थसमिधः षोडशभिरग्निं हुत्वा एकैकहोमानंतरं तत्तत्पूर्वकं अश्वत्थपत्रषोडशाकं तत्रमेण पुरतो
निधाय पुनराज्याहुतिसमये यपि एकैकाहुत्यानंतरं तत्तदनुपूर्वकं तेषु पत्रेषु संपातं च गृहीत्वा पुनः चरुहोमसम
येपि तथैव संपातं गृहीत्वा स्विष्टहोमसमये पितथैव गृह्णीयात् तद्दुपरिच षोडशपत्रेषु कारयेदित्यर्थः [illegible] हविः शे लर्थः
षेन मस्तुतानारीनारायणेत्यपि भवयितार्हविः शेषलब्धाशुचीः सविशद्भूपा अस्योपदेशः आचार्यस्तु नारीपुरु
षसूक्तेस्मान्या षाडिकं कारयित्वा अश्वत्थपत्रस्थं संपातमेकैकमन्यत्रपूर्वकं अश्वत्थपत्रेणैव तस्याः आस्ये विनिक्षिपेत् पुनः
संपातं विधाय अश्वत्थपत्रेणैतानु प्राशनं चैकैकमन्त्रपूर्वकं दद्यादित्यर्थः ततः कृत्वा विदं कर्म कर्तव्यं द्विजतर्पणं द्विजीयान्त्री
निवर्तेत या चगर्भेन विन्दति सप्रजामृतपुत्रा वा या चापुत्रं प्रसूयते विधिं सा जनयेत्पुत्रं अस्य प्रयोगो यथा ब्रवीत् इत्यंजयाविधानोक्तं
केषा

प्र॰ मा॰ मं॰ १८३ 183

अथ पुरुषसूक्तपूजाविधिः आद्ययावाहयेद्देवमृचा तु पुरुषोत्तमम् द्वितीययासनं दद्यात्पाद्यं चैव तृतीयया च
तुर्थ्यार्घ्यः प्रदातव्यः पंचम्याचमनीयकम् षष्ठ्या स्नानं प्रकुर्वीत सप्तम्या वस्त्रमेव च यज्ञोपवीतमष्टम्या नवम्या गन्धमे
व च दशम्या पुष्पदानं स्यादेकादश्या च धूपकम् द्वादश्या च तथा दीपं त्रयोदश्या च रूं तथा चतुर्दश्याञ्जलिं दत्वा पंचद
श्या प्रदक्षिणम् षोडश्योद्वासनं कुर्याच्छेषकर्माणि सर्ववत् इति पुरुषसूक्तपूजाविधिः । अथ न्यासविधिः ॐ नारा
यणऋषिः अनुष्टुप्छन्दः पुरुषो देवता अतो देवा अवन्तु नः ॐ भूः पुरुषाय नमः हृदे इदं विष्णुर्विचक्रमे ॐ भुवः
पुरुषाय नमः शिरः त्रीणि पदा विचक्रमे ॐ स्वः पुरुषाय नमः शिखा विष्णोः कर्माणि पश्यत ॐ महः पु
रुषाय नमः कवचम् तद्विष्णोः परमं पदं ॐ जनः पुरुषाय नमः नेत्रम् तद्विप्रासो विपण्यवः ॐ भूर्भुवः स्वः
तपः सत्यं पुरुषाय नमः अस्त्रम् सर्वत्र ध्यानम् गोक्षीराभं पुण्डरीकासनस्थं चक्राब्जाभ्यां शोभितं कौमोद
कीभ्याम् श्रीभूमिभ्यामर्चितं योगनिष्ठं ध्यायेद्देवं सज्जयेत्तो हृषेशम् अथ न्यासः वामभागाद्यकरचरणजानूरु
गुह्यमेढ्रनाभिहृत्कण्ठासहितयवदनास्यनेत्रमांगे शुभमन्त्री न्यसेत्तानेकमेवस्थानम् एवं षोडशाभिर्ऋग्भि
र्न्यसेत् समष्ठसंहृतिन्यासः अथ घोरे ज्वरे घोरतरे भिचारे घोरे च शूले इति पुरुषसूक्तयंत्रमस्य सर्वत्र न्वे
रशान्तिकरत्वमुक्तम् तत्प्रसंगाज्ज्वरशान्तिप्रदं कुबेरयंत्रं लिख्यते कृत्तिकायां लिखेत्तारं कमात्मत्रेषु
वाष्टसु वर्णान् कुबेरमंत्रस्य चतुरस्रतो बहिः रक्षोहणं वाजिनमित्यृचा मातृकया वृतम् भूपुराश्रि
षु ठं वीजं वीजं दिक्षु चालिखेत् एतद्यंत्रं कुबेरस्य रक्षाकरणमुत्तमम् चातुर्थिकादिविषमज्वराद्यानाशयेत् १८३
त्रि च अस्यार्थः प्रथमम् अष्टपत्रपद्मं विलिख्य तत्कर्णिकायां प्रणवं तन्मध्ये साध्यनामादि अष्टपत्रे कुबेरं
तेभ्यस्त्वं वै रौद्रं नन्दिमानन्दिमावरु ज्वरम् तस्माद्भयं घोरं ज्वरं नाशय मे ज्वर इत्यस्य मंत्रस्य वर्णांश्चतुरस्रात्तरशालि

खेत् पुनस्तद्बहिर्हृदयं विलिख्य शर्वहृत्ते रक्षोहणं वाजिनमाजिघर्मि मित्रं प्रथिष्ठमुपयामि शर्म शिशानो अग्निः
क्रतुभिः समिद्धः स नो दिवा स रिषः पातु नक्तं इत्यृचा वेष्टयेत् द्वितीये वृत्ते मातृकया वेष्टयेत् पुनस्तद्बहिर्भूपुरं
विलिखेत् तत्कोणेषु ठं ठं इति विलिख्य तद्दिक्षु वं वं इति लिखेत् एवं विलिख्य धृतः उक्तफलं भवति अथ ज्वरशां
तियंत्रप्रसंगात् ज्वरशांतिप्रदो मंत्रः कल्पांतरोक्तः शैवज्वरविषयोऽप्यतावशाल्लिख्यते ज्वरमंत्रस्य कालाग्निऋषिः पो०
अनुष्टुप्छंदः कालज्वरो देवता श्रांबीजं ज्रः शक्तिः ज्वरः शक्तिः ज्वरशमनार्थे विनियोगः रक्तत्रिनेत्रं त्रिपदं त्रि
हस्तं त्रिशूलिनं रुद्रसंतं कृपाणं भस्मायुधं वक्त्रशशांकमौलिं ध्यायेत्समस्तं त्रिपदं ज्वरं तं त्रिपाद्धस्तनेत्राय त्रि।
शीर्षाय नमो नमः ज्वराय व्याधिराजाय दत्तोरम्यारमर्त्यये त्रिपाद्भस्मप्रहरणस्त्रिशिरा रक्तलोचनः स मे प्रीतः सुखं।
दद्यात्सर्वामयपतिर्ज्वरः ऊर्ध्वं तेमुखं रौद्रं नंदिमानंदिमावह ज्वरं मृत्युभयं घोरं ज्वरं नाशय मे ज्वर भस्मायुधा
य विद्महे एकदंष्ट्राय धीमहि तन्नो ज्वरः प्रचोदयादिति अथ ज्वरशांतिप्रसंगात्पिशाचग्रहशांतियंत्रं लिख्यते कर्णि
कायां लिखेत्तारं क्रमात्पत्रेषु चाष्टसु पिशाचग्रह ऋषिमंत्रस्त्रीणि त्रीण्येतानि च रक्षोहणं वाजिनमित्यृचा मातृक।
यापि च अथाते अग्निरित्यृचा चैव भूपुरेण च वेष्टयेत् एतद्यंत्रं ज्वरोन्मादग्रहपीडादिनाशनं इदमेव समालिख्य
वसने गैरिकादिभिः तेन संवृत्तदेहस्य ज्वरः सद्यो विनश्यति शैवज्वरशांतिकरं मंत्रांतरं आघंतवंतः कवयः पु
राणाः सद्मा बृहन्तो ह्यनुशासितारः सर्वज्वरान् घ्नंतु मम अनिरुद्धप्रद्युम्नसंकर्षणवासुदेवाः ज्वरं च ज्वरमारं च।
ज्वरातीसारमेव च शीतज्वरं तथा धर्मं सन्निपातज्वरं तथा एकाह्निकं द्व्याह्निकं च तथा त्रिदिवसज्वरं चातु
र्थिकं तथात्युग्रं तथैव सततज्वरं दोषोत्थं सन्निपातोत्थं तथैवागंतुकज्वरम् शमनयाशु गोविंद छिंधि भिं
धि मम वेदनां अथ कुबेरयंत्रप्रसंगादिंद्रगायत्री लिख्यते सकल ऋषिः गायत्री छंदः विबुधेश्वरो देवता यद
द्यहत कच्छवृत्रहन्शीरः उदगा अभि सूर्यमीशीवाः सर्वं तदिंद्र कवशे ते वसेयस्त्र ध्यानम् पारिजाततरुमूलव

डुमणिः कुंडिमोपरि समास्थितं पाणिपंकजयुगांतरालकलशाभिषिक्तनुविजविग्रहम् पाटलांगमरुणं भवा
ममलेंदुसुंदरमुखं श्रियं पाकशासनमहद्भिशं नमतां धर्मकामधनदं पटयकसपुत्रहनुद्गायभिरूर्ध्व दम
सर्वं तदिदं तवशेरति मंत्रः ऐश्वर्यप्रधानो यं मंत्रः द्वादशलक्षं जपः जपसमये नित्यशः शुद्धहविष्यं कुर्वीत इति
मंत्रजपांते रक्तकमलैस्त्रिमधुरसिक्तैर्दशांशं पुरश्चरणहोमः कश्मीरेनपनप्राणामुखदोः पादसंधिषु आधा
रह्मल्मनाकेषु मंत्रार्णान् क्रमशो न्यसेत् इत्यादिविधानं तस्मिन्नेव पटले ऐंद्रत्रिष्टुभविधाने वक्ष्यामः अथ प्र
योगः रविबिंबमध्यसमगाधिपंतिश्रविचिंत्य नित्यममुमेव मनुं जपतामषाष्टशतमाशुवशो भुवनं भवे।
प्रः सा॰ मं॰ १८४ त्किमुत मन्यजनः अरुणैः कमलैर्मधुराप्लावितैर्जुहुयादनले विधिनाष्टशतं उदिते सवितर्यथावत्सतो। १८
धनधान्यसमृद्धिर्मनुष्य भवेत् जातीभिर्यशसे श्रियै कुवलयैः श्वेतैः पाकैरवैः वस्त्रायैर्पुष्पमाप्नुयै
कुरवकैर्बुधैर्धनायैधपला स्वर्णाप्त्यै मधुना पलाशकुसुमैः पुत्राय भुक्त्यै कुशैः रक्तैः पंकजतमधुतैर्दशशतं मं।
त्री दिनादौ जुहुयात् कुरवकांकोरटा अथाज्ये यंत्रम् मध्ये तारं तदनु गुणशो मंत्रवर्णान्दलाग्रे किंजल्के
युग्लयुगलमथ व्यंजनार्णैश्च वीतं दमाविंबां श्रीहृदययुगललसन्मायबीजं तदेतद्यंत्रं शोकं निखिलसुखदं श्री
कंवश्यकारि आलिख्य यंत्रममुमेव समुवर्णपट्टे गोरोचनाकुंकुमचंदनगोमयाद्यैः सम्यग्विधाय कनकपात्र।
वरे मुहूर्ते संधारयेत्सकलसंपदवाप्तिहेतोः स्पष्टं यंत्रांतरम् कर्णिकायां समाध्यंततारं पत्रेषु चा।
ष्टसु अग्न्यर्कश्वप्रग्नजले धिनीलिनि त्रिद्यालतानि च आलिख्य मातृकावर्णैर्भूपुरेणाच वेष्टयेत् पटया।
केल्कचोयंत्रं वश्यसौभाग्यकीर्तिदं सवर्णरत्नधान्यादि सर्वसंपत्करं परमिति तत्राग्निरिति त्रीणि अब्जीति
हृदयम् अथैंद्रत्रिष्टुभश्चिंतामण्याख्यो मंत्रः गृत्समद ऋषिः त्रिष्टुप्छंदः इंद्रो देवता इंद्रश्रेष्ठानि द्रविणानि धे। राम १८४

184

हिहत चितिंदत्तस्यसभगत्वमस्मेप्रिय: पोषंरयीणांअरिष्टंतनूनांशिवो स्वात्मानंवाचस्मादिनत्वमक्षी॰
कवचं समस्तेनास्त्रस्त्वम् ध्यानं मातंगारातिपीठस्थितमरुचिरेनंदनेकल्पवृक्षे मंदाराद्यैर्मनोज्ञैर्विबुध॰
मनुवृतंतमप्रकार्त्तिस्वराभ: हस्ताग्रत्स्वर्णकुंभप्रकरपरिगलद्रत्नधाराप्रवाहान्वर्षंतंवांछितार्थप्रदमम
रपतिंसुप्रसन्नंनमामि इंद्रश्चाष्टानित्यादिकुसुमंत्र: ऐश्वर्य्यप्रधानोयंमंत्र: लक्षंजपेत्सुरश्वरणार्थम् अथा
तस्त्यासउच्यते शीर्षालिकश्रवणनेत्रसंयोनेगंडदंतोष्ठपालिपदसंधिषुसाग्रकेषु आधारनाभिजठरस्त॰
९० नपार्श्ववृष्ठस्थलकेषुमंत्रविन्यसक्रमेण विन्यसेवंमंत्रवर्णान्यदानिन्यसेद्रूपेदेवतात्वप्रसिद्ध्यै स्था
नेषुद्व्यष्टसंख्येषुदेहेताराद्यानिद्व्यष्टसंख्यानि मंत्री शीर्षभ्रूकुतिकपोलोसदन्तपार्श्वकटीषुच गुह्यवा
मकटीपार्श्वसांसगंडश्रवेसुच आधारनाभिहृदयवदनेषुयथाक्रमात् एवंपदन्यासंचकुर्यात् अस्याध्या
नोतरम् उपवनेमहतामथनंदनेप्रततगेह्नलसल्ललनागते कनकभासितभूमितलेचिते विबुधशा॰
वशालैरखिलार्थदै: कलितहेमलतानिकरोज्वले।कलनिनादविहंगमनोहरे कनकपंकजसौरभवा
हिनासुरसरित्मरुताचमनोरमे सुरुचिरंमणिमंडपमुज्वले विबुधपादपपंकजमध्यगं मणिमयंचतदंतर
भूतलेद्विरदवैरिमहासनमद्भुतम् उपरिसंस्थितमुज्वलभूषणंतरुणभास्करकोटिसमप्रभं सहितरत्नकि
रीटमनोहरंमणिमणिमयूखविराजितकुंडलं सरसकुंकुमपंकपरिस्फुरत्तिलकशोभिललाटतटांत
रे कमललोचनमुन्नतनासिकं मुकुटगंडतलेमधुरस्मितं अधरकांतिपराजितपल्लवविगलितांकशशां॰ लिम
कनिभाननम् विमलकंबुविराजितकंधरंविविधहाररताचितवक्षसं कनकनेतालगतंवसुसंचयंनिज
करैर्दहंदतंनिजसेविनाम् महितरत्नमरीचिचयोल्लसत्कटकबंधममेनोहरमध्यमं विविधरत्नलसन्म
णिमेखलाकलितसूक्ष्मदुकूलविराजितं अमरवंधुरसिंधुरनासिकासदृशपीनवरोरुमनोहरं प्रपदनि

र्जितमंगलकच्छपीनवमप्रवणितं कुंकुमांबुदं मुनिगणसुखसिद्धिमहोरगाद्यविललोकनतांघ्रिसरोरुहे
त्रिभुवनैकपरायणमिष्टदं त्रिदशनाथमनारतमाश्रये एवं ध्यात्वालदं जपित्वा दशांशं त्रिमधुरसिक्तैर्क-
मलैर्जुहुयात्सुस्वरणहोमः अथपूजाविधिः ऋद्ध्यै समृद्ध्यै सावदायै मनोज्ञायै कान्त्यैनमः सुरूपा-
प्र·सा·सं· यै कामरूपायै सर्वज्ञायै अष्टदलेषु शक्तीरभ्यर्च्य नवमीं कर्णिकायां समर्च्य ॐ नमो भगवते सर्वरत्न-
१८५ मयाय सिंहासनायानमः इति कर्णिकायामर्चयेत् एतस्मिन्पीठे इंद्रमावाह्य तत्र प्रथमं पुलोमनंदनायैनम
इति इंद्रस्य वामपार्श्वेर्चयेत् मातलये इति पुरतः पुरंतरंगैः समर्चयेत् परितः इति प्रथमावृत्तिः पुनर्म-
दाराय संतानाय कल्पवृक्षाय हरिचंदनाय इति चतुर्दिक्षु पारिजातायनमः इति षष्ठेष्वर्चयेत् इ-
185 ति द्वितीया आदित्येभ्योनमः विश्वेभ्योदेवेभ्योनमः मरुद्भ्योनमः प्रजापतिभ्योनमः वसुभ्योन-
मः अश्विभ्योनमः रुद्रेभ्योनमः साध्येभ्योनमः इति तृतीयावरणम् अष्टदलेषु पुनः उर्व-
श्यैनमः मेनकायैनमः रंभायैनमः घृताच्यै पुंजिकलस्याल्लीयैनमः तिलोत्तमायैनमः चित्र-
लेखायै उन्मदायै इति चतुर्थी गरुभ्योनमः नारदाय तुंबरवे चित्ररथायनमः अभ्रमुवल्लभाय
वाजिपतयेनमः अदित्यै जयंताय इति पंचमी इंद्रादिभिःषष्ठी एवं संपूज्य पुरस्तात्तत्र पूर्वकुंडपरि-
ष्टात्तेत्रोनं जुहुयात् कमलैर्मधुरयुक्तैरयुतं पुरश्चरणार्थं अथप्रयोगः रवी त्रिकैः स्नात्वा सहस्रसंख्याड-
ग्यालते: स प्रदिनं कुनेतः यः रोगैर्विमुक्तः सहबंधुवर्गैः प्रांतं प्रजीवेत्तु शरदां नरोसौ प्रयोगांतरम् पाशां-
शांकुशौ काममभीतिमुद्रां करैर्दधानं कमलासनस्थं रक्तांशुकालेपनमाल्यमेनं शचीपतिं तद्गतं ल्प राम
निशीथे विचिंत्य पाशांकुशपाशांक्तिवीजैः पृक्तैः पृक्तं मनं मंत्रितमः सहस्रं जपन्नेनंगतरचित्तवृत्ति १८५
मप्युर्वशीमानयते निजांके आंह्रींक्रोंइतिपाशांकुशशक्तिवीजानि प्रयोगांतरम् वराभीतिश

क्लींपविंचापिहस्तैर्वहंतंसरकंप्रसन्नाननाढ्यं वलारातिमेनं विचिंत्यार्कविंवेप्रजप्यात्सहस्रं समस्तौ दिना।
दौ अथास्ययंत्रम् कर्णिकायांलिखेत्तारंमनोः पत्रेषुचाष्टसु पंचषट्पंचषट् पंचासमं तषउर्णकान् वा।
यंतएहं मातृकायाम् पूरेणचवेष्टयेत् इंद्रस्यैष्टानि मंत्रेस्य यंत्रं सर्वसमृद्धिदं आयुरारोग्यसौभाग्यधनधान्यसु
तप्रदम् सर्वरत्नाकरंवश्यंसद्यदिनेतुयशः प्रदम् किमत्रवह्नुनोक्तेनवांछितार्थप्रदंपरं प्रयोगांतरम् ष
युलां योमधुरयुतां शालीनांमंजरीं जुहोत्यग्नौ॥ शालीश्वर्तिगृहः स्यात्संचितमोमंउलत्र यादर्वाक् शा
लयः कलमाः मंजरीकाणिशं अयमर्थः त्रिमधुरसिक्ताभिः शालीमंजरीभिः सहस्रसंख्येमंउलत्रयं कुर्याने
दिति प्रयोगांतरम् वैश्वदेवविरतौगृहाश्रमीयोजुहोतिवसुसंख्यमंधसांतस्यभक्तमतिमष्टमन्वहंसंप्र।
पद्यतिसहस्रलोचनः प्रयोगांतरम् सकद्वरतोष्पमराधिपतिर्मिनुचर्यमंदिवसस्यमुखे सुखेकृदेवयुः।
तस्य पंसंप्रददात्यशनं दिनशः स्मरसंवकृशः प्रातः प्रातरेकवारंजपतोद्विजस्यकृदेवयुतस्यावश्यमन्नंप्रयच्छती।
ति अथयंत्रः साध्याख्याकर्मयुक्तांघ्रि लिपिरयुगलस्यालिखेत्कर्णिकायांतारं कोणेषुवीजं वसुदलकमलेके
सरोद्यत्स्वरान्ष्ठो दिक्पत्रेषिंद्रियार्णान्गुहवदनमितान् कोणपत्रेषुपश्चादावीतं व्यंजनार्णै रचितपुरगतं
यंत्रमैंद्रंतदेतत् अस्यार्थः प्रथमं षट्कोणं तत्कर्णिकायां प्रणवं तन्मध्ये साध्यनामादीन्विलिखेत् पुनः
षट्सु कोणेषु लं लामितीद्रबीजं लिखेत् तद्वहिरष्टदलं पद्मं विलिख्य तत्केसरेषु द्विशः स्वरान्लिखेत् पुनः
ईशादिचतुर्दलेषु ईद्रस्याष्टानिति मंत्रवर्णान् पंचपंचशोलिखेत् पुनरवशिष्टेषु अग्न्यादिकोणपत्रेषु अवशि
ष्टान्वर्णान् षट्शः षट्शोलिखेत् तद्वहिर्वृत्तं कृत्वाकादिभिर्वेष्टयेत् तद्वहिश्चतुरस्रं लिखेत् अथतास्त्रा।
दिपदे विशेषफलं धारणाविधिश्चोच्यते शालिखेदंताम्रपटे सजसंक्रतावकौमाधुमपातासिक्तोरक्षाकु।

प्र॰सा॰
सं॰
१८६

186

यो त्स्यापितं मंदिरादौ रक्षाभ्रजत्वेनतच्चोरादिकेभ्यः इदमेव विलिख्य हेमपट्टे कृतसंपातविधिं जपादिसिद्धिं कु
चक्रादिषु भवरोषु पुंसामाहितधानोलभतेनिजेष्टसिद्धिं प्रयोगांतरम् मंदाकिनीतटरुहत्रिदशद्रुमाधोवेदारकोः
परिवेष्टितगजराजसंस्थं दोर्भ्यांसुवर्णचषकस्थमभिषूजातमादायमाधकवरायसमर्पयंतम् ध्यात्वाजपत्ननुदि
नंनियमेन योमुं मंत्रोनमंविशतिमातिः शतमत्रयुक्त देवेशमग्रमुदितेचसहस्रभानोः सरशीप्यतानिचयो
भविताहमात्रात् प्रयोगांतरम् हानाख्यमुद्राकुलिशाभयेष्टान् दोर्भिर्वहंतं मुसितं प्रमत्रं विचिंत्य।
मंत्रंप्रजपेत्सहस्रं प्रजेत्सवाग्वल्लभतांनरोसो प्रयोगांतरम् धवलनलिनमध्येसंनिसंमितांगंसरमुनिापित्।
सिद्धैः संवितमप्यतं दशशतभुजदंडोल्लासिपीयूषकुंभैरमृतजलमजस्रं स्रावयंतंनिजांगे सरपुरहट।
मेवंचिंतयित्वासहस्रंजपतानियममुक्तो मंत्रवर्यं नरोयः स्तदुरितविमुक्तो विप्रसंवादयुक्तोजगा।
तिगणनहीनं विंदते दीर्घमायुः प्रयोगांतरम् दिनशोदिनावतारे चत्वारिंशत्क्रतुः शतं प्रजपेत् मा
सारंभदिनेमुमचत्त. शतमायुषे चलदेव अथेंद्राणीमंत्रोपि मंत्रसारोक्तोविलिख्यते बृहस्पतिऋषिः
गायत्रीछंदः इंद्राणीदेवता ह्रीं क्लीं हृत् इंद्राणीशिरः सौभाग्यदेवतेशिखा मघवत्प्रियेकवचं सौभा
ग्यनेत्रत्रयं देहिमेस्वाहास्त्रम् ध्यानं कल्पद्रुमाधामध्येविविधमणिलसन्मंडपांतर्विराजन्मातंगा।
रातिपीठप्रविलसितसरोजन्मसंस्थाप्रसन्ना पीनोत्तुंगस्तनार्त्ताशष्णजघनभरेणमप्याप्रयताद्रीमिं
द्राणीमिंद्रनीलोत्पलशकलनिभांहृद्यमध्यानमामि ॐ ह्रीं क्लीं इंद्राणिसौभाग्यदेवतमघवत्प्रियेसौ
भाग्यंदेहिमेस्वाहा इतिमंत्रः सौभाग्यलक्ष्मीप्रधानः लक्षंजपेत् रक्तपद्मैर्विमधुरत्रितैर्वीरक्तो
त्पलैस्त्रात्रितैर्वालोणैर्वाकैरवैर्वात्रिमधुराक्तैरेषतेषुएकैकेनदशांशंजुहुयात् पुष्पभ्रमणहो
मः रक्तोत्पलेष्वप्यैतद्दुलोणंउप्पुवकुलंपकिंडकैरवंश्वा विलष्पु अथपश्चाविधिः कोलेः प्रभाषेः र

राम
१८६

मायै· विद्यायै· मदनायै· मदनातुरायै· रम्यायै· मनोज्ञायै· हृद्यायै· इत्यष्टदलेषु नवमीं कर्णिकायां
च सम्भ्यर्च्य ह्रीं सर्वशक्तिकमलासनाय नमः इति कर्णिकायां समभ्यर्च्य अस्मिन्पीठे इन्द्राणीं समा
वाह्यार्चयेत् अंगैः प्रथमावृतिः उर्वश्यै· मेनकायै· रंभायै· प्रम्लोचनायै· पुंजिकस्थलायै· तिलो
त्तमायै· घृताच्यै· सहजन्यायै· इति द्वितीयावृतिः इन्द्रादिभिस्तृतीया वज्रादिभिश्चतुर्थी अथ प्रयोगः
जुहुयाच्चंपककुसुमैः प्रातर्विश्वपाजनं वशीकर्तुं चंदनपंकसूपितैः सायं नवमल्लिकापुष्पैर्वा पला
शपुष्पैर्मधुरत्रयाक्तैरिष्टायदा तेन जुहुयात्सहस्रं कन्यां वरार्थं वरोपितृहस्तात् जितप्रिया माम्नुवश्चाविधातुं
लाजाभिरंजलिमितारिष्याष्टसंख्यं वह्नौ जुहोतु विधिवद्धुतं संस्कृताभिः कन्यां हृदाभिलषितामचि
रेण लब्ध्वा सौभाग्यधेनुधनधान्यसुतानयेवा अयमर्थः चंदनमिश्रैर्नवमालिकापुष्पैर्वा त्रिमधुरमि
श्रैः पलाशपुष्पैर्वा सहस्रसंख्यं जुहुयात् सायंकाले इष्टायपुरुषाय कन्यादाने अंजलिमिताभिः अ
लाजाभिः अष्टसंख्यं जुहुयात् वांछितां कन्यां लभते सौभाग्यादींश्च लभते नवमल्लिकामल्लिकापु
ष्पं प्रयोगांतरम् आदाय दोषाभ्रतिपादयंती वराय कन्यामभिवांछिताय सौरेन्द्रकोर्त्तप्रविविश्यज
प्याल्कन्याप्रदानाय सहस्रसंख्यं अयमर्थः एवं ध्यात्वा तस्या कन्याप्रदानं लभते प्रयोगांतरम् कन्या
पितुर्नित्यं कृतकर्णवेधाविधियां प्रजप्यादयुतलक्षसंख्यं सौभाग्यहृद्यमहनीयवेषां वरं लभते त्रिदशेंद्रतुल्यं
तत्वसंख्यं च तर्विंशसंख्यं अथास्य यंत्रमाह षट्कोणकर्णिकामध्ये सत्याध्यां भुवनेश्वरी आलिखेत्सदृ
कोणेषु षडर्णान्कोणसंधिषु अंगान्यष्टदलपत्रेषु गणाःस्यान्मनोः क्रमात् ह्रौं ह्रौं स्वरौ केसरेषु मारं शो
त्तिं च वदेत्ततः पि इन्द्राणीयंत्रमेतत्परं त्रैलोक्यरंजनम् सौभाग्यं सौभाग्यसौंदर्यधनधान्यसुतप्रदम्
अयमर्थः प्रथमं षट्कोणं विलिख्य तत्कर्णिकायां भुवनेश्वरीं विलिख्य तन्मध्ये साध्यनामादीन्विलिखेत्

पुनः षट्कोणेषु ह्रीं इंद्राण्यै नमः इति षड्गुणान्विलिखेत् पुनः कोणसंधिषु अंगषट्कं विलिखेत् पुनरष्ट
हिरण्यपत्रे विलिख्य तत्केसरेषु ह्रौं ह्रौं सः सैं विलिख्येत दलमध्ये मंत्रवर्णानां त्रीणि अक्षराणि विलिख्य पुनः
चतुरस्रं विलिख्य तस्य दिक्षु क्लीमिति विलिख्य तत्कोणेषु ह्रीमिति विलिख्य एवं विलिख्य ध्व.तेऽस्त
राणि विलिख्य उक्तफलं भवति प्रयोगांतरम् वदनताडनमंजनमभिषेकलेपनादिकं चापि एतांश्च
जप्यं कुर्यात् सौभाग्यपाशुपेसम. द्वौवच अथ प्रणवविधानमुच्यते प्रजापति ऋषिः दैवीगायत्री छंदः परा
प्र·सा·स्त्रे· मात्मादेवता अंबीजं उंशक्तिः मंकीलकं अर्द्धमात्राहृत् ईं क्लीं शिरः उं ऊं ऊं शिखा ऐं ऊं ऐं कवचं स्त्रों
१८७ ऊं ओं नेत्रे अः अं अः अस्त्रं अथवा ॐ भूः हृत् ॐ भुवः शिरः ॐ स्वः शिखा ॐ महः कवचं ॐ जनः नेत्र
ॐ तपः अस्त्रम् इत्येतैः षडंगानि कुर्यात् अथ न्यासं च तद्ध्यायोग न्यासविधिः तत्र च तुर्मूर्तियोगः अथ
मं सचैवं कार्यः नाभ्यादिगतमूर्तिचतुष्टयं अमृतमये रूपसंहारैः संस्थाप्य तत्तेजोरूपं कृत्वा प्रणवेन
कीकृत्य अमृतमाप्लावयेत् इति च तुर्मूर्तियोगक्रमः एवमेव ब्रह्मा विष्णु रुद्र भेदाभेद लिंगयोगादृष्ट
187 व्याः तत्र ब्रह्मादियोगत्रयेच चतुर्थपिस्थानेषु तत्तन्मूर्तय एव दृष्टव्याः भेदयोगे सर्वत्र भिन्नशरीरमूर्तित्र
यं अभेदयोगे अभिन्नशरीरमूर्तित्रयं लिंगयोगे लिंगरूपं अथ चिदद्वैतभयोगः शरीरस्य चतुष्टयस्य चित्ते
नसा व्याप्तिचिंतनम् पुनरप्यादिगतो वीचा वाचकैकत्वप्रतिपत्ता प्रणवजपलक्षणोगणयोः अ
त्रयस्य स्थूलसूक्ष्मयोः कारणे संहारः संहारयोगः पुनरेतयोः सच्चिद्रूपव्याप्तिचिंतनमोनयोगः पुनर्द्वैतस्य
कल्पितत्वेन चिद्धीनसमाप्रतीतित्वचिंतनमनुत्तानयोगः पुनस्थ्वैर्द्वैतस्य चिद्व्यतिरेके राम
णसत्वात् चितोपि विकारित्वचिंतनमनुत्तायोगः पुनरपि कचितनत्वादि धर्मराहित्य १८७
चिंतनं निर्विकल्पकयोगः एतदुक्तं भवति नाभिहृदयभ्रूमध्यमूर्धसु खं नमः उं नमः मं न

मः ॐ नम इति प्रणवावयवैः प्रणवेन च न्यासपूर्वकं ब्रह्मविष्णुरुद्रेश्वरान् संभाव्य सर्वत्र मानसपू
जां अमृतमयैरुपहारैः संपूज्य पुनस्तान् तेजोरूपान् कृत्वा प्रणवोच्चारणेनैकीकृत्य षोडशान्तस्थ ।
ममृतसंयोगं जपेत् इति प्रथमो योगः पुनः अं नम इति प्रणव प्रथमावयवेन ब्रह्माणं च तत्तुस्था
नेषु पूर्ववत्संपूज्य प्रणवेन तेजोरूपं कृत्वा अमृतेन संयोजयेत् पुनः उं नमः मं नमः इति द्वाभ्यां वि
ष्णुरुद्रौ तथैव संयोजयेत् पुनः प्रणवावयवैस्त्रिभिरपि च तत्तुस्थानेषु तथैव कार्यः तत्र प्राणमपि
न्यासस्थानविशेषस्तु नाभेः दक्षिणतो वाम तस्य नाभौ च तत्रैव इतरद्वादशस्थानेषु द्वादशमम् इत्यभे हृदयाद्दक्षिणतो वामतो हृदये च एवं मूर्धनि द्वा भ्रू मध्ये च एवं मूर्धनि द्वा सर्वत्र च
दयोगः पुनः प्रणवेन चतुर्षु स्थानेषु न्यासपूर्वकं मानसोपहारैः तेजोरूपीकरणसमर्पणान्त मभेदयोग
लिंगयोगविदेवं भेदयोगाः त्रयोपि कार्याः तत्र भावनाविशेषाः पूर्वोक्ताः अतःपरं प्रणवेन हृदया
दिन्यासपूर्वकं पूर्ववद्देवसर्वस्य वशिष्टाः गणयोगाख्याः निर्विकल्पकयोगताः द्रष्टव्याः तत्रापि ।
भावनाविशेषाः पूर्वोक्ताः इत्येवं चतुर्दशयोगान् कृत्वा स्वनामघटितमहावाक्यप्रणवोच्चारणेन स्वा
त्मन्यवस्थाय प्रणवमकार उकार अकारैर्व्यापकचतुष्टयं कुर्वन् तन्मूर्तीनां शरीरचतुष्टयममृताद्य
संहारन्यासेन नाभ्यादिषु मूर्तीश्च चतुष्टयं संभाव्य अमृतमयैरुपहारैः संपूज्य प्राणायाम स्वमूर्तिं चतुष्टय
मेकीकुर्वन् अमृतमालाक्षरगणपादिकं विन्यस्य सकृत्प्रणवमुच्चार्य बाह्याभ्यंतरममृतमा ।
प्लाव्य अमृतमयो भवेत् अथानुष्ठानपद्धत्युक्तप्रकारेणापि प्रणवन्यासविशेषो लिख्यते अं अं नमो ब्रह्म
णे नमः आं उं नमो विष्णवे नमः इं मं नमः शिवाय नमः ईं मं नमो ब्रह्मणे नमः उं उं नमो विष्णवे नमः ऊं अं नमः शि ।
वाय नमः ऋं अं नमो ब्रह्मणे नमः इत्यादि प्रणवावयवैः अनुलोमविलोमितैः ब्रह्मविष्णुशिव पदैश्च संयोज्य
उक्तरीत्या अवशिष्टमातृकावर्णान् मातृकान्यासस्थानेषु न्यसेत् पुनः अं नमः ऐं अं नमः मं ऋं नमः ॠं

नमः ॐ ॐ नमः मं ॐ नमः खं ॐ नमः इत्यादि प्रणवावयववर्तितपर्यंतकान्मातृकावर्णान्मातृकास्था
नेषु न्यसेत् पुनः ॐ अं ईं नमः ॐ आं ॐ नमः ॐ ॐ नमः इत्यादि प्रणवपुटितवर्णान्मातृकास्थानेषु न्यसेत् पुनः
ॐ अं ब्रह्मणे नमः ॐ आं विष्णवे नमः ॐ ॐ रुद्राय नमः ॐ ॐ ॐकाराय नमः ॐ ॐ प्रणवाय नमः ॐ ॐ सर्वव्या
पिने नमः ॐ अं अनंताय नमः ॐ अं नाराय नमः ॐ अं सूक्ष्माय नमः शुक्लाय नमः वैद्युताय नमः
एकाय नमः एकरुद्राय नमः ईशानाय भगवते महेश्वराय महादेवाय सदाशिवाय सर्वरादिणे नमः
प्रसा॰सं॰ सर्वगताय नमः सर्वप्रियतमाय नमः नित्यतमाय नमः सर्वाय गमाय नमः सर्वकांताय नमः सर्वप्र
१८८ तिष्ठाय सर्वश्रोत्रे नमः सर्वस्वामिने नमः सर्वसमस्ताय सर्वचक्राय नमः सर्वक्रियाय नमः सर्वेच्छा
य नमः सर्वदीप्ताय नमः सर्वाभाय नमः सर्वालिंगिताय नमः सर्वहिंसकाय नमः सर्वदाहकाय नमः
सर्वभावाय नमः सर्वरुद्राय नमः गणबीजाय नमः ध्रुवाय नमः वेदादये नमः मध्यमाय नमः प
राय नमः त्रिमात्राय नमः योनये नमः सर्वदेहाश्रयाय संचारकाय नमः सर्वात्मने नमः इत्थं
188 प्रणवमातृकां सर्वकं मातृकान्यासस्थानेषु न्यसेत् पुनः सामान्यन्यासादय्य गुरुगणपतिवंदनादि
कं मातृकान्यासांतं प्रसिद्धरीत्या कुर्यात् अथ योगविधिः एवं जपादिसिद्ध्यर्थं प्रणवयोगीयथोचित
ग्रासनमास्थाय तन्मंत्रन्यासादिकं कृत्वा मूलाधारत्रिकोणमध्ये मूलाधारगतस्य अकारादि वर्णात्रितयंते
न सोमध्यत्रिकोणविंदुस्य वृत्तनादमयी परोक्षाच्च ब्रह्मात्मिका देवीभावयेत् आत्मऊंडलिनीतस्यामध्य
गतं सूक्ष्मं सर्वविश्वस्य कारणं शिवात्मकं तेजः सच्चिद्रूपं परं स्मरेत् इत्युक्तक्रमेण मूलाधारे अकारादि प्र राम
णवांशत्रय त्रिरेखं त्रिकोणं संचिंत्य प्रणवस्य विंदुं तन्मध्ये दीपाकारं संचिंत्य ॐकारोगुणबीज इत्या १८८
द्युक्त विश्वशक्तियुक्तं ध्यात्वा यथावत्प्रणवमुच्चार्य प्रणवमनन्यं तमात्रोपेतं उच्चार्य नादात्मकं ब्र

लिविरुतिकोमलेपार्श्व ब्रह्मापरनामकं सूक्ष्मं तेजः पीतविसतंतुनिभं नादं सुषुम्नाध्वनातदग्रगतपरमा
त्मगतं निनयेत् इति सूक्ष्मतंतुमनयनयोगः अथैवमेव मूलाधारे आवर्तत्रितययुक्तं बिंदुसंविलारं तथो
च्चार्य द्वादशांतस्य चिंतेतुप्रांतपरिकल्प्य ततो मूलवर्षं ध्यायन् तारमभ्यसेत् इति बिंदुस्वरूपनयनात्म
कस्सपापमलापहरो योगः एवं मूलाधारादि त्रिकोणमध्यबिंदुगतनादरूपप्रभां विसतंतुनिभां विचिंत्य प्र
णवमुन्नमय्यं तमात्रायुक्तं उक्तं उच्चार्य द्वादशांतस्य विचिबंद्धनीत्वा तस्मादमूलवर्षं भावयेत् प्रणव।
मावर्तयेत् इति मंत्रनयनात्मको योगः विह्वरणादि निशृणः मूलाधारगततत्रिकोणमध्यबिंदुगत
नादं तेजः विषतंतुनिभं ध्यात्वा उक्तेन क्रमेण परमात्मनि नयेत् पुनरावृत्तिविहीनं तारमभ्यसेत् पी।
तंतंतुनयनात्मको योगः अथ मूलाधारे एवं विविंतस्थूलसूक्ष्मकारणसामान्यबीजं संविद्भाव।
क्रमेण अकारे मकारं बिंदौ बिंदुं नादे नादं शक्तौ शक्तिमुन्मन्यां ते निर्द्वंद्वा द्विलदाणिप्रांते संहरन् प्रण
वमभ्यसेत् अयं क्रमः संहारात्मको मोक्षप्रदो योगः एवमहरहः योगं कृत्वा दिनत्रयावृत्तौ च मनसा
जाग्रदात्मकं बीजं स्वप्नरूपे बिंदौ तं सुषुप्तिरूपे नादे तं तुरीयरूपायां शक्तौ तां तुरीयातीतरूपेण्यां ते च।
जाग्रदादिभिः सह मनसा संहरेत् अयं मंत्रोच्चारको मोक्षप्रदो योगः समंत्रोच्चारके योगे सूक्ष्मायां स्वम।
हिम्ना व्याप्यायां वाचि निपायां व्याति रूपायां मूलाधारस्थायां परायां वाचि पश्यंत्यां नाभिस्थायां वाचिम
ध्यमायां वैखर्याः च हृदयमुखस्थयोः प्राणोच्चारणेन क्रमेण उत्पाद्य तां पंचमीं वैखरीमेव उच्चार।
णानंतरं तदंतस्थनिरूपेणोंस्य भ्रूमध्ये मूर्द्धि द्वादशांत षोडशांतां स्थित्वा आसां क्रमेण वैखरी मध्यमा।
पश्यंती परा सूक्ष्मा व्याप्य संहरन् प्रणवमभ्यसन् योगं कुर्यात् इत्यादि सर्वमवगंतव्यम् अथास्य प्रण।
वस्य यंत्रमपि भावनार्थं मंत्रदेवताप्रकाशिको तत्प्रकारेण लिख्यते षट्कोणे दिंपीतसंस्थं तदुपरि विल

कारे उकारे उका
रं मरं

मतु सोमसूर्यंसकंडुं तन्मध्ये नादसंज्ञं प्रणवमभिहृतं विंदुनादेषु नश्च इत्थं संचिंत्य योगी विविधमनु।
ह्लीं तारगं सोमसंस्थं सर्वाधारं महेशं सकृदपि मनसा संस्मरेद्यः समुक्तः अस्यार्थः बहुकुंडलिरित्यकारो।
न्वर्थसंज्ञः पीठं स्तकारः सोमसूर्यामिति तिर्यग्रूपरेखा हृद्रूपविंदुरिति तदुपरि रेखावलयं नादमिति
तत्र दीर्घरेखां तारं सप्रणवः तदुपरि विंदुनादौ सोमहकारः शेषं प्रसिद्धं ध्यानं विलंभास्वत्किरीटा
गदवलयगलाकल्पहारोदरांघ्रिश्रोणीभूषं सवत्सो मणिमकरमहाकुंडलामंडितांगं हस्तोद्यच्च।
प्र·सा·से· क्रशंखांबुजगदममलं पीतकौशेयवासा विद्योतद्भासमुद्यद्दिनकरसदृशं पद्मसंस्थं नमामि ॐ।
१८९ इति मंत्रः प्रातलक्षजपः पायसैर्घृतसिक्तैर्दशांशो होमः विप्रभूरुहसमिद्भिर्वा विप्रभूरुहं पला
पां एवं पुरश्चरणहोमः अथ प्रयोगांतरहोमः सर्पिःपायसापूपशालितिलसमिदाज्यैरन्नेन योजरूपा
त् ऐहिकपारत्रिकमपि सत्तलभते वांछितं फलमचिरात् अथ पूजा वैष्णवीपीठे मकरंदं समावाह्य
189 समर्चयेत् तत्र अंगैः प्रथमावृतिः वासुदेवाय न· संकर्षणाय· प्रद्युम्नाय· अनिरुद्धाय· स्फाटिकस्वर्णा
वैडूर्यंद्रनीलाकारांश्च वर्णितः चतुर्भुजाश्चक्रशंखगदापंकजधारिणः किरीटकेयूरिणश्च पीतां
वरधराश्चापि एतैर्महादिग्दलेषु समर्चयेत् पुनः शान्त्यै· श्रियै· सरस्वत्यै· रत्यै· अथपद्मरत्नोद्भवा।
दूर्वावर्णाः स्वलंकृताः एताभिः शक्तिभिरंतरदलेषु इति द्वितीयावृतिः आत्मने अंतरात्मने· पर
मात्मने· ज्ञानात्मने नमः निवृत्त्यै· प्रतिष्ठायै· विद्यायै· शान्त्यै· ज्वलज्ज्वालासमाप्रभाः सुराः रात्माद्या राम
मूर्तिशक्तयः एताभिर्मूर्तिशक्तिभिर्दिग्दलेष्वंतरालदलेषु समर्चयेत् एवं तृतीयावृतिः इंद्रादिभिश्च १८९
तुर्थी वज्रादिभिः पंचमी अथ प्रणवप्रसंगात् शक्तिप्रणवमंत्रविधानविधिश्चाकल्पांतरोक्तोत्र।।
लिख्यते ईशऋषिः पंक्तिश्छंदः शक्तिभैरवीदेवता आंहृतं ईंशिरः इत्यादिदीर्घस्वरषडंगानि ध्यानं शक्तिपाशमध्य

स्थितचित्स्वरूपां वराभये संदधतीं त्रिनेत्राम् सिंदूरवर्णामतिकोमलांगीं मायामयीं तत्त्वमयीं नमामि ध्या
नांतरम् कल्पद्रुममूलमणिकुट्टिमसन्निविष्टां मुक्तातपत्रकृतमौलिकवृष्टिहस्ताम् इष्टाभये विद्ध
तीमरुणां त्रिनेत्रां मीडामये भगवतीमनुशीलयामः इति मंत्रः सबिंदुकचतुर्थस्वरः एकविंशतिलक्षं ज
पेत् दशांशमाज्यैर्हुनेन्मुमुक्षुरणार्थम् अस्य सर्वफलप्रधानोयं मंत्रः अथ षडाम्नायक्रमनवमे पटले भु
वनेश्वरीविधानोक्तपीठस्थावाहार्चयेत् एकशक्तित्वाद्वारणाद्यो न संति अथ वा भुवनेश्वरीत्रिपुराणि
नविधानोक्तवन्न्यसेत् अथ मंत्रन्यासविधिः ऐं ह्रीं श्रीं सुप्रबोधायै सुप्रबोधकनाथाम्बा श्रीपादु
नं८ कां पूजयामि ऐं ह्रीं श्रीं रक्तांबापादनाथ श्रीपादुकां पूजयामि बीजत्रयादि सुक्तांबानाथ श्रीपादुकां पूज नाथा८
यामि बीजत्रयादि निष्कलानंदनाथ श्रीपादुकां पूजयामि नवात्मानंदनाथ श्रीपादुकां पूजयामि अकुला
नंदनाथ श्रीपादुकां पूजयामि इति गुरुपंक्ति तत्रैव वामे दक्षिणे पूर्वदक्षिणपश्चिमोत्तरेषु विन्यसेत् सर्वत्र।
बीजत्रयादि पुनः ऐं ह्रीं श्रीं सच्चिदानंदपरमशिवसंविदे नमः चिदानंदपरमशिवसंविदे नमः श्रीनंदानं
दपरमशिवसंविदे नमः इति नाभौ तद्वामे तद्दक्षिणे च बीजत्रयाद्येवाविन्यसेत् पुनः ईं नमः इति मूलमं
त्रेण नाभिहृदयभ्रूमध्येषु न्यस्त्वा पुनः ईं सपरार्द्धात्मकं बिंदुं किंतु वक्त्र श्रीपादुकां पू० ईं बिंदुद्वयात्म।
कस्तनयुगल श्रीपादु० सपरार्द्धकबिंदुध्वंजितरेखायोनि श्रीपादुकां पूजयामि इति बीजत्रयादि मुख।
स्तनयुगलयोनिषु न्यस्त्वा पुनर्मूलमंत्रेण षट्त्रिंशद्वारं प्राणायामं कृत्वा लिपिन्यासकरन्यासव्याप
कांगन्यासादीन् कृत्वा ध्यात्वा जपेत् इति प्रपंचसारसंग्रहे गीर्वाणेन्द्रविरचिते अष्टादशः पटलः ॥
अथ वैष्णवाष्टाक्षरी विधानमुच्यते साध्यनारायण ऋषिः देवीगायत्री छंदः परमात्मा देवता ॐ बी यं८
जम् आद्यशक्तिः ॐ क्रुद्धोल्काय स्वाहा हृत् महोल्काय स्वाहा शिरः वीरोल्काय स्वाहा शिखा ध्युल्का

घृणा हा हा कवचं सहस्रोल्काय स्वाहा अस्त्रं पुनरपि मंत्रवर्णैरेवाङ्गानि कुर्यात् ॐ हृत् नं शिरः मों शिखा
नां कवचं यं नेत्रम् यें अस्त्रं णों उग्राय नमः [illegible]ष्ठाय नमः इति तत्र न्यासमेवाष्टाङ्गविधिः ततश्च्या यां
श्रक्षौ वामं किरीटान्वितमकरलसत्कुण्डलं दीप्तिराजत्केयूरकौस्तुभाभाशबलरुचिरहारं सपीताम्बरं ॥
नानारत्नांशुभिन्नाभरणशतयुतं श्रीधराश्लिष्टपार्श्वं वंदे दोःसक्तचक्राम्बुरुहदरगदं विष्वगेयं मुकुन्दम् ॥
ॐ नमो नारायणायेति मंत्रः मोक्षफलप्रधानोयं मंत्रः द्वात्रिंशल्लक्षं जपेत् तदंगुष्ठाग्रस्पर्शनाद् अतर्जनी रहि
प्र. सा. सं. १५. तामिरंगुलीभिर्वा जपेत् नातिद्रुतं नातिविलंबितं च गौतमोप्याह कनिष्ठानामिकाङ्गुष्ठमध्यमाभिर्जपेत्स
दा अस्यार्थः अनामामध्यममूलं कनिष्ठामूलं मध्याग्रानामाग्रं मध्यमाग्रं मध्यमूलपर्यन्तमिति नवसुप
र्वसु गणनायां कृतायां नववारं जपो भवति एवं द्वादशवारमावर्तनेन अष्टोत्तरशतवारं जपो भवति ॐ ल
मलावर्तारे अंगुलीभिर्जपं कुर्वन् सांगुष्ठांगुलीभिर्जपेत् अंगुष्ठेन विना जप्तं विफलं भवति प्रिये पर्वभिरं
190 गुलीनां तु जपेदनुदिनं प्रिये मध्यमानामिकात्म मध्यपर्वद्वयमिह प्रिये मेरुप्रकल्पनं कुर्वन् प्रदक्षिणमनु
क्रमात् अनामामूलपर्वादिकनिष्ठानुक्रमेण तु तर्जन्यग्रादितो देवि मध्यमूलावसानकं गणयेच्च क्रमे
णोक्तं किंचित्संकोचयेत्तले अंगुलीर्न वियुंजीत जपकाले महेश्वरि अंगुलीनां वियोगे तु छिद्रेषु स्रवते ज
पः अथवा मध्यमामध्यमूलपर्वद्वयं प्रिये मेरुं कृत्वा जपेद्देवि तर्जनीमूलकावधि अनामामध्यपर्वादि
प्रदक्षिणक्रमेण तु अंगुलिजपो ह्येवा जपः सर्वजपस्य कनिष्ठांगुलीगतरेखाभिर्जपो रेखाजपः भैर
वीयतंत्रे अनामामध्यमारभ्य कनिष्ठानुक्रमेण तु मध्यमामूलपर्यन्ता करमाला प्रकीर्तिता स्मृतिसा
रे सकृदुच्चरिते शब्दे प्रणवं समुदीरयेत् त्रोके यामरजापोपि प्राणायामं समाचरेत् बहुप्रलापे चाच
म्य स्पृश्यांगानि ततो जपेत् क्षुते ष्ठेवे तथा स्पृश्य स्पर्शने भवेत् वायवीयसंहितायां उल्ली पी कं १ राम १५

चुकीनग्नो मुक्तकेशो गलावृतः अपवित्रकरोऽशुद्धः प्रलपन्न जपेत्क्वचित् असंवृतौ करौ कृत्वा शिरस्यावृतो
पि वा चिंताव्याकुलचित्तो वा क्रुद्धो भ्रांतः क्षुधान्वितः अनाशनः शयानो वा गच्छन्नुत्थित एव वा रथ्यायाम
अभक्ष्यानेन जपेत्तिमिरांतरे उपानद्गूढपादो वा यानशय्यागतस्तथा प्रसार्य न जपेत्पादौ विकटासन एव
वा नादीक्षितो विशेषात्तु कुलमार्गेण गृही विशेषयतिर्वनस्थश्च ब्रह्मचारी च स्नातकः कपिलपंचगात्रे
विदेपाद्यवालस्याजपहोमार्चनांतरा उत्तिष्ठति तदा न्यासं षडंगं विन्यसेत्पुनः अश्वत्थोदुंबरप्लक्षाः न्यग्रो
धसंभवाः समिधस्तिलसर्षपदोग्धहुतान्यष्टद्रव्याणि संप्रदिष्टानि एतैर्द्रव्यैर्वा सर्वसिद्धिमेधुराज्यैर्वा
दशांशं तु कुर्यात् पुरश्चरणहोमः अथानुष्ठानपद्धत्युक्तप्रकारेणोक्तानन्यासविधिर्लिख्यते तत्र च गुरु
वंदनादिसामान्यन्यासं लिपिन्यासांतं प्रसिद्धरीत्या निर्वर्त्य केशवादिन्यासं सप्तमपटलोक्तप्रकारेण वेलव।
पीठन्यासं सप्तदशपटलोक्तप्रकारेण कृत्वा तस्मिन् विमलमूर्तये नमः इति मूर्तिं संकल्प्य तस्यामावाह्यमानस
ष्टांगं कृत्वा तेजोमयं भावयित्वा करतलपृष्ठपार्श्वेषु मूलेन च व्याप्य ॐ ॐ ॐ न ॐ नमो ॐ नमो इत्यादिक्रमेण।
मूलमंत्रवर्णैः दक्षिणतर्जनीमारभ्य प्रथमपर्वणि प्रणवमतारं द्वितीयपर्वणि मंत्रवर्णं तृतीयपर्वणि द्वि
तीयतारं अग्रे नमो वा इति क्रमेण वामतर्जन्यंतं सृष्टिन्यासं कुर्यात् तर्जनीद्वयादिकानिष्ठांतं स्थितिः वामतर्ज।
न्यादि दक्षिणतर्जन्यंतं संहारन्यासं कृत्वा एवं सृष्टिक्रमेणाष्टांगन्यासं कृत्वा अंगुष्ठद्वयादिकनिष्ठाद्वयांतं।
युगपत्पंचांगन्यासं ताभ्यां कराभ्यां तालपुटितेन मूलेन देहे त्रिशो व्याप्य मूलपुटितमातृकान्यासं च ॐ नमः
पदाय परमेष्ठ्यात्मने वासुदेवाय नमः इत्यादि सप्तदशपटलोक्तगोपालकन्यासविधानोक्तप्रकारेण पंच
तत्त्वन्यासं च कृत्वा मूलमंत्राक्षराणि मूर्द्धन्यक्षिणोरास्ये हृदये नाभिगुह्ये जानुपादेषु न्यसेत् अष्टतत्त्वानि न्यसेत् ॐ

यं नमः पराय पृथिव्यात्मने नमः ॐ णां नमः पराय अप्स्वात्मने नमः ॐ यं नमः पराय तेजात्मने नमः ॐ रं नमः
पराय वाय्वात्मने नमः ॐ नां नमः पराय आकाशात्मने नमः ॐ मों नमः पराय अहंकारात्मने नमः ॐ नं नमः परा
य महदात्मने नमः ॐ ॐ नमः पराय प्रकृत्यात्मने नमः इति मंत्रवर्णोपातिलोमितानष्ट तत्त्वानि पादगुह्यहृद्बु
द्ध्नशीरःसु पंच हृदि द्वयं सर्वांगे च न्यसेत् पुनः ॐ विद्यात्मने ॐ नादात्मने ॐ च्युतात्मने ॐ शक्त्यात्मने।
ॐ परमात्मने ॐ शांतात्मने ॐ ज्ञानात्मने ॐ नमः परायेति पंच तत्त्वानि च संभूय द्वादश तत्त्वानि च संभूय
प्र: सा: सं: १५२ द्वादश तत्त्वानि एतेषु आदितः चतुर्भिर्व्यापयेत् पुनः एवोक्ताष्टस्थानेषु अवशिष्टानि न्यसेत् पुनः मूलमं
त्रवर्णन्यासं कुर्यात् आधारहृद्वदनदोःपदमूलनाभौ कंठे मनाभिहृदयस्तनपार्श्वपृष्ठे ककुत्स्तनाश्रव
णगंधवहे च दोः पत्संध्यंगुलिषु हृदि धातुषु मानिलेषु मर्ईदनाण्यस्य हृदयोदरमोरुजंघापादद्वयेषु ति
पिशोन्यसेत् क्रमेण गं ॐ सकोरुचरणेषु रथांगशंखश्रीमत्कदाबुजपदेषु समाहितात्मा इत्युक्तक्रमेण
191 दशावृत्तान्न्यासं कृत्वा हृदि धातुषु मानिलेष्विति यत्र ॐ त्वगात्मने नमः नें रक्तात्मने नमः मों मांसात्म
ने नमः वां मेदात्मने नमः रां अस्थ्यात्मने नमः यं मज्जात्मने नमः णां शुक्रात्मने नमः यं प्राणात्मने नमः
इति धातुमंत्रः गं चक्रात्मने नमः पं शंखात्मने नमः णां गदात्मने नमः यं पद्मात्मने नमः इति चक्रादिषु
योज्यं एवं मूलमंत्रवर्णास्तस्यामूर्त्तिपंजरन्यासं च सप्तमदशपटले गोपालाष्टादशाक्षरीविधाने उक्तेन प्रका
रेण कृत्वा पुनः ॐ किरीटकेयूरहारमकरकुंडलालंकृत शंखचक्रगदाबुजहस्त पीतांबरधर श्रीवत्सांकितव
क्षस्थल श्रीभूमिसहितस्वात्मज्योतिर्द्दीप्तदीप्तिकराय सहस्रादित्यतेजसे परमात्मने नमः इति मूर्द्धि विन्यस्य
पुनर्मूलमंत्रस्याष्टांगन्यासं पंचांगन्यासं च कृत्वा चक्राय नमः शंखाय नमः गदायै नमः पद्माय नमः इत्यायु

राम १५२

धानि तत्तत्स्थानेषु विन्यस्य ऋष्यादीन् कृत्वा ध्यात्वा जपेत् अथास्मिन्नेव प्रपंचसारे प्रोक्तप्रकारेण प्रपसा
न्यासविधिर्लिख्यते अथ प्रथमं प्राक्सप्तदशपटले उक्तेन प्रकारेण देहे गं गुरुभ्यो नमः इत्यादि बैल्वपीठं न्यस्य
पुनः सुदर्शनास्त्रेण तालत्रयदिग्बंधनादीन् कृत्वा पुनः प्राक्सप्तमे पटले मातृकान्यासप्रकारेणैवास्य हृद
दन्त्यादियुक्तेन प्रकारेणाष्टादशार्णमालामंत्रं दशकृत्वो न्यस्त्वा पुनरपि सप्तदशे पटले गोपालन्यासविधा
नुक्तेन प्रकारेण मूर्तिपंजरन्यासमपि कुर्यात् तत्र स्थानम् ललाटोदरहृत्कर्णादि दक्षिणपार्श्वांसतत्कूले त
थ्यावामस्त्रपेष्टककुदोप्यथ यथाक्रमं द्वादशाक्षरमंत्रं च मंत्रविन्यस्य द्विर्विन्यसेत् मूर्ध्न्यथो वासुदेवस्तु प्राप्ता।
ति सकलात्मम् पुनस्तत्त्वातिपत्यैः किरीटादिमंत्रं जपेत् किरीटमंत्रस्तु प्राक्सप्तमे पटले इन्द्राप्रकारेणोद्
ध्यां जलपूर्णमुक्तः अथास्य मंत्रस्य दीक्षाविधिः अथ प्रथमं आसने उपविश्य गोपीठन्यासं प्राक्सप्तदशपटले इ
ज्याप्रकारेण गोपालकविधाने उक्तेन प्रकारेण कृत्वा गंधादिभिरात्मानं मानसोपचारैः संपूज्य किरीटमंत्रे
ण पंचवारं त्रिवारं वा पुष्पांजलिं कृत्वा पुनर्बाह्ये प्राक्नवमे पटले भुवनेशीविधाने प्रोक्तं त्रिगुणितपंत्रमंडले
बैल्वपीठं संपूज्य तस्मिन्पीठे पंचगव्यैर्वा गोक्षीरैर्वा षड्विंशतिपटले वक्ष्यमाणधन्वंतरिविधाने वक्ष्यमाणावे
ष्टवाष्टगंधलोलितैः अश्वत्थवटोदुंबरप्लक्षत्वक्क्वथितजलैर्वा कलशं तत्रैव वक्ष्यमाणप्रकारेणाष्टध्या।
समावाह्य बैल्ववाष्टाक्षरमूर्तिमंत्रं वक्ष्यमाणक्रमेण संपूज्य प्राक्सप्तमपटलोक्तविधानेन कुंडं संपाद्याग्निं
समाधाय अत्रैव पुरश्चरणहोमोक्तैर्द्रव्यैरष्टाक्षरमंत्रेण हुत्वा अष्टोत्तरशतं कृत्वा बलिं दत्त्वा कलशमभि।
षिच्य शिष्याय मंत्रं प्रवदेद्गुरुः एवं दीक्षाविधिः अथ पुरश्चरणार्थं बैल्वपीठविधानमुच्यते गं गुरुभ्यो नमः गं
गणपतये नमः इत्यादि प्राक्सप्तमे पटले मातृकाविधाने उक्तेन प्रकारेण स्वस्मिन् आत्मपीठं सर्वं संपूज्य पुनर्वै

स्वपीठनवशक्तयः इत्यर्चनायामुच्यन्ते ।विमलायै॰ उत्कर्षिण्यै॰ ज्ञानायै॰ क्रियायै॰ योगायै॰ प्रह्व्यै॰ सत्यायै॰ ई।
शानायै अनुग्रहायै॰ इत्यष्टदलेषु अष्टशक्तीः नवमीं कर्णिकायां च समभ्यर्च्य ॐ नमो भगवते विष्णवे सर्वभूता।
त्मने वासुदेवाय सर्वात्मसंयोगयोगपीठात्मने नमः इति कर्णिकायां समभ्यर्च्य तस्मिन्विष्णुं समावाह्य समर्च
येत् अंगैर्दशदले समर्चयेत् इति प्रथमावृत्तिः पुनर्वासुदेवाय॰ संकर्षणाय॰ प्रद्युम्नाय॰ अनिरुद्धाय
एतान्दिग्दलेषु शान्त्यै॰ श्रियै॰ सरस्वत्यै॰ रत्यै इत्याग्नेयादिदलेषु इति द्वितीयावृत्तिः चक्राय॰ शंखाय॰ गदा
प्र॰सा॰ यै॰ पद्माय॰ कौस्तुभाय॰ मुशलाय॰ खड्गाय॰ वनमालायै रक्तपीतकनकश्यामलकद्युतिभास्वराः ए
सं॰ वमादिवर्णयुक्ताः आयुधमूर्तयः एतैरायुधैस्तृतीयावृत्तिः पुनः ध्वजाय॰ वैनतेयाय॰ शंखनिधये॰ पद्मनि।
१९२ धये इति दिक्षु समर्चयेत् तत्र ध्वजवैनतेयौ देवस्य पृष्ठदेशाग्रदेशयोर्दिग्दलयोः वामदक्षिणयोर्दलयोः शंख ८
पद्मनिधी पुनः विघ्नाय आर्याय॰ दुर्गायै॰ विष्वक्सेनाय॰ इति कोणेषु समर्चयेत् तत्र देवस्य पश्चात्प्रदेशस्य।
दक्षिणवामकोणदलयोश्च देवस्याग्रदेशस्य दक्षिणवामकोणदलयोश्च संपूजेत् इति चतुर्थ्यावृत्तिः ध्वजा
192 दीनां रूपं चोच्यन्ते ध्वजः श्यामो विपो रक्तौ निधी शुक्लारुणप्रभौ अरुणश्यामलश्यामपीता विघ्नादयो मताः
इंद्रादिभिः पंचमी अपास्येव वक्ष्यमाणविधानान्तरमुच्यते अंगैः प्रथमावृत्तिः वासुदेवादिभिः सशक्तिकैः द्विती
यावृत्तिः केशवादिभिस्तृतीयावृत्तिः इंद्रादिभिश्चतुर्थ्यावृत्तिः अपास्येव वक्ष्यमाणविधानान्तरमुच्यते वासुदेवा।
दिभिः सशक्तिकैः प्रथमावृत्तिः चक्राद्यैर्द्वितीयावृत्तिः ध्वजाद्यैस्तृतीयावृत्तिः केशवाद्यैश्चतुर्थी इंद्रादिभिः पंच।
मी अपास्येव वक्ष्यमाणविधानान्तरमुच्यते वासुदेवादिभिः सशक्तिभिः प्रथमावृत्तिः ध्वजादिभिर्द्वितीयावृत्तिः इं
द्रादिभिस्तृतीयावृत्तिः इत्युक्तविधिचतुष्कं पूजयित्वैकमपि यथाशक्ति चिरेण भवति॰ लक्ष्मीर्हस्तगता श्री
सकलवर्गसिद्धिकरी केशवादिद्वादशमूर्तीनां नामानि लिख्यन्ते केशवाय॰ नारायणाय॰ माधवाय॰ गो

विंदाय विष्णवे· मधुसूदनाय· त्रिविक्रमाय· वामनाय· श्रीधराय· हृषीकेशाय· पद्मनाभाय· दामोदराय
इति श्रीपंचमारसंग्रहे गीर्वाणेंद्रविरचिते एकोनविंशः पटलः ॥ १९ ॥ अनेन विधानेन वैष्णवाष्टाक्षरमूर्त्तिं संपू-
ज्यानयास्तुत्या हरिस्तोतव्यः प्रसीद भगवान्मह्यमज्ञानाकुंठितात्मने तवांघ्रिपंकजरजोरागिणीं भक्ति-
मुत्तमाम् अतः प्रसीद भगवन्नमितद्युतिपंजर अप्रमेय प्रसीदास्मद्दुःखहन् पुरुषोत्तम त्वसंवेद्यस्वरूपात्मन् आ-
नंदात्मन्ननामय अचिंत्यसाधाम विश्वात्मन्प्रसीदेश निरंजन प्रसीद तत्त्वगतं गुणानां प्रसीदस्व च शोभन प्रसीदस्वा-
श्रितगंभीर गंभीराणां महाद्युते प्रसीद व्यक्तविस्तीर्ण विस्तीर्णानामगोचर प्रसीदार्द्र द्विजातीनां प्रसीद त्वा-
तयायिनां गुरोर्गरीयः सर्वेश प्रसीदानंतदेहिनां जय माधव मायात्मन् जय केशव केशिहन् जय सुंदर-
सौम्यात्मन् जय शाश्वत शंखभृत् जय शार्ङ्गधर श्रीमन् जय नंदकनंदन जय चक्रगदापाणे जयाव्यय ज-
नार्दन जय रत्नाकराबद्ध किरीटाक्रांतमस्तक जय यादिपतिच्छायाने रुद्रार्ककराकर नमस्ते नरकारातेन-
मस्ते मधुसूदन नमस्ते नलिनायागन मस्ते नयनांजन नमः पापहरे शांत नमः सर्वभयापह नमः संभृतसा-
र्वात्मन् नमः संभृतकौस्तुभ नमस्ते नयनातीत नमोतिक्रांतवाक्पथ नमो विभिन्नपदेशन नमः स्मृतिप-
थातिग नमस्त्रिमूर्त्तिदिव्याय सर्गस्थित्यंतहेतवे विष्णवे त्रिदिवस्थानाति जिष्णवे परमात्मने चक्रभिन्नारिचक्रा-
य चक्रिणे चक्रबंधवे विश्वाय विश्ववंद्याय विश्वभूतात्मने नमः नमोस्तु योगिध्येयाय नमोस्त्वध्यात्मरूपिणे
मुक्तिप्रदाय भक्तानां नमस्ते मुक्तिदायिने मनोवाक्कायचेष्टासु ध्यानस्तुतिनमस्क्रिया देवेश कर्म सर्वं मे भवे-
दाराधनं तव इति जपहवनार्चाभेदतो विष्णुपूजाविततहृदयकर्मा यस्तु मंत्री चिराय सकलसकलकामान् प्राप्य।
दृष्टांतराम्लाजनन मृतिविमुक्तो मुक्तिमान् मुक्तिमेति एवं वैष्णवाष्टाक्षरमूर्त्तिं संस्तुत्वा पंचीकरणामंत्रैरथ पंचसु।

ष्पांजलिमंत्रैश्च किरीटमंत्रेण च श्रीकृष्णमयस्त्रलोकैः पुष्पांजलिं कृत्वा पुनः क्षमां समापयेत् ॥ इति श्रीपंचमार
संग्रहे गीर्वाणेन्द्रविरचिते विंशतितमः पटलः २० अथ मंत्रदेवताप्रकाशिकोक्तप्रकारेणाशालक्ष्मीयंत्रादिप्रयो
गविशेषाः लिख्यंते अष्टावष्टदलं पद्मं विरच्य कर्णिकायां षट्कोणं विलिख्य तदंतः प्रणवमध्ये साध्य
नामयुक्तं श्रीमिति बीजं विलिख्य दलमध्येषु अष्टाक्षराणि विलिख्य दलाग्रेषु उच्छिष्टश्रीकर स्वाहा इति
श्रीकराष्टाक्षरवर्णान् विलिख्य तद्बहिः षट्कोणानि लिख्य कोणेषु सुदर्शनषडक्षराणि लिख्य तद्बहिः
प्र॰ सा॰ सं॰ १९३ द्वादशदलानि विलिख्य तद्दलेषु वासुदेवद्वादशाक्षराणि लिखित्वा तद्बहिर्द्वात्रिंशद्दलानि रचयित्वा तद्द
लेषु नृसिंहानुष्टुभवर्णान् विलिख्य तद्बहिर्भूहरं कांतेनावेष्टयेत् एतद्यंत्रं जपहोमादिसाधितं समस्तसंप
दत्ता भोगकरं भवति अथ प्रयोगः दधिमध्वाज्यसंयुक्ताश्च तंदुलसंयुताः गडूचीसहितं कृत्वा मृत्युमेवा
तिवर्तते अथ प्रयोगांतरम् शनैश्चरदिने स्वात्यां नित्यमालिंग्य पाणिना जपेदष्टशतं शुद्धो म्रियते नाल्पमृत्युभिः प्र
193 योगांतरम् पंचविंशतिकृत्वा तज्जपेच्छुद्धा पिबेद्यः पुष्पाज्यसमिधो वा पितृकुपादशहो भवेत् उदकं मंत्र
वंशतिं उपस्पृश्य पाशुपतं जपेत् तेनाभिषिक्तगात्रस्तु व्याधिभिः परिमुच्यते अश्रीपादत्वहं विद्वान् एवं।
ल॰ सप्ताभिमंत्रितं आरोग्यमहदाप्नोति वमने तेजश्च विंदति भयापत्तिर्वं भयपाश्च सप्तप्रयुक्ताभिमंत्रितं तत्स।
वं जीर्यते सम्यक् कृत्यापि हालाहलं विषम् शतमष्टोत्तरं जप्त्वा मंत्रश्च शतं जलं पिबेत् ग्रहपहानिवर्णमासात्।
तोमपातिवर्द्धनम् चंद्रसूर्योपरागेषु तिथिषु वेवायनेषु वा त्रिवारमेकवारं वा समुपोष्य यथाविधिः स्पृष्ट्वा नुष्ट।
सहस्रं तु जप्त्वा ब्राह्मीरसं शुचिः त्रिपिवेद्भामतेमेधा अष्कृतं वा प्रोपजायते विल्वैरष्टहोमेन महाधनपतिः।
र्भवेत् पद्मैर्तत्समयस्त्रमयुतेनाभिमंत्रितं धारयेद्दक्षिणे हस्ते सर्वेषां ताम्भवेत्सदा अथ वैलावानादि
मंत्रप्रसंगात् मुक्तिप्रदतत्त्वसामान्येन नामत्रयमपि कल्पांतरोक्तमंत्रपाशुपतावशाल्लिख्यते पराशरव्यासना

र्दैऋषयः विराट्छंदः परब्रह्मदेवता अच्युतायनमः अनंतायनमः गोविंदायनमः इतिमंत्रः अथ
वा अच्युतायानंतायगोविंदायनमः इतिमंत्रः मोक्षारोग्यप्रधानोयंमंत्रः अस्मिन्मंत्रे शौनकऋषिश्छंदो
देवते तत्वे अच्युतायनमः हृत् अनंतायशिरः गोविंदायशिखा अच्युतायकवचं अनंतायनेत्रम्
गोविंदायास्त्रंध्यानम् शंखचक्रधरं देवं चतुर्बाहुं किरीटिनम् सर्वायुधैरुपेतं च गरुडोपरिसंस्थितं स
नकादिमुनींद्रैस्तु सर्वदेवैरुपासितम् श्रीभूमिसहितं देवमुदयादित्यसन्निभम् प्रातरुद्यत्सहस्रांशुमं
डलोपमकुंडलम् सर्वलोकस्यरक्षार्थमनंतं नित्यमेव तु अनंतवरदानं च प्रयच्छंतं मुदान्वितं एवंध्यात्वा
हरिं नित्यं परब्रह्मस्वरूपिणं प्रातर्मध्यंदिने चैव सायाह्ने च विशेषतः अर्चयेद्देवदेवेशं गंधपुष्पजलादि
भिः अथप्रयोगविधिः विनियोगं प्रवक्ष्यामि यथावद्द्विजसत्तमाः नाम्नामस्मरतरारक्षा रोगार्त्तानां विधी
यते अष्टोत्तरसहस्रं वा शतं वा जपसंख्यया रोगार्त्तान्मार्जयेन्मूर्ध्नि कुशैर्दूर्वाभिरेव वा अयमर्थः अ
नेनमंत्रेणाष्टोत्तरसहस्रं शतं वा जप्त्वा कुशैर्वा दूर्वया वा साध्यस्य मूर्द्धि मार्जयेत् सर्वरोगाः नश्यंति
प्रयोगांतरम् अभिषिंचेत्तथा मूर्ध्नि रविवारे तथाम्भसा नित्यं चैव पिबेत्तोयमष्टाविंशतिसंख्यया सर्व
रोगविनिर्मुक्तः शतवर्षाणि जीवति अयमर्थः प्रत्येकं वारं कलशं संस्थाप्य जप्त्वाभिषिंचेत् अष्टाविंश
ति संख्यं नित्यं पिबेच्च तस्मादुक्तफलंभवति प्रयोगांतरम् कृनेह्न तिलैर्दूर्वागुडूचीभिः पृथक्पृथक्
लक्षं चैव जपेन्मंत्रं महारोगस्य शांतये अस्यार्थः एतैर्द्रव्यैः पृथक्पृथक् सहस्रं हुनेत् लक्षं जपेच्च तत।
स्मादुक्तफलंभवति प्रयोगांतरम् विल्वमूले तथाश्वत्थमूले वा रोगिणं स्मरन् स्थापनं त्वा निरी
क्षेत मार्तिंड्यं मनसा स्मरन् एवं कृतवतः पुंसो रोगशांतिर्भविष्यति अयमर्थः विल्वाश्वत्थयोर्वा मू
द्ध रोगिणं स्मृत्वा पश्चात् आदित्यं मनसा ध्यात्वा तं रोगिणं निरीक्षेत् तस्मादुक्तफलंभवति प्रयोगांतरं कन्या

यीताज्यहोमेन श्रीकामो बिल्वपत्रकैः पुत्रार्थी वनहोमेन आरोग्यार्थी तिलैर्हुनेत् प्रयोगांतरं ज्वराग्र
हनिरस्तं च स्पृष्ट्वा लक्षं जपेज्जले असाध्योऽपि भवेत्स्वस्थो भस्मना नाडयेद्बुधः मूर्ध्नि चैव ललाटे च जपेन्मं
त्रत्रयं हृदि आविष्टपूर्वं वदति यथेष्टं गच्छति ध्रुवम् अयमर्थः ज्वरग्रस्तं पिशाचग्रस्तं वा स्पृष्ट्वा पुनर्जले
प्रसा॰सं॰ १९८ स्थित्वा लक्षं जपेत् तस्मात्तच्छांतिः अथवा भस्म साध्यस्य कस्य ललेषु मंत्रं जप्त्वा निक्षिपेत् तस्माद्भूतपि
शाचा आविष्टपगच्छंति प्रयोगांतरम् मोक्षकामी जपेत्रिंशन्मध्ये तु रसहस्रकं यावज्जीवं करेत स्वस्थितो ना
मूर्तिर्नसंशयः ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्च विधवा स्त्रियः गडूचीच्छेतरदूर्वाभिस्तिलबिल्वकुशैः शरैः
यथाकामी हुनेत्त्रिंशत्तत्तत्कामस्य सिद्धये धारिणीगण ल अयमर्थः एवैर्द्रव्यैः प्रत्येकं सहस्रसंख्यं हुनेत् यं
कंचित्कामम् उद्दिश्य तस्मात्तं कामं लभंते प्रयोगांतरं रविवारे जले स्थित्वा नाभिदघ्ने जपेन्नरः अष्टोत्तरसहस्रं
195 तु ज्वरनाशो भविष्यति प्रयोगांतरं ग्रहापस्मारकुष्ठादिपिशाचाः प्रेत एव च लक्षं हुनेत दूर्वाभिः तच्छांति
स्तु भविष्यति अयमर्थः दूर्वया लक्षं हुनेत् ग्रहापस्मारादिशांतिः प्रयोगांतरं स्पृष्ट्वाम्भस्त्वयं जपेद्धर्मरवि
मंडलमध्यगं ध्यायन्कांचनभं कामानक्षरूपान्करं विनी अयमर्थः रविमंडलमध्ये श्रीकृष्णं ध्यात्वा अम्बुं
त्यस्पृष्ट्वा जपेत् तस्मात्कामांश्च अक्षरकुलानि चिंतयंश्च लभ्यति प्रयोगांतरम् अच्युतानंतगोविंदनामोच्चारण
भेषजात् नश्यंति सकला रोगाः सत्यं सत्यं वदाम्यहम् सर्वे भवंति मुक्ताश्च नामत्रयजपान्विताः अग्नितीनां गति
स्वेन तं मंत्रत्रयम् अनुत्तमं गृहीत्वा वदतो मंत्रमेकादशार्णं सदा दिशेत् यथालाभं जपेन्मंत्रमर्चयेद्विशेषतः कि
मत्र बहुनोक्तेन सर्वसिद्धिकरा ह्यमी आचार्यात्समभिप्राप्नोह्यद्दत्वा तस्य दक्षिणा अन्यस्तोऽपि महा॰
मंत्रः श्रेयसे नात्र कल्पते अथास्य यंत्रम् उच्यते षट्कोणमध्ये प्रणवं तदंते साध्यं पुनश्च प्रणवं विलिखे
त् बहिः प्रणादिकोणेषु मनोः पदानि नामत्रयी मंत्रम् अनुत्तमं स्यात् अस्यार्थः प्रथमं षट्कोणं विलि राम
ख्य तन्मध्ये प्रणवं विलिख्य तन्मध्ये साध्यनामादीनि विलिखेत् षट्कोणेषु अच्युतायेति पूर्वकोण॰ १९८

ॐ नमः इति आग्नेयकोणे अनन्ताय नमः गोविंदाय नमः इति षड्दानि षट्कोणेषु विलिख्येत हृदि प्राण
वेन वेष्टयेत् एवं नामत्रयं यंत्रं मकं एतद्धि लिख्य धत्ते अभीष्टफलं विशेषतो रक्षाकरं च भवति इति नाम
त्रयकल्पः समाप्तः अथ वैष्णव द्वादशाक्षरी मंत्रविधानमुच्यते प्रजापतिरृषिः गायत्रीछंदः विष्णुर्दैव
ता अं बीजं नमः शक्तिः ॐ हृदय नमः शिरः भगवते शिखा वासुदेवाय कवचं ॐ नमो भगवते वासुदेवा
द्वे= य अस्त्रं ध्या० हरिमुज्ज्वलचक्रदराब्जगदाकुलदोः परिघं शितपद्मगतं वलयांगदहारकिरीटधरं नवकुंद
रुचं प्रणमामि सदा ॐ नमो भगवते वासुदेवाय इति मंत्रः मोक्षप्रधानोयं द्वादशलक्षजपः अथातस्त्वा
सं वक्ष्ये पादजानुगुह्यलिंगनाभ्युदरेषु च हृद्गलास्य हृदृ भ्रुवि शिरो वेत्सु क्रमशो न्यसेत् इति स
ष्टिन्यासः हृत्कंठनाभिगुह्यपादान्नान्तं पदेषु च कर कर्णास्य हृद् मस्तके शिरोः सर्वं च विन्यसेत्
सृष्टिन्यासविलोमे न संहारन्यास उच्यते इति स्थितिन्यासः एतस्य त्रिविधन्यासस्य महाफलमुच्यते संहृते दोषसंहारः सृष्टेरभ्युदयः।
स्थिते शांतिर्विन्यासेस्यात्कार्यास्त्रयो मताः शुद्धे तिले द्वादशसहस्रं तत्पुरश्चरणहोमः अथ
पूजा शैवोक्तवैष्णवपीठे वासुदेवं समावाह्य समर्चयेत् अंगैः प्रथमावृतिः वासुदेवाय संकर्षणाय प्र
द्युम्नाय अनिरुद्धाय एतास्तत्त्वोमजेपः दिक्षु पुनर्लक्ष्म्यै सरस्वत्यै रत्यै प्रीत्यै एता विदिक्षु एते
द्वितीयावृतिः केशवाय नारायणाय माधवाय गोविंदाय विष्णवे मधुसूदनाय त्रिविक्रमाय वा
मनाय श्रीधराय हृषीकेशाय पद्मनाभाय दामोदराय एते स्तृतीयावृतिः इंद्रादिभिश्चतुर्थी प्रयोगः
समिधामथ दुग्धवृक्षजानां जुहुयादर्कसहस्रं सदुग्धमनसः परिहृत्य मनस्वी सच्चते नापि पयोधसासिते
न असार्थः दुग्धवृक्षास्तु अश्वत्थवटोदुंबरलताः क्षीरसिक्तैरेतैरर्कसहस्रं द्वादशसहस्रं जुहुयात्
सद्यते न पयोधसासितेनेति धवलीकृतेन क्षीरादनेन घृतसिक्तेन च सहस्रं जुहुयात् तत्फलायैव सर्वदः।

ॐ

अथ सुदर्शनविधानमुच्यते अहिर्बुध्न्यऋषिः अनुष्टुप्छंदः श्रीसुदर्शनो महाविष्णुर्देवता रं बीजं हं शक्तिः
अथ सुदर्शनविधानमुच्यते अहिर्बुध्न्यऋषिः ... आचक्राय स्वाहा हृदयं विचक्राय स्वाहा शिरः सुचक्राय स्वाहा शिखा धीचक्राय स्वाहा कवचं सुचक्राय स्वा
हा नेत्रं ज्वालाचक्राय स्वाहा अस्त्रं पुनः ऐंद्रीदिशं चक्रेण धारयामि नमश्चक्राय स्वाहेति दिग्बंधनं कुर्यात् अथ वा ऐंद्री
दिशं चक्रेण बध्नामीत्यादि अधोदिशं चक्रेण बध्नामि नमश्चक्राय स्वाहेति दिग्बंधः आग्नेयी
दिशं समारभ्य दिशं त्वधस्तात् अंतमित्यारभ्य शीर्यश्च शीर्यश्च दिशां प्रबंधः इत्यत्र दिग्बंधनमंत्रो ह्यरेव शाव
प्रस्तासं· १९५ निर्देशात् दिग्बंधनमंत्रस्य स्वाहांते अस्त्राय फडिति सर्वत्र विधिरिदं संयोज्य दिग्बंधनं कुर्यात् अस्मिन्यदेतेअस्त्रम्
त्रोपदेशः कथं स्वीकृतप्रकारेण आचक्राय स्वाहेत्याद्यंगं नेत्रांतं कृत्वा तत्रैवास्त्रस्थाने तु ऐंद्रीदिशं चक्रेण बध्नामि
नमो ज्वालाचक्राय स्वाहा अस्त्राय फट् एवमाग्नेयादिष्वपि एवं दिग्बंधनमंत्रस्यापि अस्त्राय फडिति संयोज्य अ
गरुडगदशार्ङ्गदिग्बंधनरूपेण कुर्यादिति पुनः ॐ त्रैलोक्यं रक्ष रक्ष हुं फट् स्वाहा अनेनापि प्रकारमंत्रेण परितो
195 गग्निप्राकारं भावयेत् अस्य मंत्रस्याक्षरन्यासमुच्यते तारं तु मर्द्धनि सितारुणकृष्णवर्णान् मध्ये भ्रुवोश्च समयोर्वद
नेहकारं हृदयस्थनाभिपदसंधिषु चावशिष्टान् वर्णान्न्यसेदिति मनोः पुनरग्निवर्णान् अस्यार्थः अकारउकारमका
राणां संधिः किल प्रणवः तेन सितारुणकृष्णवर्णत्रयस्वरूपतारं शिरसि न्यसेत् पुनः सकारादिवर्णान् अग्निव
र्णान् ध्यात्वा भ्रूमध्यादिषु स्थानेषु न्यसेदिति ध्यानम् अथ्याज्ञास्कर सप्रभाभिरखिलाभिर्दिशो भासय
न्भीमाक्षः दारदंष्ट्रा सविकसद्दंष्ट्राप्रदीप्ताननः दोर्भिश्चक्रगदाधरो ज्ञमुसलाब्जासांश्चपाशांकुशौ बिभ्र
न्पिंगशिरोरुहोऽथ भवतश्चक्राभिधानो हरिः ॐ सहस्रार हुं फट् इति मंत्रः एतावद्धानोयं मंत्रः द्वादशा
लदं जपः सुदर्शनाय विद्महे महाज्वालाय धीमहि तन्नश्चक्रः प्रचोदयात् इयं सौदर्शनी गायत्री मूला राम
मंत्रेण नुमितहृताप्याध्यापाक्तिजपत्वा अनयासान्निध्यमुद्राश्च प्रदर्शयेत् करतलाभ्यां बद्धांजलिः प्रस्तो· १९५

षोसात्रिष्यमुद्राः पुनः ॐ नमो भगवते महासुदर्शनाय महाचक्राय महाज्वालाय दीप्तिरूपाय सर्वतो रक्ष रक्ष।
मां महाबलाय स्वाहा। रक्षाकरः अन्तिद्धोयं क्रियमाणेषु कर्मसु। तिलसर्षपाज्यबिल्वाज्यदोग्धैर्होदशसह।
स्रं जुहुयात्पुरश्चरणे होमः दौग्धं पायसं अथ कलशस्नानार्थं यंत्रमंडलं लिख्यते। भस्मौ तंडुलचूर्णानि वि
कीर्य तस्मिन् नूतनभाग्रेण यंत्रमालिखेत्। अयं न्यासः सर्वत्र कलशविधौ समानः। षट्कोणं तन्मध्यतारं विवर
लिखितमंत्रालं संधि गजत्वांगं वा स्वकलाके मासमुद्रगताष्टदलं चाष्टपत्रं पत्रं वर्णैर्विराजाद्धिकान्तिद।
लालसत्वोडशार्णत्रिवीतं व्योमात्यार्णैः स्वनाम्ना विरचितगुणपाशांकुशं चक्रयंत्रं। अस्यार्थः प्रथमं षट्
कोणं विलिख्य तदंतः प्रणवं विलिख्य तस्मिन् जीवसाध्यनामादीन् विलिख्य षट्कोणेषु सुदर्शनषडक्षरा
न्विलिख्य कोणाद्वंद्वसंधौ षडंगानि विलिख्य तत्र षडंगेषु वेरूपता विशेषे सर्वादिअक्षरेणाव प्राक्षि।
नमो ज्वालाचक्राय स्वाहा अस्त्राय फट् इति विलिखेत्। एवं षडंगानां मध्ये षट्दिग्वंधनमंत्रेणामाकं विलि
ख्य पुनस्तद्वाह्येष्टपत्रं विलिख्य तद्दलमूले कादिवर्णान् भागशः संलिखेद्वाहिश्च मालिखेत्। पुनर्दल।
मध्ये सुदर्शनषोडशार्णं ॐ नमो भगवते महासुदर्शनाय फट् इत्यस्यैकैकमक्षरं विलिखेत्। पुनर्वाह्ये वृत्तत्र।
यं विलिख्य प्रथमवृत्ते हंहं इत्यनेनावृत्यावेष्टयेत्। द्वितीयवृत्ते तं इत्यनेनावृत्यावेष्टयेत्। तृतीयवृत्ते स्वना।
म्ना सह विरचितगुणपाशांकुशं गुणः प्रणवः प्रथमं प्रणवं ततो नाम्नः प्रथममक्षरं ततः पाशं ततो
नाम द्वितीयाक्षरं ततोंकुशं विलिखेदित्यर्थः। अथवा प्रथमवृत्ते हं ॐ इत्यक्षराभ्यां वेष्टयेत् द्वितीयवृत्ते दं ग्रां। हं
इत्यक्षराभ्यां वेष्टयेत् तृतीयवृत्ते नाम्ना सह क्रौंकारेण वेष्टयेदिति मूलसप्रतार्थः साम्प्रदायकः। अथवा प्र
थमवृत्ते वीथ्यां सविंदुकं हकारं विलिख्य ततः साध्यनामाक्षरमेकमक्षरं विलिख्य ततः तकारं पुनरपि
हकारं पुनः साध्यनामद्वितीयाक्षरं ततः तकारं एवं हकारतकाराभ्यां साध्यनामाक्षराणि पुटित्वा विलिखेत्

पुनस्तद्बहिर्वृत्तं तत्प्रमाणेनापादतस्तारं मालिखेत् तस्य दीर्घशरेखयापंत्रमभितः समावेष्टयेत् पुनस्तद्बहिर्वृत्तो
ऽग्रभागेऽङ्कुशानां मालिख्य तद्दीर्घशरेखयापंत्रमभितो वेष्टयेत् इति तत्र आमिति पाशः क्रोमिति अङ्कु
शः एवं मण्डलप्रकारः अस्मिन् मण्डले पुरश्चरणे कलशं क्षीरद्रुमत्वक्क्वाथोदकैर्वा उग्रपेनवा पंचगव्यैर्वापि
शोभितैर्वा संस्थाप्य वैष्णवपीठे समावाह्य समर्चयेत् चक्रहरिं क्रमेण अंगैः प्रथमावृत्तिः अथ षट्कोणषडां
गमंत्रैः षट्कोणपत्राद्विशेषसर्वादिशश्च केशवप्रामि नमोज्वालाचक्राय स्वाहा अस्त्राय फट् इति योजयेत् च
प्र·सा·से· क्राय· शंखाय· गदायै· पद्माय· मुसलाय· धनुषे· पाशाय· अङ्कुशाय· एते वा रोचीविपीतरक्तोसितश्या
१९६ मविद्युत्प्रख्याः इमाः इति चक्रपद्मपीतवर्णौ मुसलांकुशौ रक्तवर्णौ शंखगदे सिते धनुःपाशौ श्यामौ एतैरायु
धैर्द्वितीयावृत्तिः लक्ष्म्यै· सरस्वत्यै· रत्यै· प्रीत्यै· कीर्त्यै कान्त्यै तुष्ट्यै इति तृतीयावृत्तिः इन्द्रादिभिश्चतुर्थी ॥ नस्यै
196 अथ चक्रहोमप्रयोगप्रकारः पीताभाकर्णिकास्यादरुणतरमहेभ्यपामलं वांतरालैर्नेमिः श्वेताचवाह्ये
कु विरचितशिखिरेखारुलंपार्थिवान्तं चक्रं हृद्धं लिखित्वा विप्रादमतिरथ्यासो मध्यायामं च मन्त्री कुंभं संस्थाप्य सो
म्यप्रश्चयततत्पादादिणिहोमकर्म ॥ अस्यार्थः प्रथमं कर्णिकाव्यं यथेष्टविशालेन विलिख्य तद्बहिः
कर्णिकाविशालषष्ठांशमानेन वृत्तं कृत्वा तद्बहिः ततो द्विगुणमानेन वृत्तं कृत्वा तद्बहिः कर्णि
काद्वतषष्ठांशमानेन वृत्तं त हृयं विधाय कर्मकर्णिकावृत्तमध्यं पीतवर्णैर्हरिद्राचूर्णादिभिरापूर्य त
द्बाह्यवृत्तवीथीं च पीतवर्णैरेवापूर्य तद्बाह्यवृत्ततः वीथ्यां अष्टदलानि कृत्वा इतरेतरदलयोः अं
तराले मेकांगुलप्रमाणं यथाभवेत् तथाष्टदलानि विलिख्य तद्दलानां मध्यं रक्तवर्णैरापूर्य दोषार
नः तारसंयुक्तं रक्तमित्युच्यते ५ नर्दलयोः दलयोरंतरालो एकं श्यामाकारैर्विल्वपत्रचूर्णादिभिरापूर्य तद्बा राम
ह्यवृत्ते नेम्याख्ये श्वेतवर्णैस्तण्डुलचूर्णादिभिरापूर्य तद्बाह्यवृत्तमध्ये पिकृष्णवर्णैर्दग्धपुलाकचूर्णादिभिरापूरये १९६

कौर्जंकृयात· श्रियं सरसिजैर्दूर्वाभिरप्यायुषे मेधायै द्विजभरुहैश्चक्रमदैः श्वेतैस्तथा वासमे शुक्राज्यैः पद्मा
वोप्युडुंबरभवैः शत्रुक्षयाय वाश्वत्थजैरेकाद्यं विधिवत्सहस्रसमितैरष्टोत्तरं मुक्तये द्विजभरुहे पलाशं सर्पेपु(
पुतसंख्यकाः अश्वत्थं च सहस्रसंमितमेकावृद्धनेत. अथास्यमंत्रमाह प्रणवेनांतरं तदनु च मनुवर्णान् प्राः(
कोणषट्कं वाह्ये चांगलिखेत्कनके रूप्यके चाथ ताम्रे पाषाणे वा विधिवद्भिज्ञप्याथसंस्था पितं नच्चक्रं
चौरग्रहरिपुभयध्वंसि रेखाकारं च अस्यार्थः प्रणवं कर्णिकायां विलिख्य सुदर्शनषडर्णान् कोणषट्के च को
णयोरंतरालेषु तत्षडंगानि विलिखेदिति अथ मंत्रं संमिलित्वा जपविधानमुच्यते स्थाने हृषीकेशावि(
त्र^ दर्भितं च साष्टाक्षरं वाप्यभिजमपतेत. रक्षांश्यतादेः सततं विधते यंत्रेसग भ्रमनत्रयेण अस्यार्थः प्र
थमं श्रीमदष्टाक्षरमंत्रमादितो द्व्यक्षरं अथ सुदर्शनप्रथमाक्षरं ततः गीतात्रिष्टुभः प्रथमद्वितीया
क्षरे ततः सुदर्शनमंत्रद्वितीयाक्षरं ततस्त्रिष्टुभः तृतीयचतुर्थाक्षरे। ततः सुदर्शनमंत्रस्य तृतीयमक्ष
रं ततः त्रिष्टुभः पंचमषष्ठे एवं क्रमेण त्रिष्टुप्प्रथमपादांत्याक्षरपर्यंतं संयोज्य अष्टाक्षरस्य एकस्यां
तेष्टाक्षरं तृतीयचतुर्थाक्षरे पंचमषष्ठाक्षरे च युक्त्वा ततः सुदर्शनाद्यमक्षरं त्रिष्टुभद्वितीयपादाद्य
यमक्षरमित्येवं क्रमेण चतुष्पादेषु संयोज्य एकवारं त्रिष्टुभो जपेत्सुदर्शनमंत्रस्य चतुर्वारं श्रीमदष्टाक्ष
रमंत्रस्य द्विवारं चावृत्तिर्भवति तत्र विदर्भशब्देन सुदर्शनमंत्रस्य योगः साष्टाक्षरमिश्रतया अष्टाक्षर(
स्य योगः विदर्भादिशराभावात् अष्टाक्षरस्य त्रिष्टुभः पादानामाद्यंतेषु द्विद्विक्रमेण अक्षराणां योजनं
संप्रदायादागतं अक्षरद्वयद्वयांतराएकैकं संपुटं विदर्भितमित्युच्यते स्थाने हृषीकेशविदर्भितमिति
श्लोकोक्तमप्यर्थं व्याख्यानेन लिखित्वा मंत्रितं वरदानीलिख्यते ॐ नमो स्थाने सहृषीकेश तव प्रकीडं
लींफट् मोनारायणं जगत्प्रहृष्यत्यनुरज्यते ॐ चफट् णाय ॐ नमो रक्षांसि भीतानि दिशो द्रवंडं

प्र॰ सा॰ सं॰ १९८

198

तिफट् नमो नारायणाय ॐ सर्वं समनमहसंगति स्वाचामि रुं ठं सं कं बाः फट् नमो यो। एवं स्थाने हृषीकेशाविदर्भितमित्य
नेन श्लोकेनोक्तं मंत्रत्रयं अस्य सुदर्शनोक्तवदंगादीनि अनेन रक्षादौ जपः कार्यः इति पुनरनेन मंत्रत्रये
णास्य कोष्ठयंत्रविधानमस्तीति तदुच्यते अष्टावरं तरितपादचतुष्ककोष्ठं कोष्ठत्रयालिखितमाध्यसुदर्श
नं च रेखाभिरष्टभिः पतः अतिशः प्रवृद्धं तत्सप्तकोष्ठमिति यंत्रमिदं प्रशस्तम् भूर्जे वा लोमपट्टे नु मसृणा
तरे कर्पटे वास्य यंत्रं मंत्री समुन्नरी विलिखित्वा पुनः एषा गुलिकी कृत्य लाक्षाभिर्वीतं कृत्वा मध्यादि होमपत्र विहि
तं च तं संपातपातात् शाक्ति जस्ते सम्यक् निबध्यात् प्रतिशममुपयांत्येव सर्वे विकाराः अस्यार्थः प्रथमं दा
क्षिणावामतः अष्टौ रेखा विलिख्य तास्वेकस्मिन् पार्श्वे आरभ्य पूर्वरेखाग्रं त्यक्त्वा पंचमरेखाग्रेण अर्द्धचंद्रा
कृत्यानीत्वा वध्नीयात् पुनस्ततो यावस्थितरेखाग्रमपि ततः पंचमरेखाग्रेण संवध्नीयात् एवं सर्वरेखाग्र
मपि वध्नीयात् पुनरितरपार्श्वमपि एवं वध्नीयात् पुनः पूर्वकोष्ठे वैशवाष्टादश मंत्रस्य प्रथमाक्षरद्वयमुत्त
रपार्श्वे विलिख्य कोष्ठस्य मध्यप्रदेशे स्थाने हृषीकेश इत्यस्य प्रथमपादं पंक्तिशो विलिखेत् दक्षिणपार्श्वे
प्यष्टाक्षरस्य तृतीयचतुर्थाक्षरे विलिखेत् पुनः सर्वतः पश्चिमकोष्ठेपि तथैव दक्षिणाद्यारभ्य पूर्वप्रातिलो। म
म्येन क्रमः तत्र दक्षिणपार्श्वे अष्टाक्षरे पंचमषष्ठाक्षरे विलिख्य ततः गीतात्रिष्टुभो द्वितीयपादाक्षराणि।
विलिख्य तदुत्तरपार्श्वेपि अष्टाक्षरस्य सप्तमाष्टमाक्षरे विलिखेत् पुनः सर्वस्मात् प्राक्कोष्ठस्याधः स्थितको
ष्ठेपि पूर्ववदष्टाक्षरप्रथमद्वितीयाक्षरे विलिख्य गीतात्रिष्टुभस्तृतीयपादं विलिख्य अष्टाक्षरस्य तृतीय
चतुर्थाक्षरे विलिख्य पुनः सर्वतः पश्चिमास्थितकोष्ठात् प्राक्कोष्ठेपि पूर्ववत् प्रथममष्टाक्षरे विलिख्य गीता रस्य पञ्चमषष्ठाक्षरे
त्रिष्टुभश्चतुर्थपादं च विलिख्य अष्टाक्षरस्य सप्तमाष्टमाक्षरे विलिखेत् पुनर्मध्यस्थितकोष्ठे सुदर्शनम
हूं गणेश्च माध्यनाम च वर्णशो विदर्भरूपेण विलिख्य पुनस्तदधः कोष्ठद्वये स्थितथैव विलिखेत् अथ